सोहिंतु पसायपरा, तं गीयत्था विसेसविऊ ॥ १०१ ॥

## ॥ कूपदृष्टान्तविशदीकरण ॥

नमिऊण महावीरं, तियसिंद-णमंसियं महाभागं ।
विसईकरेमि सम्मं, दव्वत्थए कूवदिट्ठंतं ॥ १ ॥

सपरोवयारजणगं, जणाणं जह कूवखणणमाइट्ठं ।
अकसिणपवत्तगाणं, तह दव्वत्थओ वि विण्णेओ ॥ २ ॥

ईसिं दुट्ठत्ते जं, एयस्य नवंगिवित्तिकारेणं ।
संजोयणं कयं तं, विहिविरहे भत्तिमहिकिच्च ॥ ३ ॥

इहरा कहं चि वयणं, कायवहे कह णु होज्ज पूयाए ।
न य तारिसो तवस्सी, जंपइ पुव्वावरविरुद्धं ॥ ४ ॥

संभावणे विसद्दो, दिट्ठंतोऽनणुगुणो पयंसेइ ।
सामण्णाणुमईए, सूरी पुण अंसओ बाहं ॥ ५ ॥

दुग्गयनारीणाया, जइ वि पमाणीकया हवइ भत्ती ।
तह वि अजयणाजणिआ, हिंसा अन्नाणओ होइ ॥ ६ ॥

सुद्धासुद्धो जोगो, एसो ववहारदंसणाभिमओ ।
णिच्छयणओ उ णिच्छइ, जोगज्झवसाणमिस्सत्तं ॥ ७ ॥

जइ (अ) विहिजुयपूयाए, दुट्ठत्तं दव्वमित्तहिंसाए ।
तो आहारविहारप्पमुहं साहूण किंमदुट्ठं ॥ ८ ॥

जावइओ आरंभो, तावइयं दूसणं ति गणणाए ।
अप्पत्तं कह जुज्जइ, अप्पं पि विसं च मारेइ ॥ ९ ॥

"कक्कसवेज्जमसायं, बंधइ पाणाइवायओ जीवो" ।
इय भगवईइ भणियं, ता कह पूयाइ सो दोसो ॥ १० ॥

आरंभो वि हु एसो, हंदि अणारंभओ त्ति णायव्वो ।
वहविरईए भणिअं, जमकक्कसवेयणिज्जं तु ॥ ११ ॥

धुवबंधिपावहेउत्तणं ण दव्वत्थयम्मि हिंसाए ।
धुवबंधा जमसज्झा, तत्ते इयरेयरासयया ॥ १२ ॥

## ॥ धर्मपरीक्षा ॥

पणमिय पासजिणिंदं धम्मपरिक्खाविहिं पवक्खामि ।
गुरुपरिवाडीसुद्धं आगमजुत्तीहिं अविरुद्धं ॥ १ ॥

सो धम्मो जो जीवं धारेइ भवण्णवे निवडमाणं ।
तस्स परिक्खामूलं मज्झत्थत्तं चिय जिणुत्तं ॥ २ ॥

मज्झत्थो अ अणिस्सियववहारी तस्स होइ गुणपक्खो ।
णो कुलगणाइणिस्सा इय ववहारम्मि सुपसिद्धं ॥ ३ ॥

तुल्ले वि तेण दोसे पक्खविसेसेण जा विसेसु त्ति ।
सा णिस्सियत्ति सुत्तुत्तिण्णं तं बिंति मज्झत्था ॥ ४ ॥

तित्थुच्छेओ व्व मओ सुत्तुच्छेओ वि हंदि उम्मग्गो ।
संसारो अ अणंतो भयणिज्जो तत्थ भाववसा ॥ ५ ॥

णियउस्सुत्तणिमित्ता संसाराणंतया ण सुत्तुत्ता ।
अज्झवसायोऽणुगओ भिन्नो च्चिय कारणं तीसे ॥ ६ ॥

कम्मं बन्धइ पावं जो खलु अणुवरयतिव्वपरिणामो ।
असुहाणुबन्धजोगा अणंतसंसारिआ तस्स ॥ ७ ॥

तम्मूलं मिच्छत्तं आभिग्गहिआइ तं च पंचविहं ।
भव्वाणमभव्वाणं आभिग्गहिअं वणाभोगो ॥ ८ ॥

णत्थि ण णिच्चो ण कुणइ कयं ण वेएइ णत्थि णिव्वाणं ।
णत्थि य मोक्खोवाओ आभिग्गहिअस्स छ विअप्पा ॥ ९ ॥

अणभिग्गहिआईण वि आसयभेएण हुंति बहुभेआ ।
लहुआइं तिण्णि फलओ एएसुं दुन्नि गरुआइं ॥ १० ॥

मज्झत्थत्तं जायइ जेसिं मिच्छत्तमंदयाए वि ।
ण तहा असप्पवित्ती सदंधणाएण तेसिं पि ॥ ११ ॥

इत्तो अणभिग्गहियं भणिअं हियकारि पुव्वसेवाए ।
अण्णायविसेसाणं पढमिल्लयधम्ममहिगिच्च ॥ १२ ॥

इत्तो अ गुणट्ठाणं पढमं खलु लद्धजोगदिट्ठीणं ।
मिच्छत्ते वि पसिद्धं परमत्थगवेसणपराणं ॥ १३ ॥

गलिआसग्गहदोसा अविज्जसंविज्जपयगया ते वि ।
सव्वण्णुभिच्चभावा जइणत्तं जंति भावेणं ॥ १४ ॥

दव्वाणा खलु तेसिं भावाणाकारणत्तओ नेया ।
जं अपुणबंधगाणं चित्तमणुट्ठाणमुवइट्ठं ॥ १५ ॥

मग्गाणुसारिभावो आणाए लक्खणं मुणेयव्वं ।
किरिया तस्स ण णियया पडिबंधे वा वि उवगारे ॥ १६ ॥

मग्गाणुसारिभावो जायइ चरमम्मि चेव परिअट्टे ।
गुणवुड्ढीए विगमे भवाभिनंदीण दोसाणं ॥ १७ ॥

एअम्मि नाणदंसण-जोगाजोगेहिं देससव्वकओ ।
चउभंगो आराहग-विराहगत्तेसु सुअसिद्धो ॥ १८ ॥

पढमो बालतवस्सी गीयत्थाणिस्सिओ व अग्गीओ ।
अण्णे भणंति लिंगी सम्मगमुणिमग्गकिरियधरो ॥ १९ ॥

तं मिच्छा जं फलओ मुक्खं आराहगत्तमिह पगयं ।
तं च ण एगंतेणं किरियाए भावसुन्नाए ॥ २० ॥

जइणीए किरियाए दव्वेणाराहगत्तपक्खे य ।
सव्वाराहगभावो होज्ज अभव्वाइलिङ्गीणं ॥ २१ ॥

तह णिण्हवाण देसाराहगभावो अवट्ठिओ हुज्जा ।
तो परिभासा जुत्ता वित्तिं परिगिज्झ वुत्तुं जे ॥ २२ ॥

मग्गाणुसारिकिरिया जइणिच्चिय भावओ उ सव्वत्थ ।
जेणं जिणोवएसो चित्तो अपमायसारो वि ॥ २३ ॥

अण्णत्थ वि जमभिण्णं अत्थपयंतं जिणिंदसुअमूलं ।
अण्णो वि तयणुसारी तो देसाराहगो जुत्तो ॥ २४ ॥

पक्खंतरम्मि भणिओ गीयत्थाणिस्सिओ अगीओ सो ।
जो ऽणभिणिविट्ठचित्तो भीरू एगंतसुत्तरुई ॥ २५ ॥

लोइअमिच्छत्ताओ लोउत्तरियं तयं महापावं ।
इअ णेगंतो जुत्तो जं परिणामा बहुविगप्पा ॥ २६ ॥

पढमकरणभेएणं गंथासन्नो जई व सड्ढो वा ।
णेगमणयमयभेआ इह देसाराहगो णेओ ॥ २७ ॥

देसस्स भंगओ वा अलाहओ वा विराहगो बीओ ।
संविग्गपक्खिओ वा सम्मद्दिट्ठी अविरओ वा ॥ २८ ॥

तइए भंगे साहू सुअवंतो चेव सीलवंतो अ ।
उवयारा सड्ढो वि य भवाभिणंदी चउत्थम्मि ॥ २९ ॥

भावो जेसिमसुद्धो ते ववहारट्ठिया वि एरिसया ।
णिच्छयपरंमुहो खलु ववहारो होइ उम्मग्गो ॥ ३० ॥

भावुज्झियववहारा ण किं पि आराहगत्तणं होइ ।
भावो उ बोहिबीजं सव्वण्णुमयम्मि थोवो वि ॥ ३१ ॥

तिण्णि अणुमोयणिज्जा एएसुं णो पुणो तुरियभंगो ।
जेणमणुमोयणिज्जो लेसो वि हु होइ भावस्स ॥ ३२ ॥

अणुमोअणाइ विसओ जं तं अणुमोअणिज्जयं होइ ।
सा पुण पमोअमूलो वावारो तिण्ह जोगाणं ॥ ३३ ॥

सामन्नविसेसत्ता भेओ अणुमोअणापसंसाणं ।
जह पुढवीदव्वाणं ण पुढो विसयस्स भेएणं ॥ ३४ ॥

तेणमणुमोअणिज्जं पसंसणिज्जं च होइ जाईए ।
सुद्धं किच्चं सव्वं भावविसिट्ठं तु अन्नं पि ॥ ३५ ॥

इअ लोइअलोउत्तर सामन्नगुणप्पसंसणे सिद्धे ।
मिच्छदिट्ठीण गुणे ण पसंसामो त्ति दुव्वयणं ॥ ३६ ॥

मग्गाणुसारि किच्चं तेसिंपणुमोअणिज्जमुवइट्ठं ।
सिवमग्गकारणं तं गम्मं लिंगेहिं धीरेहिं ॥ ३७ ॥

परपाखंडिपसंसा इहइं खलु को वि णेवमइआरो ।
सो तम्मयगुणमोहा अणवत्थाए व होज्जाहि ॥ ३८ ॥

जइ हीणं तेसिं गुणं सम्मत्तधरो ण मन्नई त्ति मई ।
ता कस्स वि सुहजोगं तित्थयरो णाणुमन्निज्जा ॥ ३९ ॥

ता उस्सुत्तं मोत्तुं अणुमोइज्जा गुणे उ सव्वेसिं ।
जं थोवा वि तओ लहेज्ज दुक्खं मरीइ व्व ॥ ४० ॥

सुत्तं भासंताणं णिच्चं हिययट्ठिओ हवइ भयवं ।
हिययट्ठिअम्मि तम्मि य णियमा कल्लाणसंपत्ती ॥ ४१ ॥

हिययट्ठिओ अ भयवं छिंदइ कुविगप्पमत्तभत्तस्स ।
तयभत्तस्स उ तम्मि वि भत्तिमिसा होइ कुविगप्पो ॥ ४२ ॥

जेणं भणंति केई जोगाउ कयावि जस्स जीववहो ।
सो केवली ण अम्हं सो खलु सक्खं मुसावाई ॥ ४३ ॥

ते इय पज्जणुजुज्जा कह सिद्धो हंदि एस णियमो भे ।
जोगवओ दुव्वारा हिंसा जमसक्कपरिहारा ॥ ४४ ॥

खीणे मोहे णियमा गरहाविसओ ण होइ किच्चंति ।
सा ण जिणाणं ति मई दव्ववहे होइ णिव्विसया ॥ ४५ ॥

अकरणणियमावेक्खं एयं भणिअं ति अपडिसेवाए ।
इत्तो जिणाण सिद्धी ण उ दव्ववहस्स पडिसेहो ॥ ४६ ॥

परिणिट्ठियवयणमिणं जं एसो होइ खीणमोहम्मि ।
उवसमसेढीए पुण एसो परिणिट्ठिओ ण हवे ॥ ४७ ॥

दव्वासवस्स विगमो गरहाविसयस्स जइ तहिं इट्ठो ।
ता भावगयं पावं पडिवन्नं अत्थओ होइ ॥ ४८ ॥

णियणियकारणपभवा दव्वासवपरिणई ण मोहाओ ।
इहरा दव्वपरिग्गहजुओ जिणो मोहवं हुज्जा ॥ ४९ ॥

एएणं दव्ववहे जिणस्स हिंसाणुबंधसंपत्ती ।
इय वयणं पक्खित्तं सारक्खणभावसारिच्छा ॥ ५० ॥

अववाओवगमे पुण इत्थं नूणं पइण्णहाणी ते ।
पावंति असुहजोगा एवं च जिणस्स तुज्झ मए ॥ ५१ ॥

अणुसंगयहिंसाए जिणस्स दोसं तुहं भणंतस्स ।
साहूण वि आभोगा णइउत्ताराइ विहडिज्जा ॥ ५२ ॥

वज्जंतो अ अणिट्ठं जलजीवविराहणं तहिं सक्खं ।
जलजीवाणाभोगं जंपंतो किं ण लज्जेसि ॥ ५३ ॥

जलजीवाणाभोगा णइउत्तारम्मि जइ ण तुह दोसो ।
पाणे वि तस्स ता सो मूलच्छेज्जो ण हुज्जाहि ॥ ५४ ॥

णणु आभोगा इत्थं विरयाणं हुज्ज देसविरयत्तं ।
णेवं जं पडिपुन्ना पडिवत्ती सुत्तआणा य ॥ ५५ ॥

तम्हा दव्वपरिग्गह-दव्ववहाणं समम्मि(मेवि) आभोगे ।
ण हु दोसो केवलिणो केवलनाणे व चरणे वा ॥ ५६ ॥

णोदव्वा णोभावा जह तह हिंसा ण दव्वमित्तेणं ।
तेणं तीए दोसं जिणस्स को भासए सण्णी ॥ ५७ ॥

पयडं चिय वयणमिणं दट्ठव्वं होइ कप्पभासस्स ।
जं अपमत्ताईणं सजोगिचरमाण णो हिंसा ॥ ५८ ॥

हिंसगभावो हुज्जा हिंसण्णियजोगओ त्ति तक्कस्स ।
दाएउं इय भणिअं पसिढिलमूलत्तणं दोसं ॥ ५९ ॥

आपायगाऽपसिद्धी ण य भणिया वत्थच्छेय अहिगारे ।
ता तस्संमइवयणं पण्णत्तीए ण अण्णट्ठं ॥ ६० ॥

किरिआओ अंतकिरियाविरोहिणीओ जिणेण भणिआओ ।
आरंभाइजुआओ मंडियपुत्तेण पुट्ठेणं ॥ ६१ ॥

आरंभाइजुअत्तं तस्सत्तीए फुडेहि ण उ तेहिं ।
तस्सत्तीविगमे पुण जोगणिरोहो अपडिबद्धो ॥ ६२ ॥

पोग्गलपणोल्लणाए जो आरंभो इमीइ किरियाए ।
णियमा मुणीण भणिओ सस्सिअनाएण सोऽदुट्ठो ॥ ६३ ॥

सो केवलिणो वि हवे चलोवगरणत्तणं जमेयस्स ।
सहगारिवसा णिययं पायं थूलाइ किरियाए ॥ ६४ ॥

सक्खं तु कायफासे जो आरंभो कयाइ सो हुज्जा ।
अहिगिच्च तं णिमित्तं मग्गिज्जइ कम्मबंधठिई || ६५ ||

तत्थ णिमित्ते सरिसे जेणोवादाणकारणाविक्खो ।
बंधाबंधविसेसो भणिओ आयारवित्तीए || ६६ ||

कारगसंबंधेणं तस्स णिमित्तस्सिमा उ मज्जाया ।
कत्ता पुणो पमत्तो णियमा पाणाइवायस्स || ६७ ||

जो पुण इह कत्तारं नियमा मसगाइजीवमहिकिच्च ।
भणइ इमं पासंगियमइप्पसंगो फुडो तस्स || ६८ ||

जियरक्खा सुहजोगा जइ तुह इट्ठा सजोगिकेवलिणो ।
हंदि तया तयभावे अजोगिणो हुज्ज हीणत्तं || ६९ ||

सा तस्स सरूवेणं वा वावारेण आइमे पक्खे ।
पडिलेहणाइहाणी बितिए अ असक्कपरिहारो || ७० ||

ण हु सक्का काउं जे इह बायरवाउकायउद्धरणं ।
केवलिणावि विहारे जलाइजीवाण य तयंति || ७१ ||

नणु जिण जोगाउ तहा जलाइजीवाणऽघायपरिणामो ।
अचित्तपएसे णं जह गमणं पुप्फचूलाए || ७२ ||

भण्णइ सव्वं एयं भणियं णु तए परोप्परविरुद्धं ।
दिट्ठंतियदिट्ठंता जमेगरूवा ण संपन्ना || ७३ ||

एगत्थ जलमचित्तं अण्णत्थ सचित्तयंति महभेओ ।
अफुसिअगमणं तीए, ण सुअं अण्णस्स व जिणस्स || ७४ ||

सोऽइसओ कायकओ जोगकओ वा हविज्ज केवलिणो ।
दुहओ वण्णियपुत्ताइणायओ पायडविरोहो || ७५ ||

एवं सव्वजिआणं जोगाओ च्चिय अघायपरिणामे ।
केवलिणो उल्लंघण-पल्लं घाईण वेफल्लं || ७६ ||

एएण मच्छियाई सहावकिरिआपरायणा हुंति ।
ण हु जिणकिरियापेरिअकिरियं जंति त्ति पडिसिद्धं ॥ ७७ ॥

जं पि मयं णारंभो लद्धिविसेसाउ चेव केवलिणो ।
तं पि इमीइ दिसाए णिराकयं होइ णायव्वं ॥ ७८ ॥

तं खलु उवजीवंतो पमायवं तुह मए जिणो हुज्जा ।
सेलेसीए वि फलं ण तस्स उवजीवणाभावे ॥ ७९ ॥

जोगगया सा लद्धी अजोगिणो खाइगा वि जइ णत्थि ।
ता तक्कम्मस्सुदओ तस्सेव हवे पराहुत्तो ॥ ८० ॥

दव्वारंभं दोसं अट्ठारसदोसमज्झयारम्मि ।
जो इच्छइ सो इच्छइ णो दव्वपरिग्गहं कम्हा ॥ ८१ ॥

मिच्छादोसवयणओ संसाराडविमहाकडिल्लम्मि ।
जिणवरणिंदारसिआ भमिहिंति अणोरपारम्मि ॥ ८२ ॥

जो वि य जायइ मोहो छउमत्थजिणाण लिंगवयणाओ ।
उवउत्तस्स ण चिट्ठइ सो वि य परमत्थदिट्ठीए ॥ ८३ ॥

तिव्वासग्गहदोसा एयारिसया हवंति कुविगप्पा ।
ते उच्छिंदिय सम्मं आणाइ मुणी पयट्टिज्जा ॥ ८४ ॥

आणा पुण जगगुरुणो एगंतसुहावहा सुपरिसुद्धा ।
अपरिक्खिआ ण गिज्झा सा सव्वा णाममित्तेणं ॥ ८५ ॥

कसछेयतावजोगा परिक्खियव्वा य सा सुवण्णं व ।
एसा धम्मपरिक्खा णायव्वा बुद्धिमंतेणं ॥ ८६ ॥

विहिपडिसेहा उ कसो तज्जोगक्खेमकारिणी किरिया ।
छेओ तावो य इहं वाओ जीवाइतत्ताणं ॥ ८७ ॥

एयाहिं परिक्खाहिं सुद्धे धम्मम्मि परिणया जे उ ।
गुरुणो गुणजलणिहिणो ते वि विसुद्धा सुवण्णं व ॥ ८८ ॥

सत्थोइयगुणजुत्तो सुवन्नसरिसो गुरू विणिद्दिट्ठो ।
ता तत्थ भणंति इमे विसघायाई सुवन्नगुणे ॥ ८९ ।

विसघाइ-रसायण-मंगलत्थ-विणए-पयाहिणावत्ते ।
गुरुए-अडज्झ-ऽकुच्छे अट्ठ सुवन्ने गुणा हुंति ॥ ९० ॥

इय मोहविसं घायइ १ सिवोवएसा रसायणं होइ २ ।
गुणओ य मंगलत्थं ३ कुणइ विणीओ अ जोग्गो त्ति ४ ॥ ९१ ॥

मग्गणुसारि पयाहिण ५ गंभीरो गरुअओ तहा होइ ६ ।
कोहग्गिणा अडज्झो ७ अकुच्छो सइ सीलभावेणं ८ ॥ ९२ ॥

एवं सुवन्नसरिसो पडिपुन्नाहिअगुणो गुरू णेओ ।
इयरो वि समुचियगुणो ण उ मूलगुणेहि परिहीणो ॥ ९३ ॥

एयारिसो खलु गुरू कुलवहुणाएण णेव मोत्तव्वो ।
एयस्स उ आणाए जइणा धम्मम्मि जइअव्वं ॥ ९४ ॥

गुरुआणाइ ठियस्स य बज्झाणुट्ठाणसुद्धचित्तस्स ।
अज्झप्पज्झाणम्मि वि एगग्गत्तं समुल्लसइ ॥ ९५ ॥

तम्मि य आयसरूवं विसयकसायाइदोसमलरहिअं ।
विन्नाणाणंदघणं परिसुद्धं होइ पच्चक्खं ॥ ९६ ॥

जलहिम्मि असंखोभे पवणाभावे जह जलतरंगा ।
परपरिणामाभावे णेव विअप्पा तया हुंति ॥ ९७ ॥

का अरती आणंदे केवत्ति वियप्पणं ण जत्थुत्तं ।
अण्णे तत्थ वियप्पा पुग्गलसंजोगजा कत्तो ॥ ९८ ॥

अण्णे पुग्गलभावा अण्णो एगो य नाणमित्तोहं ।
सुद्धो एस वियप्पो अविअप्पसमाहिसंजणओ ॥ ९९ ॥

एयं परमं नाणं परमो धम्मो इमो च्चिय पसिद्धो ।
एयं परमरहस्सं णिच्छयसुद्धं जिणा बिंति ॥ १०० ॥

अज्झप्पाबाहेणं विसयविवेगं अओ मुणी बिंति ।
जुत्तो हु (हि) धम्मवाओ ण सुक्कवाओ विवाओ वा ॥ १०१ ॥

भणियं किंचि फुडमिणं दिसाइ इय धम्मवायमग्गस्स ।
अण्णेहि वि एवं चिय सुआणुसारेण भणियव्वं ॥ १०२ ॥

किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टियव्वं एसा आणा जिणिंदाणं ॥ १०३ ॥

एसा धम्मपरिक्खा रइआ भविआण तत्तबोहट्ठा ।
सोहिंतु पसायपरा तं गीयत्था विसेसविऊ ॥ १०४ ॥

**( स्वोपज्ञटीकाप्रशस्ति :-**

सूरिश्रीविजयादिदेवसुगुरोः पट्टाम्बराहर्मणौ
सूरि श्रीविजयादिसिंहसुगुरौ शक्रासनं भेजुषि ।
सूरिश्रीविजयप्रभे श्रितवति प्राज्यं च राज्यं कृतो
ग्रन्थोऽयं वितनोतु कोविदकुले मोदं विनोदं तथा ॥ १ ॥

महोपाध्यायश्रीविनयविजयैश्चारुमतिभिः,
प्रचक्रे साहाय्यं तदिह घटनासौष्ठवमभूत् ।
प्रसर्पत्कस्तूरीपरिमलिविशेषाद्भवति हि,
प्रसिद्धः शृङ्गारस्त्रिभुवनजनानन्दजननः ॥ २ ॥

सन्तः सन्तु प्रसन्ना मे ग्रन्थश्रमविदो भृशम् ।
येषामनुग्रहादस्य सौभाग्यं प्रथितं भवेत् ॥ ३ ॥)

# ॥ मार्गपरिशुद्धिः ॥

ऐन्द्रश्रेणिनताय, प्रथमाननयप्रमाणरूपाय ।
भूतार्थभासनाय, त्रिजगद्गुरुशासनाय नमः ॥ १ ॥

जयति सतां किमपि मुखे, जिनवचनामृतनिषेकमाधुर्यम् ।
उज्जीवति गुणगरिमा, कलौ यतः खलगिरा पिहितः ॥ २ ॥

स्याद्वादास्वादपराः, प्रतियन्ति हि परमतानि विरसानि ।
नहि माकन्दमुकुलभुग्, नन्दति पिचुमन्दतरुषु पिकः ॥ ३ ॥

वस्तुविनिश्चयपटुना, स्याद्वादेनैव देशना देया ।
इत्युत्सर्गस्थितिरिय-मपरा त्वपवादमर्यादा ॥ ४ ॥

अत एव दिदेश तथा, कथासु धीरो यथार्थकथनपटुः ।
एकद्वित्वादिविधौ, भगवानपि सोमिलप्रश्ने ॥ ५ ॥

उत्सर्गान्निश्चयतो, वाचामाचारचातुरीति मतम् ।
तदनेकनयमयत्वे, युक्तमितरथा तु न कथञ्चित् ॥ ६ ॥

तत्त्वाङ्गव्यवहारा-दयमपि येन प्रमाणतो भजते ।
अंशधिया तु नयत्व-व्यपदेशस्तत्र तन्त्रविदाम् ॥ ७ ॥

कुमततमोपहतदृशो, जगतो भूतार्थबोधविमुखस्य ।
आदौ दर्शयति गुरु-र्निश्चयमतिदीपिकामथवा ॥ ८ ॥

निश्चयतो निश्चयभाग्, मत्त इव भिनत्ति यश्चरणमुद्राम् ।
तस्य पदे व्यवहारो, वज्रमयी शृङ्खला क्षेप्या ॥ ९ ॥

अव्यवहारिणि जीवे, निश्चयनयविषयसाधनं नास्ति ।
ऊषरदेशे कथमपि, न भवति खलु शस्यनिष्पत्तिः ॥ १० ॥

व्यवहारप्रतिभासो, दुर्नयकृद्बालिशस्य भवबीजम् ।
व्यवहाराचरणं पुन-रनभिनिविष्टस्य शिवबीजम् ॥ ११ ॥

गुरुपरतन्त्रस्यातो, माषतुषादेः पुमर्थसंसिद्धिः ।
स्फटिक इव पुष्परूपं, तत्र प्रतिफलति गुरुबोधः ॥ १२ ॥

व्यवहारवतस्तनुरपि, बोधः सितपक्षचन्द्र इव वृद्धिम् ।
इतरस्य याति हानिं, पृथुरपि शितिपक्षचन्द्र इव ॥ १३ ॥

अवगतसमयोपनिषद्-गुरुकुलवासः सतां सदा सेव्यः ।
आचारादौ निगदित-माद्यं व्यवहारबीजमिदम् ॥ १४ ॥

अस्मादेव हि चरणं, सिध्यति मार्गानुसारिभावेन ।
गुरुकुलवासत्यागे, नेयं भणिताऽकृतज्ञस्य ॥ १५ ॥

सामान्यधर्मतः खलु, कृतज्ञभावाद्विशिष्यते चरणम् ।
सामान्यविरहिणि पुन-र्न विशेषस्य स्थितिर्दृष्टा ॥ १६ ॥

तस्माद् गुरुकुलवासः, श्रयणीयश्चरणधनविवृद्धिकृते ।
गुरुरपि गुणवानेव, श्लाघ्यत्वमुपैति विमलधियाम् ॥ १७ ॥

प्रव्रज्यार्हगुणविधि-प्रव्रजितो गुरुकुलाश्रितो नित्यम् ।
अक्षतशीलः शान्त-स्तत्त्वज्ञोऽवगतसूत्रार्थः ॥ १८ ॥

प्रवचनवात्सल्ययुतः, सत्त्वहितरतोऽनुवर्त्तको धीरः ।
गुर्वनुमतपदनिष्ठो, धर्मकथाकृज्जनादेयः ॥ १९ ॥

अविषादी परलोके, स्थिरहस्तोपकरणोपशमलब्धिः ।
कलिदोषान्मूलगुणै-रेकादिगुणोज्झितोऽपि गुरुः ॥ २० ॥

प्रव्राज्य यो विनेयान्, शिक्षां ग्राहयति सम्यगनुवृत्तेः ।
स गुरुर्गुणमणिजलधिः, परः प्रतीपः प्रवचनस्य ॥ २१ ॥

उत्पन्नमार्यदेशे, जातिकुलविशुद्धमल्पकर्माणम् ।
कृशतरकषायहासं, कृतज्ञमविरुद्धकार्यकरम् ॥ २२ ॥

मरणनिमित्तं जन्म, श्रीश्चपला दुर्लभं च मनुजत्वम् ।
न परनिमित्तं निजसुख-मिति चिन्तोत्पन्नवैराग्यम् ॥ २३ ॥

कालपरिहाणिदोषा-न्निर्दिष्टैकादिगुणविहीनमपि ।
बहुगुणयुतमाचार्या, दीक्षायोग्यं जनं ब्रुवते ॥ २४ ॥

नानीदृशस्य हृदये, रमते जिनगीर्भवाभिनन्दितया ।
कुङ्कुमरागो वाससि, मलिने न कदापि परिणमते ॥ २५ ॥

गुणवानेव हि शिष्यो, लोकद्वयहितकरो गुरोर्भवति ।
इतरस्त्वार्त्तध्यानं, श्रद्धाभावात् प्रवर्द्धयति ॥ २६ ॥

वयसाष्टादिकवर्षोऽ-नवकल्पश्चार्हति व्रतादानम् ।
संस्तारकमुनिभावे, भजना त्ववकल्पविषये स्यात् ॥ २७ ॥

बाला न व्रतयोग्या, बाल्यात्सम्भावनीयदोषाच्च ।
योग्यास्तु भुक्तभोगा, एतत्त्रैविध्यवृद्धमतम् ॥ २८ ॥

तदपेशलं यतः खलु, बाल्यं नो चरणभावपरिपन्थि ।
कर्मक्षयोपशमजः, स हिनस्वदंशान्तराधीनः ॥ २९ ॥

नियमस्त्वतिबालानां, परिभवनीयत्वभावमान्द्याभ्याम् ।
बाला इव चेष्टन्ते, केचन गतयौवना अपि तु ॥ ३० ॥

अविवेकद्वारा खलु, यौवनमपकारि तत्त्वतस्तत् सः ।
तदभावस्तद्विगमः, स तु न जिनैर्वारितः क्वाऽपि ॥ ३१ ॥

तुल्यं च भुक्तभोगे-ष्वपि भुवि सम्भावनीयदोषत्वम् ।
प्रत्युत तेष्वधिकबलः, कामानां तद्भवाभ्यासः ॥ ३२ ॥

प्राप्ताणिमादिसञ्ज्ञात्, पुंसामनिवृत्तिबादरादारात् ।
वेदान्तमविद्याख्यं, न कर्मदोषो ह्यसम्भाव्यः ॥ ३३ ॥

नैतत्प्राप्तिः प्रायो, दीक्षाविकलेतिमन्ददोषेषु ।
अन्योन्याश्रयसङ्कट-मुक्तं नियमं विना न गुणाः ॥ ३४ ॥

अपि चान्तरालविघ्ना-शङ्कि प्रागेव तन्निवृत्त्यर्थम् ।
श्रुतमभ्यस्यन्नधिकं, कृतकृत्यो भवति बालयतिः ॥ ३५ ॥

न पुमर्थक्रमसेवा, त्वेतद्विषयव्यतिक्रमनिमित्तम् ।
यद्धर्म एव सुखदः, प्रतिपक्षावर्थकामौ तु ॥ ३६ ॥

ब्रुवतेऽन्ये प्राधान्यं, मन्दप्रज्ञा गृहाश्रमस्यैव ।
उपजीवन्ति यदेनं, सर्वेऽप्यन्नादिनाऽऽश्रमिणः ॥ ३७ ॥

तदसदुपजीवनातः, प्राधान्यं येन लाङ्गलादेः स्यात् ।
ज्ञानादिकृतं त्वेतद्, व्रतिनि दृढं नो गृहाश्रमिणि ॥ ३८ ॥

अन्ये त्वत्र जनस्य, स्वजनविरहितस्य योग्यतां ब्रुवते ।
तद्विलपनादि पापं, त्यागे खलु पालनीयस्य ॥ ३९ ॥

तदसदिहापि हि पापं, प्राणवधाद् यत्स पालनेऽभ्यधिकः ।
आरम्भतः स्वतत्त्वे, स्वपरविभागश्च नावगते ॥ ४० ॥

सत्त्वौघप्रव्रजतो-रारम्भत्यागसृष्टितातौल्यम् ।
अभ्युपगमवादोऽयं, न विधित्यागेऽल्पदोषोऽपि ॥ ४१ ॥

अन्ये त्वाहुः सुखिनां, प्रव्रज्या फलवती न चान्येषाम् ।
नात्यक्तभोगविभवाः, पात्रं गम्भीरभावस्य ॥ ४२ ॥

अधिकतरं प्रव्रज्या-पर्यायं प्राप्य ते हि माद्यन्ति ।
क्षुद्रप्रव्रज्यातो, लोके धर्मोपघातोऽपि ॥ ४३ ॥

एतदपि मुग्धविस्मय-करं न युक्तिक्षमं तु मतमुच्चैः ।
अविवेकपरित्यागात्, त्यागी यन्निश्चयनयस्य ॥ ४४ ॥

अविवेकपरित्यागात्, पालयति मुनिक्रियां स भावेन ।
संज्ञाभेदात् त्यक्त-ग्रहणं ह्यविवेकशक्तिकृतम् ॥ ४५ ॥

ध्वनिभेदेऽपि सपापं, प्रकृतेर्न तु हितं हि मधुरकादीव ।
सापेक्षस्य यतनया, तदनुमतिर्नैव विहितार्थे ॥ ४६ ॥

गुणधर्मानुपघातौ, निःस्वस्याप्यपगताविवेकस्य ।
सूत्रन्तु व्यवहारात्, युक्तो ह्युस्तत्र वाऽप्यर्थः ॥ ४७ ॥

प्रतिबन्धत्यागपरो, बाह्यत्यागेऽपि तेन युक्तमदः ।
जिनधर्मोन्नतिकारण-मुभयत्यागी तु धन्यतरः ॥ ४८ ॥

इक्षुवने जिनभवने, समवसृतौ क्षीरवृक्षवनखण्डे ।
गम्भीरसानुनादे, दीक्षा देया शुभे क्षेत्रे ॥ ४९ ॥

शून्ये गृहेऽमनोज्ञे, न तु भग्ने ध्यामिते स्मशाने वा ।
क्षाराङ्गारावकरा-मेध्यादिद्रव्यदुष्टे वा ॥ ५० ॥

षष्ठ्यां च चतुर्दश्यां, द्वादश्यामष्टमीनवम्योश्च ।
भेषु चतुर्थ्यां सन्ध्या-गतादिषु पञ्चदश्यां च ॥ ५१ ॥

तिसृषूत्तरासु कुर्याद्, रोहिण्यामपि च शिष्यनिष्क्रमणम् ।
आरोपणं व्रतानां, गणिवाचकयोरनुज्ञा च ॥ ५२ ॥

धर्मकथाक्षिप्तं खलु, पृच्छेत्कः कुत्र किं निमित्तमिति ।
कुलपुत्रादिग्राह्यो, भजना शेषेषु सूत्रविधेः ॥ ५३ ॥

कथयेदिह दीक्षाया-स्तं प्रति कापुरुषदुरनुचरतां च ।
आरम्भनिवृत्तानां, लोकद्वयसुखसमृद्धिं च ॥ ५४ ॥

आषण्मासीमुच्चै-रभ्युपगतमपि पुनः परीक्षेत ।
परिणामकमचिरादपि, दद्यादालापकं सुदिने ॥ ५५ ॥

पूजां ततः स कुर्यात्, देवगुरूणां विधेर्यथाविभवम् ।
चैत्यानि वामपार्श्व-स्थितशिष्यो वन्दते च गुरुः ॥ ५६ ॥

अस्खलितादिगुणयुतैः, सूत्रैः स्तुतिभिश्च वर्द्धमानाभिः ।
नो चेदसमाचारी, सूत्राज्ञाया व्यतिक्रमतः ॥ ५७ ॥

वन्दित्वा पुनरुत्थित-गुरुभ्य इह वन्दनं समं दत्वा ।
मामिच्छाकारेण, प्रव्राजयतेति भणति शिशुः ॥ ५८ ॥

इच्छामीति भणित्वा-भ्युत्थायाकृष्य पञ्चमङ्गलकम् ।
अर्पयति रजोहरणं, भगवत्कथितं गुरुर्लिङ्गम् ॥ ५९ ॥

अन्वर्था संज्ञेयं, कारणकार्योपचारतो भणिता ।
संयमयोगा यस्मा-दिह सर्वेऽप्येतदायत्ताः ॥ ६० ॥

इदमित्थमेव दृष्ट्वा, प्रमार्जने प्राणिनामनुपघातात् ।
आगाढव्युत्सर्ग-प्रभृते पुनरन्यथा दोषः ॥ ६१ ॥

संसर्जनादिदोषा, विधिपरिभोगे न सन्ति देहे इव ।
इत्थमपीहानास्था-दिक्पटनटनाटकं विषमम् ॥ ६२ ॥

इच्छाकारेणाऽस्मान्, मुण्डयतेत्यथ स भणति वन्दित्वा ।
'इच्छाम' इति भणित्वा, त्रिःप्रपठन् पञ्चमङ्गलकम् ॥ ६३ ॥

अष्टास्तिस्त्रोऽच्छिन्नां, गृह्णाति गुरुस्ततः स भणतीदम् ।
मम सामायिकमिच्छा-कारेणारोपयत यूयम् ॥ ६४ ॥

इच्छाम इति भणित्वा, सार्द्धं शिष्येण सूत्रमाकृष्य ।
कुरुते कायोत्सर्गं, गुरुस्तदारोपणनिमित्तम् ॥ ६५ ॥

उत्सार्य नमस्कारो-च्चारेणैतेन सह गुरुः सूत्रम् ।
पठति त्रिरथ च शिष्योऽ-प्यनुपठति विशुद्धपरिणामः ॥ ६६ ॥

वासानभिमन्त्र्य गुरु-स्ततश्च जिनसाधुपादयोर्दत्ते ।
दापयति ततः शिष्यं, वन्दनकं भणति वन्दित्वा ॥ ६७ ॥

सन्दिशत किं भणामी-त्येवं प्रवेदय गुरुश्च वन्दित्वा ।
इति भणति ततोर्द्धाऽऽनत-तनुः स भणतीदमुपयुक्तः ॥ ६८ ॥

युष्माभिः सामायिक-मारोपितकमनुशास्तिमिच्छामः ।
शीर्षे शिष्यस्यैवं, गुरुराह ददत्ततो वासान् ॥ ६९ ॥

वर्द्धस्व गुरुगुणैस्त्वं, निस्तारकपारगः प्रवेदितं किम् ।
तुभ्यं प्रवेदयामि स, भणति च सन्दिशत साधूनाम् ॥ ७० ॥

अन्ये तु जिनादीनां, वासान्ददतीह भणति वन्दित्वा ।
सूरिः प्रवेदयेति, प्रदक्षिणां शिष्यकः कुरुते ॥ ७१ ॥

सनमस्कारोच्चारं, वासानथ सूरिसाधवो ददति ।
कार्यस्त्रिवारमेवं, पुनरप्युत्सर्गमेके तु ॥ ७२ ॥

आचाम्ले नियमं, वदन्ति किल संश्रिता निजावलिकाम् ।
निपतति शिष्यः पदयोः, ततश्च जिनसाधुसूरीणाम् ॥ ७३ ॥

वन्दन्ते च तमन्ये, गुरुरप्युपदिशति धर्मसर्वस्वम् ।
शीले मोक्षनिदाने, प्राप्ते कार्यः प्रमादो नो ॥ ७४ ॥

व्यभिचारात् किमनेन, क्रियाकलापेन परमपदसिद्धौ ।
विरतौ सत्यां विफल-स्तदसत्त्वेऽयं मृषाभूमिः ॥ ७५ ॥

नैवं विरत्युपायः, प्रायो यदयं जिनोक्तलिङ्गविधिः ।
इत्थं क्रियापरिणताः, पर्यायं पालयन्ति बुधाः ॥ ७६ ॥

विरते सत्त्वेऽप्येत-न्न वृथाज्ञासङ्गतं क्रियान्तरवत् ।
विधिकारयितुः शुद्धाद्, भावादगुणो न तदभावे ॥ ७७ ॥

विषये युक्तोऽपि गुरो-र्विधिना प्रव्राजने गुणो भावात् ।
तदभावे परभावा-ज्ञातादिह तीर्थविच्छित्तिः ॥ ७८ ॥

न च गृहवासत्यागः, पापात् सङ्क्लेशलिङ्गकं यत्तत् ।
स च तत्र हन्त विपुल-स्तदभावे नाप्यसङ्गस्य ॥ ७९ ॥

गेहादौ सत्येष प्रसरति पापानुबन्धिनः पुण्यात् ।
सत्पापमेव पुण्या-नुबन्धि तत्त्यागिनां योगे ॥ ८० ॥

धर्मध्याननिमित्तं, परिशुद्धं तद्विरक्तसुखहेतुः ।
पुण्याशुभपरिणामा-नपायिनी वेदनाऽप्यत्र ॥ ८१ ॥

येन क्षुदादयः खलु, कर्मक्षयकारणानि भावयतेः ।
ज्वरिणामिह बाधन्ते, कटुकौषधपानमिव न मनः ॥ ८२ ॥

नैकान्तोऽप्यत्र तपो-नियमविधेर्वसतिरपि च शान्तानाम् ।
आत्मैवान्नादिविधौ, न च लोभ इतीह को दोषः ॥ ८३ ॥

शीतोदकाद्यभोगोऽ-प्यत्र न दानान्तरायकारणकः ।
किन्तु विपाककटुकतां, मत्वा तद्वर्जनं युक्तम् ॥ ८४ ॥

चारित्रविहीनाना-मज्ञानवतां तु येदृशी चेष्टा ।
अभिष्वङ्गैकपराणां, सा प्रतिषिद्धा जिनवरेन्द्रैः ॥ ८५ ॥

अविधिपरिपालनादे-र्यैर्मुषितं प्राणिनां तु धर्मधनम् ।
पापानुबन्धिपापात्, भाले तेषामसद्भिक्षा ॥ ८६ ॥

सद्ध्यानादेर्विरहे, गृहवासस्तत्त्वतोऽन्यथा दीक्षा ।
प्रव्राजकस्य न ततः, सद्वैद्यस्येव दोषोऽपि ॥ ८७ ॥

इत्थं प्रव्रजितः सन्, सूत्रोक्तां प्रतिदिनं क्रियां कुर्वन् ।
चारित्रे स समर्थो, मुनिव्रतस्थापनार्हः स्यात् ॥ ८८ ॥

अधिगतशस्त्रपरिज्ञा-सूत्रार्थोऽनुक्तवर्जको योग्यः ।
षट्कं स त्रिविशुद्धं, नवभिर्भेदैः परिहरेच्च ॥ ८९ ॥

अप्राप्तेऽर्थमकथय-न्ननभिगतार्थेऽपरीक्षिते यस्तु ।
स्थापयति व्रतभारं, प्राप्नोत्याज्ञाविरोधमसौ ॥ ९० ॥

शैक्षस्य भुवस्तिस्त्रः, सप्ताहोरात्रका जघन्याऽत्र ।
षण्मासिक्युत्कृष्टा, मध्यमिका स्याच्चतुर्मासा ॥ ९१ ॥

करणजयाय पुराणे, प्रथमा दुर्मेधसः प्रतीत्यान्या ।
अनधिगमादिविशेषे, शिष्टाभिज्ञे पुराणेऽपि ॥ ९२ ॥

एनां भुवमप्राप्तं, य उपस्थापयति तथा तथाऽऽसमपि ।
रागाद्वा द्वेषाद्वा, नोपस्थापयति स विरोधी ॥ ९३ ॥

पुत्रादेश्च विलम्बः, पित्रादिभ्यः स्मृतस्त्रिपञ्चाहः ।
अप्रज्ञाप्यतया नो, परतोपीष्टोऽबहुद्वेषे ॥ ९४ ॥

ईदृश्यपि समभावो, व्यवहारात् कर्मभेदतोऽशुद्धः ।
अतिचारात् सञ्ज्वलनै-राकर्षाद्वाऽन्यथोच्छेदः ॥ ९५ ॥

तद्विरहेऽपि च महतां, प्रकृत्यतिक्लेश कर्जनौचित्यम् ।
लोकविरुद्धत्यागा - च्छासनमानश्च विपुलफलः ॥ ९६ ॥

कायव्रतकथनविधौ, हेतुमुपदर्शयेद् यथा पृथिवी ।
मांसाङ्कुरसमरूपा-ङ्कुरोपलम्भेन जीवमयी ॥ ९७ ॥

भूखातस्वाभाविक-जनुषो दर्दुरकवज्जलं च तथा ।
व्योमोद्भवस्य पातात्, स्वभावतो मत्स्यवद्वापि ॥ ९८ ॥

आहारादनलोऽपि च, वृद्धिविकारोपलम्भतो व्यक्तम् ।
अपरप्रेरिततिर्य-ग्गतेः सचित्तश्च वायुरपि ॥ ९९ ॥

जन्मजरामृतिजीवन-रोहणरुग्दौहृदैस्तथाहारात् ।
रोगचिकित्सादिभ्यो, नार्य इव सचेतनास्तरवः ॥ १०० ॥

त्रसजीवत्वं व्यक्तं, तत्पालनतो व्रतानि मूलगुणाः ।
प्राणातिपातविरमण-मुख्याः षट् चरण तरु भूमौ ॥ १०१ ॥

एकेन्द्रियादितापन-सङ्घट्टनपीडनादिना प्रथमे ।
प्रचलाक्रोधादिभ्यः, सूक्ष्मोऽन्यश्च द्वितीये स्यात् ॥ १०२ ॥

क्रोधानाभोगादेः, सधर्मकाद्यप्रदत्तहरणे च ।
अस्तेये ब्रह्मण्यपि, करकर्मणि गुप्त्यरक्षायाम् ॥ १०३ ॥

अतिचारः पञ्चमके, सूक्ष्मः काकादिरक्षणाज्ज्ञेयः ।
कल्पाष्टके ममत्व-द्रव्यादिग्रहणतश्चान्यः ॥ १०४ ॥

ज्ञानाद्यनुपकृतिकृतो, धरणे वा वस्तुनोऽतिरिक्तस्य ।
षष्ठे च चतुर्भङ्गी, दिवागृहीतादिनिष्पन्ना ॥ १०५ ॥

उदकार्द्रादिपरीक्षां, कुर्यात् कथनोत्तरं च गीतार्थः ।
परिहरति नोदके वा, योग्यत्वमनीदृशे भजना ॥ १०६ ॥

कायोत्सर्गे योग्यो-पस्थापनचैत्यवन्दनादिविधौ ।
कृत्वा गुरवो वामे, पार्श्वे संस्थाप्य तं ददते ॥ १०७ ॥

एकैकं त्रीन् वारान्, व्रतमत्र स्थानविषयमिममाहुः ।
पट्टमुखवस्त्रकूर्पर-वामकरानामिकाग्रहणम् ॥ १०८ ॥

अपि हस्तिराजदन्तो-न्नतहस्ताभ्यां रजोहरणधरणम् ।
प्रादक्षिण्यं चाशिषि, गुरोरियं स्यात् परीक्षापि ॥ १०९ ॥

ईषदवनतभ्रमता-मभिसरणे वृद्धिरपसृतौ हानिः ।
साधूनां द्विविधा दिक्, साध्वीनां तिस्र एताः स्युः ॥ ११० ॥

आचाम्लादि तपः, शक्त्या तत्सप्तकं तु मण्डल्याः ।
उपवेशयेत् परिणतं; नो चेद् गुरोर्विराधकता ॥ १११ ॥

गुरुगच्छवसतिसङ्गा-हारोपकरणतपोविचारेषु ।
भावनविहारमुनिवर-कथासु यतते च परिणामी ॥ ११२ ॥

इभ्यो नृपमिव शिष्यः, सेवेत गुरुं ततो विनयवृद्ध्या ।
सद्दर्शनानुरागा-दपि शुद्धिर्गौतमस्येव ॥ ११३ ॥

गुरुसेवाभ्यासवतां, शुभानुबन्धो भवे परत्रापि ।
तत्परिवारो गच्छ-स्तद्वासे निर्ज्जरा विपुला ॥ ११४ ॥

स्मारणवारणनोदन-विनयकरणकारणादिनाऽत्याज्यः ।
विधिना तस्य तु विरहे-ऽच्छत्रमठच्छात्रतुल्यगुणः ॥ ११५ ॥

शिष्यः प्रतीच्छको वा-प्येकगणो वा न सद्गतिं दत्ते ।
ये तत्र बोधदर्शन-चरणगुणास्ते तु सुगतिफलाः ॥ ११६ ॥

ननु गुरुकुलवासवतां, गणवासध्रौव्यमस्ति चेत्सत्यम् ।
नीत्या तदैकलब्ध्या, तदुचितया वसति तद्धेतुः ॥ ११७ ॥

सेवेत शुद्धवसतिं, सङ्गमविज्ञैः समं कुशीलैश्च ।
परिवर्जयेद्विशुद्धं, गृह्णात्याहारमुपकरणम् ॥ ११८ ॥

सद्योगवृद्धिजनकं, सद्ध्यानसमन्वितं त्वनशनादि ।
कुर्यात्तपोऽपि यस्मा-दपैति चित्तमांसशोणितता ॥ ११९ ॥

तीर्थंकरज्ञातेन, क्षायोपशमिकमिदं च परिभाव्य ।
ध्यानोज्ज्वलं विदधतां, न मनाक् पीडापि विघ्नाय ॥ १२० ॥

भाव्यं पुनरर्थपदं, यथातिचारे तु हन्त ! सूक्ष्मेऽपि ।
स्त्रीत्वादि गुरुफलं चेत्, कथमधुना बकुशचारित्रम् ॥ १२१ ॥

इत्थं च युज्यतेऽदो, रोगचिकित्सातिचारवदिहापि ।
रौद्रविपाकेऽपि गतिः, प्रतीत्य विपरीतभावततीः ॥ १२२ ॥

नालोचनादिमात्रं, ब्राह्म्यादेरपि हि येन तद्भावः ।
सप्रतिकारविषोपम-मसुखाय न सातिचारमदः ॥ १२३ ॥

इत्थं विचारतः स्यात्, संवेगातिशयतश्चरणवृद्धिः ।
दुष्टान्यथा प्रवृत्तिः, सम्मूर्छनजप्रवृत्त्याभा ॥ १२४ ॥

इत्थं यतमानोऽपि, स्त्रीरागेणाभिबाध्यते स यदा ।
भावयति तदा सम्यक्, विषयस्त्रीसङ्गवैषम्यम् ॥ १२५ ॥

मासादिविहारेण च, विहरेदादिस्तु वक्ति कार्येण ।
न्यूनत्वादिविहार-ध्रौव्यं त्विह मोहशान्त्यर्थम् ॥ १२६ ॥

नित्यवसतिरपि परिणत-गुर्वादीनां तु कारणेन स्यात् ।
द्रव्यत एव न भावा-दागमयतना विशुद्धधियाम् ॥ १२७ ॥

स्वाध्यायादिश्रान्तः, कुर्याच्च कथां दशार्णभद्रादेः ।
विश्रोतसिकारहितः, स्वपरस्थिरताकरीं नित्यम् ॥ १२८ ॥

नोपस्थापनयैव हि, चरणं यद्द्रव्यतोऽप्यभव्ये सा ।
प्रायस्तयानुभावा-देतद्विधिनेदमिति तत्त्वम् ॥ १२९ ॥

व्रतसम्पन्नाश्चैवं, कालेन गृहीतसकलसूत्रार्थाः ।
अनुयोगानुज्ञाया, योग्या भणिता जिनवरेन्द्रैः ॥ १३० ॥

भाषा मृषान्यथा तु, प्रवचननिन्दा च शिष्यगुणहानिः ।
तीर्थोच्छेदश्चेति, स्वल्पाध्ययने न योग्यत्वम् ॥ १३१ ॥

कालोचितसूत्रार्थे, तस्मात्सुविनिश्चितस्य युक्तोऽयं ।
श्रवणादेव न यदियं, 'संम्मत्यां' सिद्धसेनोक्तिः ॥ १३२ ॥

''जह जह बहुस्सुओ सम्मओ अ सीसगणसंपरिवुडो अ ।
अविणिच्छिओ अ समए, तह तह सिद्धंतपडिणीओ ॥ १३३ ॥

अविनिश्चितो हि न भवे-दपवादोत्सर्गविषयवित्सम्यक् ।
अविषयदेशनया च, स्वपरविनाशी स नियमेन ॥ १३४ ॥

अनुयोगविधिश्चायं, सुतिथौ गुरुरुपविशेन्निषद्यायाम् ।
रचितायां कथितायां, पुरतः शिष्यो यथाजातः ॥ १३५ ॥

उपकरणत उपयुक्त-स्ततो गुरुः प्रत्युपेक्षते विधिना ।
मुखवस्त्रिकां सशिष्यः, सशिरःकायं तया चापि ॥ १३६ ॥

आवर्तैर्द्वादशभि-र्वन्दनदानेन भणति शिष्योऽथ ।
सन्दिशत स्वाध्यायं, स्वस्थाः प्रस्थापयाम इति ॥ १३७ ॥

प्रस्थापयेत्यनुमते, प्रस्थापयतो ह्येतौ ततश्च गुरुः ।
तिष्ठेन्निवेदितेऽस्मिन्, प्रस्थापयतोऽनुयोगं द्वौ ॥ १३८ ॥

अनुयोगं गुरुणाथो, शिष्योऽनुज्ञापयेच्च वन्दित्वा ।
अभिमन्त्र्याक्षान् देवान्, वन्देत गुरुस्ततो विधिना ॥ १३९ ॥

सनमस्कारं नन्दी-माकर्षयति स्थितोऽथ परिपूर्णाम् ।
शिष्यः शृणोति भावा-न्नन्दीमाकृष्य भणति गुरुः ॥ १४० ॥

अनुयोगमस्य साधोः, क्षमाश्रमणहस्ततोऽहमनुजाने ।
पर्यायद्रव्यगुणैः, सोऽनुज्ञातोऽथ वन्दित्वा ॥ १४१ ॥

सन्दिशत किं भणामी-त्यादि प्राग्वद्वदेदिह विशेषः ।
अधिकाशीरन्येषां, धारय सम्यक्प्रवेदय च ॥ १४२ ॥

गुरुरुपविशति कृतत्रि-प्रदक्षिणे शिष्यके तनूत्सर्गे ।
विहिते चानुज्ञार्थे, सनिषद्यगुरुं प्रदक्षिणयेत् ॥ १४३ ॥

तत उपविष्टस्य गुरु-स्त्रीन् वारान् स्वान्तिके सुशिष्यस्य ।
कथयति मन्त्रपदानि, स्वपरम्परयाऽऽगतान्येव ॥ १४४ ॥

दत्ते सुगन्धमुष्टी-स्त्रीनक्षाणां प्रवर्द्धमानांश्च ।
तद्ग्राहिणं च शिष्यं, स्वनिषद्यायां निवेशयति ॥ १४५ ॥

तं वन्दतेऽथ समुनि-र्गुरुः स्वशक्त्या स देशनां दत्ते ।
तुल्यगुणदीपनार्थं, नैतद् दुष्टं द्वयोरपि हि ॥ १४६ ॥

प्रणमन्ति ततो मुनयो, गुरुस्ततः स्वासनस्थितस्तस्य ।
कुरुते गुणप्रशंसा-मन्ये तु प्रथममेवाहुः ॥ १४७ ॥

अयमनुयोगी प्राज्ञः, प्रवचनकार्येषु नित्यमुद्युक्तः ।
योग्येभ्यो व्याख्यानं, दद्यात्सिद्धान्तविधिनैव ॥ १४८ ॥

मध्यस्था बुद्धियुताः, प्राप्ता धर्मार्थिनश्च योग्याः स्युः ।
इह मार्जनादिपूर्वं, विषयप्रज्ञापना च विधिः ॥ १४९ ॥

व्याचक्षीत समभावं, श्रोतुः परिभाव्य योग्यताभेदम् ।
अपि दृष्टिवादभेदं, निर्व्यूढं वा ततः सूत्रम् ॥ १५० ॥

सम्यग्धर्मविशेषो, यत्र कषच्छेदतापपरिशुद्धः ।
कथितस्तन्निर्व्यूढं, वरश्रुतं स्तवपरिज्ञादि ॥ १५१ ॥

प्राणवधप्रभृतीनां, प्रतिषेधः पापकारणानां यः ।
ध्यानाध्ययनादीनां, यश्च विधिः स खलु धर्मकषः ॥ १५२ ॥

बाह्यानुष्ठानेन, द्वयं न बाध्येत यत्र नियमेन ।
सम्भवति च परिशुद्धं, स पुनर्धर्मे स्मृतश्छेदः ॥ १५३ ॥

जीवादिभाववादो, बन्धादिप्रसाधकश्च तापोऽत्र ।
एतैः खलु परिशुद्धो, धर्मो धर्म्मत्वमुपयाति ॥ १५४ ॥

कल्याणान्यत्र स्युः, पुंसः सम्प्राप्तमोक्षबीजस्य ।
सुरमनुजेशसुखानि, प्रतिपूर्णसुखानुबन्धीनि ॥ १५५ ॥

भूतार्थश्रद्धानं, सम्यक्त्वं मोक्षबीजमत्राहुः ।
भूतार्थवाचकात्त-च्छ्रुतात्तदाप्तस्य वचनं तु ॥ १५६ ॥

ननु तदपि ततो न स्या-द्व्यभिचारस्योपलम्भतो व्यक्तम् ।
यदनन्तशः श्रुताप्तिः, श्रुते श्रुता द्रव्यलिङ्गवताम् ॥ १५७ ॥

सत्यं तत्प्राप्तावपि, वीर्यं नोल्लसितमेव जीवस्य ।
हेतुश्च तदुल्लासे, प्रायः श्रुतमेव को दोषः ? ॥ १५८ ॥

असकृदपि क्षाराद्यैः, प्राप्तैरप्राप्तवेधपरिणामः ।
वेधं शुद्धिं च यथा, जात्यमणिर्याति तैरेव ॥ १५९ ॥

अकलितवीर्योल्लास-स्तथा श्रुतादप्यनन्तशः प्राप्तात् ।
लभते वीर्योल्लासं, भव्यः शुद्धिं च तत एव ॥ १६० ॥

अस्यैव हि स्वभावो, यदतीतेषु श्रुतादियोगेषु ।
लभते वीर्योल्लासं, भव्यः शुद्धिं च बुद्धिं च ॥ १६१ ॥

नैवं स्वभाववादः, स्याद्वादेऽन्तरभवंश्च दोषाय ।
सहकारिवशाच्चित्रं, भव्यत्वं च स्वभावोऽत्र ॥ १६२ ॥

तदचित्रत्वे सिद्धेः कालादिभिदा कदापि न घटेत ।
कर्मादिभिरपि तदुप-क्रमे च तच्चित्रताबीजम् ॥ १६३ ॥

नो चेदभव्यजीव-स्वभावमपि तानि किं न विजयेरन् ।
तद्व्यापाराभावे-प्यस्मिन्नन्विष्यतां बीजम् ॥ १६४ ॥

तत्रैव तानि किञ्चित्, फलमथ जनयन्ति नापरत्रेति ।
न तु तेष्विव स्वभावो, भिदां व्रजेदाश्रयेऽप्येवम् ॥ १६५ ॥

विनिगमकाभावादपि, हेतूनामिति फले मिथोऽपेक्षा ।
इत्थमभिप्रेत्यैतत्, 'सम्मत्यां' निजगदे सुधिया ॥ १६६ ॥

'कालो सहाव णियई, पुव्वकयं पुरिसकारणेगंता ।
मिच्छत्तं ते चेव उ, समासओ होंति सम्मत्तं" ॥ १६७ ॥

तदपि न चित्रत्वं चे-दनेकजननैकस्वभावत्वात् ।
क्षणिकसमर्थात् स्वफलो-पनतेरपि च प्रतिव्यक्तिः ॥ १६८ ॥

नैवं नामान्तरतः, स्याद्वादोपगमपर्यवसितत्वात् ।
एकान्तस्याघटनात्, विकल्पतः कात्स्न्यदेशाभ्याम् ॥ १६९ ॥

तस्यैव तथा भवने, नो हातुं पार्यतेऽन्वयोर्थानाम् ।
व्यतिरेकोऽपि क्रमिक-स्वकार्ययोगादितीयं दिक् ॥ १७० ॥

स्याद्वादादित्थमयं, वीर्योल्लासं क्रमात् समासाद्य ।
सम्यक्त्वं द्रव्याख्यं, भावं चरणं च शिवमेति ॥ १७१ ॥

द्रव्याख्यं सम्यक्त्वं, जिनवचनं तत्त्वमिति रुचिः परमा ।
भूतार्थबोधशक्त्या, परिणमते भावसम्यक्त्वम् ॥ १७२ ॥

अज्ञातगुणे सम्यग्, या श्रद्धा भवति सुन्दरे रत्ने ।
हन्त ततोऽनन्तगुणा, विज्ञातगुणे पुनस्तस्मिन् ॥ १७३ ॥

प्रशमादिलिङ्गजनकं, शिवबीजं तेन भावसम्यक्त्वं ।
श्रुतधर्मस्तद्धेतुः, परीक्षणीयस्ततो यत्नात् ॥ १७४ ॥

सूक्ष्मोऽस्त्यशेषविषयः, सावद्ये यत्र कर्मणि निषेधः ।
रागादिकुट्टनसहं, ध्यानं च स नाम कषशुद्धः ॥ १७५ ॥

नो कार्या परपीडा, यथाऽत्र मनसा गिरा च वपुषा च ।
ध्यातव्यं च नितान्तं, रागादिविपक्षजालं तु ॥ १७६ ॥

स्थूलो न सर्वविषयः, सावद्ये यत्र कर्मणि निषेधः ।
रागादिकुट्टनसहं, न ध्यानाद्येष तदशुद्धः ॥ १७७ ॥

बहुभिः पञ्चभिरेका, हिंसाऽत्र यथा मृषा विसंवादे ।
ध्यानेन ध्यातव्यं, तत्त्वमकारादिकं चेति ॥ १७८ ॥

**यदन्यैरुक्तम्-**

**"अनस्थिमतां शकटभरेणैको घातः"**

तथा-"प्राणी प्राणिज्ञानं, घातकचित्तं च तद्गता चेष्टा ।
प्राणैश्च विप्रयोगः, पञ्चभिरापद्यते हिंसा ॥" ॥ १७९ ॥

तथा-"असन्तोऽपि स्वका दोषाः, पापशुद्ध्यर्थमीरिताः ।
न मृषायै विसंवाद-विरहात्तस्य कस्यचित् ॥" ॥ १८० ॥

तथा-"ब्रह्मोकारोऽत्र विज्ञेयः, अकारो विष्णुरुच्यते ।
महेश्वरो मकारस्तु, त्रयमेकत्र तत्त्वतः ॥ १८१ ॥

[अन्यत्र-"अकारो विष्णुरुद्दिष्ट, उकारस्तु महेश्वरः ।
मकारेणोच्यते ब्रह्मा, प्रणवेन त्रयो मताः ॥ १ ॥" एवमपि दृश्यते]

नित्योद्युक्ततया या, संयमयोगेषु विविधभेदेषु ।
वृत्तिर्धार्मिकसाधो-स्तद्बाह्यं स्यादनुष्ठानम् ॥ १८२ ॥

एतेन विधिनिषेधौ, बाध्येते यत्र नैव नियमेन ।
सम्भवतः परिशुद्धौ ब्रुवते तं छेदपरिशुद्धम् ॥ १८३ ॥

समितिषु पञ्चसु च यथा, तिसृषु च गुप्तिषु सदाऽप्रमत्तेन ।
विधिना यतिना कार्यं, कर्त्तव्यं कायिकाद्यपि हि ॥ १८४ ॥

अपि च प्रमादजनका-स्त्याज्या वासादयः परम्परया ।
मधुकरवृत्त्या भिक्षा-लब्ध्याऽऽत्मा पालनीयश्च ॥ १८५ ॥

यत्र प्रमादयोगात्, संयमयोगेषु विविधभेदेषु ।
नो धार्मिकप्रवृत्ति-र्ब्रुवते खलु तदननुष्ठानम् ॥ १८६ ॥

एतेन यत्र बाध्यौ, वर्तेते नैव विधिनिषेधौ च ।
छेदेनापरिशुद्धं, तं ग्रन्थं प्राहुराचार्याः ॥ १८७ ॥

सङ्गीतकादिकार्ये, देवानामुद्यमो यथा नु यतेः ।
अपि चान्यधार्मिकाणा-मुच्छेदोऽसभ्यवचनं च ॥ १८८ ॥

यदन्यैरुक्तम्-"सङ्गीतकेन देवस्य, प्रीती रावणवाद्यतः ।
तत्प्रीत्यर्थमतो यत्न-स्तत्र कार्यो विशेषतः ॥" ॥ १८९ ॥

तथा-"अन्यधर्मस्थिताः सत्त्वा, असुरा इव विष्णुना ।
उच्छेदनीयास्तेषां हि , वधे दोषो न विद्यते ॥" ॥ १९० ॥

**तथा -**

**'ब्रह्मघातकोऽहम्' इत्यादिवचनात् तद्वेदनीयकर्मक्षय इति ॥**

जीवादिभाववादो, दृष्टेष्टाभ्यां न यः खलु विरुद्धः ।
तापविशुद्धः सोऽन्यो, द्वाभ्यामपि नैव शुद्धः स्यात् ॥ १९१ ॥

इह सदसदादिरूपे, जीवे बन्धादि युज्यते सर्वम् ।
नानीदृशे तु किञ्चित्, वरश्रुतं शुद्धमित्थं तत् ॥ १९२ ॥

मुख्योपचाररूप:, स्तवो द्विधा द्रव्यभावतो यत्र ।
वर्ण्यत उचितक्रमत:, सा कथिता स्तवपरिज्ञेति ॥ १९३ ॥

भावस्तवो यतीनां, क्रियाकलाप: स्मृतो निरतिचार: ।
जिनभवनविधानादि, द्रव्यस्तव एव विधिशुद्धम् ॥ १९४ ॥

द्रव्यस्तवभावस्तव-रूपं ह्यन्योन्यसमनुविद्धं तत्तु ।
गृहिणोऽपि भावयोगो, भगवद्गुणरागतो भूयान् ॥ १९५ ॥

द्रव्यस्तवश्च साधो-रप्यनुमोदनकृतो न नास्तीति ।
विहित: कायोत्सर्ग:, सूत्रे यद्वन्दनाद्यर्थ: ॥ १९६ ॥

बल्यादि समवसरणे, न च यत् प्रतिषिद्धमर्हता जातु ।
तस्मात् सोऽनुज्ञातो, योग्यानां गम्यते न्यायात् ॥ १९७ ॥

अनुजानीते नार्हन् योगं मोक्षविगुणं कदाचिदपि ।
तदनुगुणोऽयं न पुन-र्नान्येषां बहुमतो भवति ॥ १९८ ॥

भावस्य योऽपि लेश:, स बहुमतो भगवता गुणज्ञेन ।
द्रव्यस्तवेन न विना, स इत्यसावर्थतस्तादृक् ॥ १९९ ॥

कार्यं खल्वभिलषता-ऽनन्तरमपि कारणं समभिलषितम् ।
आहारजतृप्तिमिवा-ऽभिवाञ्छता नूनमाहार: ॥ २०० ॥

जिनभवनकारणाद्यपि, भरतादीनां न वारितं तेन ।
तेषां यथैव कामा:, शल्यविषादिभिरुदाहरणै: ॥ २०१ ॥

अनुमतमिदमपि तस्मा-दप्रतिषेधेन तान्त्रिकन्यायात् ।
शेषाणामप्येवं, सङ्गतमस्याऽनुमत्यादि ॥ २०२ ॥

यश्च चतुर्धा विनयो, भणितस्तत्रौपचारिको यश्च ।
स हि तीर्थकरे नियमात्, न भवेद् द्रव्यस्तवादन्य: ॥ २०३ ॥

सूत्रे हि पूजनादे-रेतत्सम्पादनार्थमुच्चारः ।
नो चेदनर्थकत्वं, साक्षात्तु न भावसारेऽसौ ॥ २०४ ॥

साक्षादपि गृहिणां पुन-रयमुचितो भावकारणत्वेन ।
आकर्ण्यते यतीनां, कारणमपि देशना चात्र ॥ २०५ ॥

नन्वेवं हिंसाऽपि हि, धर्माय न दुष्यतीति सम्प्राप्तम् ।
एवं च वेदविहिता, हिंसाऽनिष्टेति को मोहः ॥ २०६ ॥

इह समता पीडायाः, परिणामसुखस्य चापि हिंस्यानाम् ।
अपि पापपुण्यजनने, व्यभिचारो वैद्यजाराभ्याम् ॥ २०७ ॥

स्यात्तत्र शुभो भावो, नन्वयमितरत्र तुल्यतामेति ।
एकेन्द्रियादिभेदा-न्न विशेषः कोऽपि विहितविधेः ॥ २०८ ॥

एतदपि न युक्तिसहं, वाङ्मात्रस्याप्रयोजकत्वेन ।
संसारमोचकाना-मपि धर्मः स्यादपरथा तु ॥ २०९ ॥

एकस्य न सम्यक्त्वे, विनिगमनालोकतो विगानाच्च ।
स्तोकस्यापि विगाने, व्यभिचाराद्देशभेदेन ॥ २१० ॥

अविगानमपि बहूनां, मूढेतरभावतो न विनिगमकम् ।
नीरागश्च न कश्चिद्, भवेदसर्वज्ञवादिमते ॥ २११ ॥

म्लेच्छानामप्येवं, वाङ्मात्राद्धर्म्मदुष्टता न स्यात् ।
द्विजवरमपि घातयतां, पुरतो ननु चण्डिकादीनाम् ॥ २१२ ॥

अन्यतरारूढत्वं, सममुभयत्राप्यसंस्कृतत्वं च ।
उत्सन्नशाखवेदा-शङ्कापि निवर्तते नेह ॥ २१३ ॥

तस्मान्न वचनमात्रं, प्रवृत्तिहेतुर्भवेद् बुधजनानाम् ।
किन्तु तथा दृष्टेष्टा-विरोधितत्सम्भवद्रूपम् ॥ २१४ ॥

द्रव्यस्तवाद् यथोच्चै-र्भावापत्कल्पगुणयुताच्छ्रेयान् ।
जिनभवनकारणादे-रुपकारः पीडयाऽपीह ॥ २१५ ॥

सर्वत्र सदाभावे, भावापदि भगवतां हि जीवानाम् ।
तन्निस्तरणसमर्थं, नियमेनायतनमेतेषाम् ॥ २१६ ॥

पुरुषोत्तमप्रतिष्ठा, साधुनिवासश्च देशना ध्यानम् ।
एकैकं भावाप-न्निस्तरणगुणं हि भव्यानाम् ॥ २१७ ॥

इत्थं पृथ्व्यादीनां, पीडाकृदपीह सङ्गता हिंसा ।
अन्येषां गुणसाधन-योगात् प्रत्यक्षसंसिद्धात् ॥ २१८ ॥

आरम्भवतश्चासा-वारम्भान्तरनिवृत्तिदा प्रायः ।
इत्थं निदानरहिता, कथिता निःश्रेयसफलाय ॥ २१९ ॥

व्यवहारवचनमेत-न्निश्चयतो नैव बन्धनोपायः ।
मोक्षोपायः कथमपि, परस्परविरुद्धभावेन ॥ २२०॥

शुद्धेतरपरिणामौ, निश्चयतो मोक्षबन्धनोपायौ ।
अत्याज्यसन्निधानाः, परपरिणामा उदासीनाः ॥ २२१ ॥

सम्यक्त्वचरित्रे यत्, तीर्थकराहारबन्धके तूक्ते ।
नो योगकषायाणां, व्याप्त्या वैशिष्ट्यमात्रेण ॥ २२२ ॥

तदिह यदंशे सम्यग्, गुणप्रकर्षो न तेन बन्धोऽस्ति ।
अविरत्यंशेनासा-वविशिष्टो निष्फला हिंसा ॥ २२३ ॥

भक्त्या च व्यवहारः, सान्निध्यात्स्याद्यथा घृतं दहति ।
इत्थं च कल्प्यहिंसा, गुणयोगान्मोक्षफलदोक्ता ॥ २२४ ॥

तस्मान्नाधर्मोऽस्यां, वैद्यज्ञातेन भवति गुणभावात् ।
आपत्सु गुणतदऽन्या-निवृत्तितो वैदिकी नैवम् ॥ २२५ ॥

भूत्यादिफलोद्देश-प्रवृत्तितो मोक्षसाधिका नापि ।
मोक्षफलं च सुवचनं, शिष्टं त्वर्थादिवचनसमम् ॥ २२६ ॥

'अग्निर्मामेतस्मान्, मुञ्चत्वेनस' इति श्रुतिश्चेह ।
'अन्धे तमसी' त्यादि-स्मृतिरपि सूचयति दुष्टत्वम् ॥ २२७ ॥

मानाभावात्कल्प्यं, नात्रान्यार्थत्वमपि च बुद्धिमता ।
प्रकृते च न प्रवचने, श्रूयन्ते पापवचनानि ॥ २२८ ॥

अनुपन्यस्यमनिष्टे, परिणामसुखं च हिंस्यमानानाम् ।
दृष्टेष्टविरुद्धार्था-च्छुभभावो म्लेच्छभावसमः ॥ २२९ ॥

एकेन्द्रियादिभेदो-ऽप्यविशेषक्षेपकृत्तवापि स्यात् ।
शूद्रसहस्रेऽपि हते, यन्न मता ब्रह्महत्येति ॥ २३० ॥

यतनातोऽल्पेयमपि, ध्रुवं च सा सर्वधर्मसर्वस्वम् ।
परिणतजलदलशुद्ध्या, सा च महार्थव्ययादत्र ॥ २३१ ॥

इत्थं खलु निर्दोषं, शिल्पादिविधानमपि जिनेन्द्रस्य ।
दुष्टमपि लेशतः सद्, बहुदोषनिवारकत्वेन ॥ २३२ ॥

वरबोधिलाभतोऽसौ, सर्वोत्तमपुण्यसंयुतो भगवान् ।
एकान्तपरहितरतो, विशुद्धयोगो महासत्त्वः ॥ २३३ ॥

यद्बहुगुणं प्रजानां, तज् ज्ञात्वा खलु तथैव दर्शयति ।
तत्तद्रक्षणकर्त्तु-र्यथोचितं को भवेद्दोषः ॥ २३४ ॥

अंशस्तत्र शुभतरो, बहुदोषनिवारणेह विश्वगुरोः ।
नागादेराकर्षण-दोषेऽपि यथेह शुभयोगः ॥ २३५ ॥

एवं निवृत्तिसारा, हिंसेयं तत्त्वतस्तु विज्ञेया ।
यतनाविधिशुद्धिमतः, पूजादिगतापि च तथैव ॥ २३६ ॥

अनुपकृता अपि पूज्या-श्चिन्तामणिवत्फलं प्रयच्छन्ति ।
अधिकनिवृत्तिश्चास्यां, भावेनाधिकरणत्यागात् ॥ २३७ ॥

तद् गुणकृदियं हिंसा, सर्वज्ञगिरां च सम्भवद्रूपा ।
निश्चिततदुक्तसमया-गतात्सुधीसम्प्रदायाच्च ॥ २३८ ॥

वेदवचनं च नैवं, न पौरुषेयं मतं यतस्तद्धि ।
इदमत्यन्तविरुद्धं, 'वचनं चापौरुषेयं च' ॥ २३९ ॥

क्वचिदपि न श्रुतमुच्चैः, पुरुषव्यापारविरहितं वचनम् ।
श्रवणेऽपि च नाशङ्का, विलीयते दृश्यकर्तृगता ॥ २४० ॥

वेदे किं वर्णानां, लोके दृष्टं न पौरुषेयत्वम् ।
अपि तत्प्रकाशशक्ते-रनिश्चयान्निश्चयो न ततः ॥ २४१ ॥

नेयन्नृमात्रगम्या, तदतिशयो बहुमतो न युष्माकम् ।
लौकिकवाग्भ्यो दृष्टं, कथञ्चिदत्रापि वैधर्म्यम् ॥ २४२ ॥

समयभिदया न च स्व-प्रकाशकत्वं विनार्थनियमं च ।
इन्दीवरे हि दीपः, शोणत्वमसत् प्रकाशयति ॥ २४३ ॥

मूलच्छेदाद्बोधो, नवा सुधीसम्प्रदायतोऽप्यत्र ।
अन्धेनान्धानयन-प्रायो गुरुशिष्यबोधो यत् ॥ २४४ ॥

अस्माकं च न दोषः, सर्वज्ञे वचनपूर्वकेऽपि सति ।
बीजाङ्कुरवदनादे-र्नियमादर्थाश्रिताद्ऽभावात् ॥ २४५ ॥

हिंसादोषादि न तत्, सर्वत्रास्मिन्नसम्भवद्रूपे ।
नहि रत्नगुणोऽरत्ने, नास्थाने तत्र यः स्थाप्यः ॥ २४६ ॥

भूतवधं खलु वेदो, निषिध्य तं नियमयन्फलोद्देशात् ।
फलभावेऽप्युत्सर्ग-त्यागे दोषं निवेदयति ॥ २४७ ॥

यद्वैद्यके निषिद्धो, दाहो व्याधिक्षयार्थमपि विहितः ।
ओघनिषेधोक्तं नो, दुःखकरत्वं प्रतिक्षिपति ॥ २४८ ॥

किमिह प्रसक्तकथया, भावद्रव्यस्तवावुचितनीत्या ।
अन्योन्यसमनुविद्धौ, भवता नियमेन मन्तव्यौ ॥ २४९ ॥

द्रव्यस्तवोऽल्पशक्ते-र्भावस्तव एव भवति गुरुशक्तेः ।
पलशतभरासमर्थो, नहि वोढुं पर्वतं सहते ॥ २५० ॥

यदतश्चरित्रयोग्यो, बाह्यत्यागक्रमेण भवति बुधः ।
क्रमकथनतोऽपि धर्मे, चतुर्विधे हेतुफलभावात् ॥ २५१ ॥

यः सद्बाह्यमनित्यं, दानं दत्ते न शक्तिमान् लुब्धः ।
दुर्द्धरतरं कथमयं, बिभर्त्ति शीलव्रतं क्लीबः ॥ २५२ ॥

नाशीलः शुद्धतपः, कर्त्तुं सहते न मोहपरतन्त्रः ।
शक्त्या तपोऽप्यकुर्वन्, भावयति सुभावनाजालम् ॥ २५३ ॥

द्रव्यस्तवोऽत्र दानं, शेषा भावस्तवाः सुपरिशुद्धाः ।
सङ्क्षिप्तेयं सूत्रे, विस्तरतः स्तवपरिज्ञा तु ॥ २५४ ॥

एवंविधमन्यदपि, ज्ञानपरिज्ञादि वाचयति धीरः ।
ज्ञात्वा स्वशिष्यसम्पद-मुद्युक्तः प्रवचनहितेऽसौ ॥ २५५ ॥

अस्यैव परानुज्ञा, क्रियते गुणिनः कदाचिदन्यस्य ।
उदयति सहृदयमुख्याद्, यस्माज्जिनशासनश्लाघा ॥ २५६ ॥

सूत्रार्थे निष्णातः, प्रियदृढधर्माऽनुवर्त्तनाकुशलः ।
गम्भीरो लब्धिनिधिः, कृतकरणः शुद्धजातिकुलः ॥ २५७ ॥

प्रवचनदृढानुरागः, सोपग्रहसङ्ग्रहः स्थिरप्रकृतिः ।
पुरुषोत्तम इह गच्छ-स्वामी भणितो जिनवरेन्द्रैः ॥ २५८ ॥

गीतार्था कृतकरणा, कुलजा परिणामिनी च गम्भीरा ।
चिरदीक्षिता च वृद्धा, प्रवर्तिनी संयती भणिता ॥ २५९ ॥

व्यूढो गणधरशब्दो, गौतममुख्यैः स्वयं पुरुषसिंहैः ।
यस्तमपात्रे धत्ते, जानानोऽसौ महापापः ॥ २६० ॥

कालोचितगुणरहिते, स्वस्मिन् यः स्थापितं च तं शब्दम् ।
अनुपालयति न सम्यग्, विशुद्धभावः स्वशक्त्यापि ॥ २६१ ॥

शब्दः प्रवर्त्तिनीति, व्यूढो यश्चार्यचन्दनाद्याभिः ।
यस्तमपात्रे धत्ते, जानानोऽसौ महापापः ॥ २६२ ॥

कालोचितगुणरहिता, या स्वस्यां स्थापितं च तं शब्दम् ।
अनुपालयति न सम्यग्, विशुद्धभावा स्वशक्त्यापि ॥ २६३ ॥

पददानेऽयोग्यानां, गुरुतरगुणमलनया परित्यक्ताः ।
शिष्या भवन्ति नियमा-दाज्ञाकोपेन चात्मापि ॥ २६४ ॥

तस्मात्तीर्थकराज्ञा-राधननिरतो यथोक्तगुणपात्रे ।
गीतार्थो निश्चित्य, प्रवर्त्तिनीगणिपदे दत्ते ॥ २६५ ॥

दीक्षावयसोः प्राप्तो, धृतिमान् पिण्डैषणादिविज्ञाता ।
पीठादिधरः प्रोक्तः, स्वलब्धियोग्योऽनुवृत्तिपरः ॥ २६६ ॥

अयमपि सार्द्धं गुरुणा, पृथगथ गुरुदत्तयोग्यपरिवारः ।
विहरति तदभावे वा, विधिनैव समाप्तकल्पेन ॥ २६७ ॥

जातोऽजातश्च मतो, गीतार्थेतरकृतो द्विधा कल्पः ।
पञ्चकतदूनभावात्, समाप्ततद्व्यत्ययविभिन्नः ॥ २६८ ॥

ऋतुबद्धे, वर्षासु च, सप्त संमाप्तस्तदूनकस्त्वितरः ।
असमाप्ताजातानां, भवति हि नाभाव्यमोघेन ॥ २६९ ॥

भवति समाप्ते कल्पे, कृतेऽपि चान्योऽन्यसङ्गतानां हि ।
गीतार्थसमेताना-मुभयेषां तद् यथासमयम् ॥ २७० ॥

संयत्यपि गुणपङ्क्त्या, याऽभ्यधिका भवति शेषसाध्वीभ्यः ।
श्रुतदीक्षादिपरिणता, स्वलब्धियोग्या भवेदेषा ॥ २७१ ॥

आसां नहि स्वलब्धिः, सर्वं यद् गुरुपरीक्षितं प्रायः ।
भवति च लघुत्वमाहुः, केचिदितीदं न युक्तिसहम् ॥ २७२ ॥

कालाचरणाभ्यां यत्, स्वलब्धिरुचिते लघुत्वमपि विषये ।
जातसमाप्तविभाषा, तासामपि सूत्रतो मृग्या ॥ २७३ ॥

अत्रानुज्ञार्थविधौ, शिष्यं संस्थाप्य वामपार्श्वे तम् ।
देवान् वन्देत गुरु-र्वन्दित्वा भणति शिष्योऽथ ॥ २७४ ॥

अनुजानीत दिगादिक-मिच्छाकारेण यूयमस्माकम् ।
इच्छाम इति तदर्थो-त्सर्गं कुरुते गुरुरथोक्त्वा ॥ २७५ ॥

विधिनानुज्ञानन्दी-माकर्षति संशृणोति शिष्यश्च ।
भणति पुनर्वन्दित्वा, प्रागुक्तं भावितस्वान्तः ॥ २७६ ॥

साधोरस्य दिगादि, क्षमाश्रमणहस्ततोऽहमनुजाने ।
भणति गुरुर्वन्दित्वा, शिष्योऽथ भणत्यशठचित्तः ॥ २७७ ॥

सन्दिशत किं भणामि गुरुः प्रवेदय तथेति वन्दित्वा ।
कृत्वा तद्वन्दित्वा, प्रवेदितं भणति युष्माकम् ॥ २७८ ॥

सन्दिशत च साधूनां, प्रवेदयामि प्रवेदयेति गुरुः ।
ब्रूते ततश्च शिष्यो, वन्दित्वाऽऽकृष्य मङ्गलकम् ॥ २७९ ॥

कुरुते प्रदक्षिणां सद्-गुरोः स दत्त्वोपयोगवान् वासान् ।
देवादीनां शीर्षे, तस्याथ प्रक्षिपन् भणति ॥ २८० ॥

वर्द्धस्व गुरुगुणैस्त्वं, त्रीन्, वारानुपविशेद्विधायैवम् ।
शेषं सामायिकवद्, दिगनुज्ञार्थस्त्विहोत्सर्गः ॥ २८१ ॥

उपविशति गुरुसमीपे, ततश्च शिष्यः परे तु वन्दन्ते ।
तं गुरुरप्यनुशास्तिं, द्वयोः प्रदत्ते प्रबोधफलाम् ॥ २८२ ॥

उत्तमपदमुत्तमजन-सेवितमिदमुत्तमोक्तमासाद्य ।
धन्यः पारं गत्वा, लभते सुखमुत्तमं कश्चित् ॥ २८३ ॥

त्वमसि च तादृग्गुणवा-न्भिषग्वरः प्राणिनां भवार्त्तानाम् ।
तव शरणं प्रपन्ना, मोचयितव्यास्त्वया भव्याः ॥ २८४ ॥

युष्माभिरपि च नायं, मोक्तव्यो भववने महागहने ।
सिद्धिपुरसार्थवाहः, क्षणमपि नित्यं तु संसेव्यः ॥ २८५ ॥

*आज्ञाकोपोऽपरथा, स्याददितुःखप्रदस्तदेतस्य ।*
निर्भर्त्सितैरपि पदौ, न त्याज्यौ कुलवधूज्ञातात् ॥ २८६ ॥

व्रतिनीनामप्येवं, गुरुरनुशास्तिं करोति दर्शयति ।
पूर्वोत्तमसाध्वीनां, गुणान् पुनश्चन्दनाद्यानाम् ॥ २८७ ॥

भणति स्वलब्धिकमपि, प्राग्जाता गुरुपरीक्षितैव तव ।
लब्धिर्वस्त्रादीनां, निर्दोषा पारतन्त्र्यवतः ॥ २८८ ॥

सम्प्रति सूत्रायत्तो, जातोऽसि त्वमिति वस्तुनि प्रकृते ।
सम्यक् प्रवर्त्तितव्यं, बहुगुणलब्धिर्यथा भवति ॥ २८९ ॥

उत्थाय सपरिवारः, त्रिर्गुरुमथ भावतः प्रदक्षिणयेत् ।
अथ पालयति स गच्छं, शिष्यान्निष्पादयन्नीत्या ॥ २९० ॥

ईदृग्गणिविहितगणः; व्यवहाराचरणमेव भव्यानाम् ।
दर्शयति मोक्षमार्गं, दीप इव गृहस्थितं वस्तु ॥ २९१ ॥

भरते भृतेऽतिशिथिलैः, कलिदोषाद् गलितसुविहितविहारे ।
स्थेयं गुणार्थमगुणे-ऽप्यग्रहिलग्रहिलनृपनीत्या ॥ २९२ ॥

अगुणादपि गुणवृद्धि-र्यदि भवति द्रव्यवन्दनादिभ्यः ।
तदवकरादपि रत्नो-पलम्भ इत्याहुराचार्याः ॥ २९३ ॥

हीनेऽपि गुणांशे तु, प्रायो भावेन वन्दनं न्याय्यम् ।
इत्थं मार्गाभ्युदयः, कारणमिह कल्पभाष्योक्तम् ॥ २९४ ॥

निरुपक्रमकर्मवशा-न्नित्यं मार्गैकदत्तदृष्टिरपि ।
चरणकरणे त्वशुद्धे, शुद्धं मार्गं प्ररूपयतु ॥ २९५ ॥

दर्शनशास्त्राभ्यासा-द्धीनोऽपि पथप्रभावनोद्युक्तः ।
यल्लभते फलमतुलं, न तत् क्रियामात्रमग्नमतिः ॥ २९६ ॥

विफलक्रियाभिमाना-दज्ञानाश्चरणशुद्ध्यभावेन ।
इदमित्थमेव गदितं, यत् 'सम्मत्यां' महामतिना ॥ २९७ ॥

"चरणकरणप्पहाणा, ससमयपरसमयमुक्कवावारा ।
चरणकरणस्स सारं, णिच्छयसुद्धं न याणंति" ॥ २९८ ॥

पर्यायद्रव्यगुणै-रात्मज्ञानमिह कथ्यते बोधः ।
तत्र श्रद्धा दर्शन-मभ्युत्थानं च चारित्रम् ॥ २९९ ॥

इत्थं रत्नत्रयतां, प्राप्तेऽस्मिन्निर्विकल्पभावनिधौ ।
समभावात् सामायिक-पदप्रवृत्तिः सुपरिशुद्धा ॥ ३०० ॥

पवनादिव कल्लोलाः; परपरिणामा विकल्पतः पुंसः ।
स्थिरनिर्विकल्पवृत्तिः, स्तिमितोदधिसन्निभे त्वस्मिन् ॥ ३०१ ॥

आगन्तुकाद्विकल्पा-न्निमित्ततः प्रसरतां स्वभावेन ।
कर्तृत्वाद्यभिमानात्, कर्माणूनां स संसरति ॥ ३०२ ॥

स्नेहालिङ्गितवपुषो, रेणुभिराश्लिष्यते यथा गात्रम् ।
रागद्वेषास्तमतेः, कर्मस्कन्धैस्तथा श्लेषः ॥ ३०३ ॥

पश्यन्नाटकमात्मा, तदनादिद्रव्यभावकर्मकृतम् ।
अन्तर्दृशा स्वभावा-न्न चलति भगवानुदासीनः ॥ ३०४ ॥

अस्यां निमीलितायाा-मपि च व्यवहारधीनिमीलायाम् ।
अयमीदृगेव न मृगो, भवति मृगपतिः प्रसुप्तोऽपि ॥ ३०५ ॥

कुरुते नहि परभावा-न्न कारयत्यपि च नानुजानीते ।
परिणामानां स्वेषां, स भवति कर्त्ता च भोक्ता च ॥ ३०६ ॥

परभावकर्तृचेतो-वाक्कायाभेदमध्यवस्यन्तः ।
दधते पराङ्मुखत्वं, स्वभावलाभप्रथा भूमेः ॥ ३०७ ॥

नहि देहो न मनो वा, न चापि वाणी न कारणं तेषाम् ।
ज्ञायकभावस्त्वहमिति. बोधो भूमिः स्वभावस्य ॥ ३०८ ॥

पुरुष ! त्वमेव मित्रं, तव किं बहिरीहसे परं मित्रम् ।
उच्चालयितारं त्वं, दूरालयिकं च जानीहि ॥ ३०९ ॥

इत्यादिभिरुपदेशैः, सूत्रोक्तैर्मोक्षमार्गमुख्यत्वम् ।
मननात्मकस्य सिद्ध्य-त्यनात्मभेदप्रबोधस्य ॥ ३१० ॥

परमात्मा भिन्नः स्यात्, परभेदज्ञानपरिणतो जीवः ।
वैषम्यविनिर्मुक्त-स्वरूपमात्रप्रकाशेन ॥ ३११ ॥

क्षणमपि कर्मविलासो, परमे परमेष्ठिभावलग्नमतिः ।
घनसमयेऽपि रविरिव, प्रकाशते मेघनिर्मुक्तः ॥ ३१२ ॥

आत्मस्वभावदर्शी, स्वैरं कर्मोपनीतफल्गुरपि ।
लिप्येत न पापभरै-रवशिष्टमुपप्लवं पश्यन् ॥ ३१३ ॥

मायोदकं यथावत्, पश्यन् यात्येव तेन मार्गेण ।
पश्यन्नलीकरूपान्, भोगानुल्लङ्घयत्येवम् ॥ ३१४ ॥

तांस्तत्त्वेन तु जानन्, मग्नो भावेन मोहजम्बाले ।
उभयभ्रष्टः स्पष्टं, निरन्तरं खेदमनुभवति ॥ ३१५ ॥

अन्तःकरणध्यान-प्रतिबन्धकविघटनार्थमुद्युक्तः ।
भोगैरपि लिप्तमति-र्न भवत्याक्षेपकज्ञानात् ॥ ३१६ ॥

उभयपदाव्यभिचारो, भणितः सम्यक्त्वमौनयोः सूत्रे ।
अस्यामेव दशायां, घटते सम्यग्दृशः सोऽयम् ॥ ३१७ ॥

संयमजन्यविशुद्धि-स्तदानपायेति निश्चयस्थित्या ।
फलविषये व्यभिचारो, न संयमस्थानविरहेऽपि ॥ ३१८ ॥

तस्मादात्मज्ञाने, कार्यः सततं मुमुक्षुणाभ्यासः ।
किमपरशास्त्रविकल्पै-र्जातिप्रायैः कुतर्कोत्थैः ॥ ३१९ ॥

आत्मज्ञानविरहिते, शास्त्रे शस्त्रे च कोऽपि न विशेषः ।
भ्राम्यन्ति मूढलोकाः केवलमाकारभेदेन ॥ ३२० ॥

आत्मज्ञानग्रन्थाः, पन्थानो ये तु मोक्षनगरस्य ।
गुरुतरगुणगुरुचरण-प्रसादतस्तेऽनुसर्तव्याः ॥ ३२१ ॥

एनां गुरोरधीत्य, श्रद्धत्ते य इह मार्गपरिशुद्धिम् ।
परमानन्दं लभते, स 'यशोविजय'श्रिया पूर्णम् ॥ ३२२ ॥

श्रीविजयदेवसूरौ, जयिनि श्रीविजयसिंहसूरौ द्याम् ।
प्राप्ते साम्राज्यभृति श्रीमद्विजयप्रभाचार्ये ॥ ३२३ ॥

रुचिरं सतीर्थ्यभावं, दधतां श्रीजीतविजयविबुधानाम् ।
श्रीनयविजयबुधानां, शिशुनाऽयं विरचितो ग्रन्थः ॥ ३२४ ॥

# बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते

## ॥ द्वे प्रकरणे ॥

हेतुत्वमिह प्रकृति-प्रदेशसामान्य एव योगानाम् ।
स्थिति-र[स]सामान्ये तु, प्रोक्तं कुशलैः कषायाणाम् ॥ १ ॥

व्यतिरेकान्वयदृष्टेः प्रकृतिविशेषे तु हेतुभेद इति ।
प्रकृतीनां षोडशकं मिथ्यात्वनिमित्तकं प्रोक्तम् ॥ २ ॥

जातिचतुष्टय-नरकत्रिक-मिथ्यात्वानि हुण्डसेवार्त्ते ।
स्थावरचतुष्कमातप-तृतीयवेदाश्च षोडशकम् ॥ ३ ॥

मनुज-स्त्यानर्द्धित्रिक ३[मपि तिर्यक्त्रिक]मनाद्यचरमानि ।
संस्थानक४संहनना४न्युद्योतादासुखगती (?शुभखगति) च ॥ ४ ॥

नींचैर्गोत्रौदारिक-युगलकषायाष्टकाङ्गनावेदाः ।
वज्रर्षभमिति पञ्च-त्रिंशदिहाऽसंयमनिमित्ताः ॥ ५ ॥

बध्यन्ते[च]कषायै-रवशिष्टाः प्रकृतयोऽष्टषष्टिरिह ।
योगैस्तु सातवेद्यं तथैव नियमोपलम्भेन ॥ ६ ॥

चतुरादिप्रत्ययती(ता), सीतां(साता)दौ यातु भांषिताऽन्यत्र ।
सा तु तृणारणिमणिवद् विकल्पमाश्रित्य बोद्धव्या ॥ ७ ॥

तीर्थकराऽऽहारकयो-र्बन्धे सम्यक्त्वसंयमौ हेतू ।
इति वस्तुस्थितिरत्रा-ऽनुपपत्तिं भावयन्ति परे ॥ ८ ॥

सम्यक्त्वमौपशमिकं तीर्थंकरनामबन्धहेतुश्चेत् ।
तद्बन्धस्तद्भावात् स्यात्तर्ह्युपशान्तमोहेऽपि ॥ ९ ॥

क्षायिकसम्यक्त्वं चे-ज्जिननाम्नो बन्धकं तदा बन्धः ।
सिद्धानामपि तस्य प्रसज्यते तद्वतां सततम् ॥ १० ॥

क्षायोपशमिकमीदृश-मिदमिति चेत्तर्ह्यपूर्वकरणस्य ।
प्रथमसमयेऽपि हि भवे-त्तद्बन्धस्य व्यवच्छेदः ॥ ११ ॥

क्षायोपशमिकदर्शन-विच्छेदो ह्याद्यसमयभावीष्टः ।
जिननाम्नो बन्धस्य त्वमूर्वकरणस्य षष्ठांशे ॥ १२ ॥

तन्न किमपि सम्यक्त्वं जिननाम्नो बन्धकारणं घटते ।
कारणमाहारकयुग-बन्धस्य न संयमोऽप्येवम् ॥ १३ ॥

सामान्येन तथात्वे तस्य भवेत् स प्रमत्तदमिनोऽपि ।
ग्राह्योऽप्रमत्तभावे त्वपूर्वषड्भागपरतोऽपि ॥ १४ ॥

अत्र वदन्त्यनयोरपि कषायस(भे)दा हि कारणं मौलम् ।
सम्यक्त्वसंयमौ पुन-रेषां सहकारितां धत्तः ॥ १५ ॥

ते चारभ्य चतुर्थाद् गुणाश्रयात् सप्तमाच्च वर्त्तते(न्ते) ।
नियता भेदा अर्वागपूर्वकरणस्य षष्ठांशात् ॥ १६ ॥

सम्यक्त्वानुगतास्ते बन्धाय स्युः प्रशस्ततां नीताः ।
सकलजगदुद्दिधीर्षा-दिसङ्गतास्तीर्थकरनाम्ना(?म्नः) ॥ १७ ॥

तथा हि-लोचनलाभसमानं सम्यक्त्वं प्राप्य चिन्तयति धीमान् ।
मोहांप्रकरे(मोहान्धकार)गहने संसारे के न दुःखार्त्ताः ? ॥ १८ ॥

सत्त्वा भ्रमन्ति सत्य-प्यस्मिन् सद्धर्मतेजसि हताशाः ।
कृच्छ्रादस्मादेनांस्तदनेनोत्तारयामीति ॥ १९ ॥

करुणादिगुणोपेतः परार्थकरणप्रवर्द्धमानमनाः ।
स तथैव चेष्टमानः परार्थकृत्तीर्थकृद् भवति ॥ २० ॥

यस्तु स्वजनादिगतं ध्यायत्येवं तथाऽनुतिष्ठति च ।
सावधिकपरार्थरतः स तु धीमान् गणधरो भवति ॥ २१ ॥

स्वयमेव निर्यियासति भवनैर्गुण्योपलम्भतो यस्तु ।
स तु मुण्डकेवली स्या-दात्मैकार्थप्रवृत्तिगुणः ॥ २२ ॥

प्रणिधिप्रवृत्तिविघ्नजय-सिद्धिविनियोगचरणशुद्धिभवाः ।
बन्धं कषायभेदाः कुर्वन्त्याहारकयुगस्य ॥ २३ ॥

ननु च विशेषाश्रयणे संयमसम्यक्त्वयोः क इव मन्तुः ।
यत् सकषायेष्विष्टो नेष्टः सम्यक्त्वसंयमयोः ? ॥ २४ ॥

सत्यं निश्चयनयतो हेतुर्मोक्षस्य नैव बन्धस्य ।
तेन जिनाऽऽहारकयो-र्बन्धकतेष्टा कषायेषु ॥ २५ ॥

व्यवहारनये त्विष्टं संयमसम्यक्त्वयोरपि तथात्वम् ।
येन घृतं दहतीतिव-दुपचारस्तत्र सम्भवति ॥ २६ ॥

शुद्धनयानुगृहीत-व्यवहारनयस्य चेदमाकूतम् ।
स्वैरी त्वयमाश्रयते-ऽतिशयं सम्यक्त्वसंयमयोः ॥ २७ ॥

नयभेदाद् वाग्भेदो न च दुष्यति कोऽपि शास्त्रकाराणाम् ।
पार्श्वापत्यस्थविर-प्रतिवचनानां विभेद इव ॥ २८ ॥

योगेष्वेव विशेषं वाञ्छन्त्यन्ये तु तारतम्येन ।
फलभेदात्तद्भेदा-न्न [हि ?] वचनोपग्रहस्तत्र ॥ २९ ॥

इत्युक्ता बन्धहेतवः

बद्धस्य कर्मणः स्या-दुदयः तस्मात् परीषहा दमिनः ।
उपतिष्ठन्त इतीमे कीर्त्यन्ते ये यथारूपाः ॥ १ ॥

क्षुदुदन्योष्णं शीतं शय्यारोगौ वधस्तृणस्पर्शः ।
चर्या मलदंशौ चे-त्येकादश वेदनीयभवाः ॥ २ ॥

निरवद्याहारस्या-ऽलाभे क्षुद्वेदनाऽतिरेकेऽपि ।
स्वाध्यायध्यानभृत-स्त्यजतश्चाऽकालभिक्षेच्छाम् ॥ ३ ॥

अन्यूनयतो योगा-नगृह्णतोऽनेषणीयपिण्डं च ।
यददैन्यात् क्षुत्सहनं क्षुधापरीषहजयः स मतः ॥ ४ ॥

एवमुदन्याविजयो-ऽप्युष्णपरीषहजयस्तु तस्य मतः ।
यो निश्छायाटव्यां गच्छन् ग्रीष्मे महाभीष्मे ॥ ५ ॥

शुष्कगलतालुरसनो-ऽप्यतिदाहहतस्तपोविशेषेण ।
प्राणिदयाधृतबुद्धि-र्जलावगाहादि नातनुते ॥ ६ ॥

पतति महत्यपि शीते त्यक्त्वाऽकल्प्यांशुकंः समयविधिना ।
कल्प्याम्बरपरिभोगी खगवदक्लृप्तालयविशेषः ॥ ७ ॥

शीताभि[नि]संपीं(पा)ते-ऽप्यनभीप्सिततत्प्रतिक्रियोपायः ।
संसहते यच्छीतं शीतपरीषहजयः स मतः ॥ ८ ॥

खरविषमकर्करेषु क्षितिप्रदेशेषु सुमृदुपट्टे वा ।
निद्रां विधिनाऽनुभव-न्नोपेत्यरतिं रतिं वा यत् ॥ ९ ॥

शय्यापरीषहजयः स मुनेर्यच्च प्रतिक्रियाचरणम् ।
रोगेऽपि समयविधिना रोगपरीषहजयः स मतः ॥ १० ॥

प्राक्तनकर्मफलमिदं नैष तपस्वी करोति मे किमपि ।
बाध्यमनेन शरीरं न तु दर्शनदृक्चरित्राणि ॥ ११ ॥

इति वधकेऽप्यविकृतधी-र्निहन्यमानोऽपि मुद्गरशराद्यैः ।
समतां बिभर्त्ति यो वध-परीषहस्तेन विजितः स्यात् ॥ १२ ॥

गच्छस्य तदितराणां परिभोगो ह्यशुषिरस्य दर्भादेः ।
समनुज्ञातस्तदुपरि शेते संस्तीर्य यो विधिना ॥ १३ ॥

आस्तीर्य तृणं वा य-श्चौरहृतोपकरणे(णो) मुनिः शेते ।
तस्य तृणस्पर्शपरी-षहविजयस्तदधिसहनेन ॥ १४ ॥

निःसङ्गस्य पवनवत् परिभावितबन्धमोक्षतत्त्वस्य ।
नवकल्पविहारकृतो विरुद्धमार्गं च परिहरतः ॥ १५ ॥

यत्कण्टकादिदुःखे-ऽप्यस्मरणं यानवाहनादीनाम् ।
चर्यापरीषहजयः स मुनेः संयमरथस्थस्य ॥ १६ ॥

आमरणादस्नान-व्रतभाजः स्वेदवलितमलराशेः ।
यन्मलपीडासहनं तदपनयननिर्विकल्पस्य ॥ १७ ॥

स मलपरीषहविजयः कर्ममलापनयनाय बद्धमतेः ।
दर्शन-मो(?)बोध-चरित्रा-मलसलिलस्नानशुद्धस्य ॥ १८ ॥

दंशग्रहणं घातक-सत्त्वसमूहोपलक्षणं तेन ।
दंशमशकादिदंशे-ऽप्यकुर्वतस्तद्वपुर्बाधाम् ॥ १९ ॥

अनिवारयतो व्यजना-दिना चताननपगच्छतः स्थानात् ।
यत्तत्पीडासहनं दंशपरीषहजयः स मुनेः ॥ २० ॥

प्रज्ञाज्ञाने चाद्ये परीषहावष्टमे त्वलाभोत्थः ।
कर्मणि चतुर्दशैते छद्मस्थानामरागाणाम् ॥ २१ ॥

नहि सूक्ष्मसम्पराये परीषहाः केऽपि मोहनीयभवाः ।
इत्ययमरागमध्ये ग्राह्यो लोभांशसत्त्वेऽपि ॥ २२ ॥

तत्राङ्गपूर्वतर्क-व्याकरणाध्यात्मशास्त्रनिपुणस्य ।
भानीवार्कस्य पुरो मम सर्वे निप्रभा अन्ये ॥ २३ ॥

इत्यस्य ज्ञानमद-स्याऽधिकपुरुषोनताधिया दलनम् ।
प्रज्ञापरीषहजयः साधोरध्यात्मशुद्धस्य ॥ २४ ॥

सहमानोऽप्याक्षेपं योऽज्ञोऽपि सुदुष्करे रतस्तपसि ।
ज्ञानफलेऽविचिकित्सः सोऽज्ञानपरीषह(हं) जयः (जयति) ॥ २५ ॥

योऽलाभेऽपि न दीनो लाभादपि वरमलाभमेव तपः ।
ध्यायति निरुत्सुकमतिः सोऽलाभपरीषहं जयति ॥ २६ ॥

अष्ट निषद्या याच्ञा-क्रोशावरतिर्वशा च नग्नत्वम् ।
सत्कारोऽदर्शनमिति मोहाद् रागिष्वखिलसत्ता(:) ॥ २७ ॥

भय-मान-क्रोधाऽरति-वेद-जुगुप्साश्च लोभ-दृग्मोहौ ।
क्रमतोऽष्ट हेतवोऽमी प्रोक्ताष्ट(?)परीषहोत्पत्तौ ॥ २८ ॥

अनुतिष्ठन्निजनियमं शून्यागारस्मशानशैलादौ ।
अभयो भैरवशब्दाद् भवति निषद्यापरीषहजित् ॥ २९ ॥

विधिनैव वा(या) चमान-स्तपोरतो दीनतादिपरिहारी ।
यो लाघवमदसोढा स भवति याच्ञापरीषहजित् ॥ ३० ॥

श्रृण्वन् प्रभुरपि मिथ्या-दृशामवज्ञावचांस्यतिकटूनि ।
क्रोधांशमप्यकलय-न्नाक्रोशपरीषहं जयति ॥ ३१ ॥

विषमक्षेत्रादिकृता-मरतिं सूत्रोपदेशतो निघ्नन् ।
धर्मारामरतः सन् मुनिररतिपरीषहे (हं?) जयति ॥ ३२ ॥

एकान्ते नवयौवन-मदिरामदघूर्णमाननयनासु ।
दोर्मूलदर्शनोल्लस-दुन्नतकुचकलशलीलासु ॥ ३३ ॥

अशुचीनां पिण्डोऽसा-विति निर्मलभावनां दधत् कवचम् ।
विफलयति यः स्मरशरान् स संवृतः स्त्रीपरीषहजित् ॥ ३४ ॥

वासोभिरसर्वतनु-प्रावरणैरल्पमूल्यपरिजीर्णैः ।
नाग्न्यपरीषहसहनं भवति ममत्वोज्झितमुनीनाम् ॥ ३५ ॥

नन्वेवमौपचारिक-नाग्न्यात् तादृक् परीषहजयोऽपि ? ।
न, क्षुत्परीषहजयो-पमयाऽकल्प्याऽग्रहेऽदोषात् ॥ ३६ ॥

सत्कारो वस्त्राद्यै-र्नतिप्रशंसादिना पुरस्कारः ।
तदकरणे दुष्प्रणिधानवर्जकस्तत्परीषहजित् ॥ ३७ ॥

पापस्थानेभ्योऽहं विरतो निस्सङ्गमार्गचारी च ।
तदपि सुरनारकादीन् न प्रेक्षे पुण्यपापभुजः ॥ ३८ ॥

तत् प्राचामतिशयगी-र्वृथेति दर्शनपरीषहो भावः ।
अशुभो भवेत् प्रदेशो-दितमिथ्यात्वप्रभावेण ॥ ३९ ॥

सोढव्योऽसौ नेहा-ऽभ्यायान्ति सुधाभुजः परमसुखिनः ।
जिन-गणधरादिविरहात् कार्याऽभावान्मनुजलोके ॥ ४० ॥

प्राक्कृतदुरितनिगडिता निरन्तरं तीव्रवेदनाग्रस्ताः ।
गमनागमनाशक्ता न नारका अपि समायान्ति ॥ ४१ ॥

न च दुःषमानुभावात् संहननतपोविशेषवैकल्यात् ।
ज्ञानातिशयोऽस्त्यधुना स्थानस्थान् येन तान् पश्येत् ॥ ४२ ॥

प्राचां तूत्तमशक्तिः संहनन-तपो-धृतिप्रकर्षेण ।
आसीत् सर्वं तेषां घटमानं तदितिभावनया ॥ ४३ ॥

## ॥ ज्ञानार्णवः ॥

ऐन्दवीं तां कलां स्मृत्वा, धीमान्न्यायविशारदः ।
ज्ञानार्णवसुधास्नान-पवित्राः कुरुते गिरः ॥ १ ॥

ज्ञानं पञ्चविधं प्रोक्तं, मतिः श्रुतमथावधिः ।
मनःपर्यवसंज्ञं च, केवलं चेति नामतः ॥ २ ॥

तत्प्रत्यक्षं परोक्षं च, प्रत्यक्षं त्वक्षमात्रजम् ।
यत्त्विन्द्रियोपलब्धिस्तत्तन्न यत् स्पष्टतैव सा ॥ ३ ॥

परोक्षं च परापेक्ष-मनुमानादि सर्वथा ।
येन संव्यवहारेणा-ध्यक्षमैन्द्रियकं स्मृतम् ॥ ४ ॥

भिन्ने स्वाम्यादिसाधर्म्या-न्न यद्यपि मतिश्रुते ।
लक्षणादिकृतो भेद-स्तथापि स्फुटमेतयोः ॥ ५ ॥

श्रुतं श्रुतानुसारि स्या-न्मतिरन्यत्परोक्षजम् ।
श्रुतं शब्दात्मकं गौणं, व्युत्पत्त्यर्थे ते तु लक्षणे ॥ ६ ॥

कथमेकेन्द्रियाणां त-न्नूनं सुप्तयतेरिव ।
भाषा श्रोत्राद्यभावेपि, क्षयोपशमसम्भवम् ॥ ७ ॥

न चावध्यादिकं तत्स्या-दागमानुपदेशतः ।
तत्कारणगुणाभावा-दक्षजन्यतया तथा ॥ ८ ॥

श्रुतस्य मतिपूर्वत्वं, श्रुतमित्यनयोर्भिदा ।
यौगपद्यं तु तल्लब्ध्यो-रिष्टमेवोपयोगयोः ॥ ९ ॥

न भावश्रुतजन्यापि, द्रव्यश्रुतभवा मतिः ।
न तस्यामस्ति वैजात्य-मुत्कर्षो वा पुरस्कृतः ॥ १० ॥

केचिद् द्रव्यश्रुतं प्राहु-र्मतिपूर्वं न चापरम् ।
तेषां भावश्रुताभावो, निर्बीजा कल्पना पुनः ॥ ११ ॥

मतिश्रुते निर्विशेषे, ज्ञानाज्ञाने विशेषिते ।
सम्यग्दृशां हि ते ज्ञाने, अज्ञाने कुदृशां पुनः ॥ १२ ॥

अविशेषात्सदसतो-र्भवहेतुतया तथा ।
यादृच्छिकतयाऽज्ञानं, मिथ्यादृष्टेः फलं विना ॥ १३ ॥

सर्वथानुपरागेण, घटधीर्ज्ञानमेव नः ।
कथञ्चित्पटसत्ताया, आपत्तौ चेन्न तद्ग्रहः ॥ १४ ॥

ज्ञानं तदपि संवादि, प्रवृत्तिजनकं यतः ।
अज्ञानं बन्धहेतुत्वा-न्मोक्षाहेतुतयाऽथवा ॥ १५ ॥

वक्ष्यमाणभिदाभाजो-रेतयोरथवा भिदा ।
विशेषनिश्चये जाति-भेदानुमितिगोचरः ॥ १६ ॥

अथवेन्द्रियभेदेन, भेदः सिद्धयेत्तयोर्द्वयोः ।
श्रुतं पूर्वगते यस्मा-त्तद्भेदप्रतिपादनम् ॥ १७ ॥

श्रोत्रेन्द्रियोपलब्धीति-पदार्थव्याप्तिसिद्धये ।
द्रव्यभावश्रुते ग्राह्ये, उचिताद्विग्रहद्वयात् ॥ १८ ॥

श्रोत्रेन्द्रियोपलब्धिश्चेत्, श्रुतमेवा वधार्यते ।
तद्द्वारकं मतिज्ञान-मुच्छिद्येत तदा न किम् ॥ १९ ॥

श्रोत्रोपलब्धिरेवात्र, श्रुतं न श्रुतमेव सा ।
शब्दः सैवेत्यपव्याख्या, तद्भेदानधिकारतः ॥ २० ॥

मतेरपि श्रोत्रधीत्वा-त्तुशब्दोऽत्र समुच्चये ।
नावधारणवन्ध्यत्व-मेकत्रैवावधारणात् ॥ २१ ॥

व्यञ्जनाक्षरवद्द्रव्य-श्रुतं लिप्यक्षरं मतम् ।
भावश्रुतं वर्णलाभः, शेषं तु मतिरिष्यते ॥ २२ ॥

श्रुतत्वं न जहात्येव, लब्धिरक्षरगर्भिणी ।
श्रोत्रेन्द्रियोपलब्धिः सा, यतो योग्यतया स्मृता ॥ २३ ॥

अवधारणाश्रित्ये-न्द्रियभेदोपि युज्यते ।
उपेक्ष्यमेव व्याख्यान-मतो निरवधारणम् ॥ २४ ॥

भावः श्रुताक्षराणां यः, स एव श्रुतमिष्यते ।
ईहादयो मतेर्भेदा, नोच्छिद्येरन्कुतोऽन्यथा ॥ २५ ॥

द्रव्यभावश्रुते युग्मं, किं कथं वा भवेदिति ।
कियान्भावश्रुतस्यांशो, द्रव्यादीत्यनुभाषते ॥ २६ ॥

बुद्धया बुद्धिगतानर्थान्, वदतो ह्युभयश्रुतम् ।
द्रव्यतोऽनुपयुक्तस्य, भावतो जानतः परम् ॥ २७ ॥

केवलश्रुतकालेपि, तदात्मन्युभयश्रुतम् ।
भवेद्यद्युपलब्धार्थान्, सर्वान् वक्तुं क्षमेत सः ॥ २८ ॥

मत्या सह तया दृष्टान्, ब्रुवतो ह्युभयश्रुतम् ।
द्रव्यतोऽनुपयुक्तस्य, तदेकालोर्चनं मतिः ॥ २९ ॥

केचिदाहुरिदं तन्नो, युक्तं भावश्रुतव्ययात् ।
नाऽऽधिक्यं नाऽन्यथात्वं वा, भाषाव्यापारतो मतेः ॥ ३० ॥

मत्या श्रुतानुसारस्या-ऽऽश्रयणाज्जन्यते श्रुतम् ।
इतीच्छेच्छ्रुतसङ्कल्पः, श्रुतमेवावधार्यताम् ॥ ३१ ॥

इतरोत्पत्तिकाले च, श्रुतं स्यादिति दुर्वचम् ।
भिन्नहेतुकतासिद्धेः, स्वस्वावरणभेदतः ॥ ३२ ॥

साम्प्रतं शब्दहेतुत्वा-न्मतिर्द्रव्यश्रुतं भवेत् ।
शुद्धा तु सा तदा तत्स्या-द्यदि ज्ञप्तिसमं भणेत् ॥ ३३ ॥

अस्वाभाव्याद् बहुत्वाच्च, न सर्वत्र गिरां गतिः ।
अपि प्रज्ञापनीयाना-मनन्तोंऽशो न्यबन्धि यत् ॥ ३४ ॥

अत एव च पूर्वज्ञा, नूनं षट्स्थानगामिनः ।
समाक्षरा अप्यसमाः, श्रुताभ्यन्तरया धिया ॥ ३५ ॥

श्रुतानुसारिणी बुद्धि-र्मतिरेव यदिष्यते ।
तदा षट्स्थानता भज्येत्, स्वस्थाने वा मिथस्तयोः ॥ ३६ ॥

बुद्ध्या सामान्यया दृष्टान्, भाषते सम्भवेन यान् ।
श्रुतोपयुक्तस्ते तस्य, श्रुतमन्या मतिः स्मृता ॥ ३७ ॥

श्रुतमेव न ते किन्तु, श्रुतं भाषत एव यान् ।
परिणामो ध्वनेरेव, श्रुतं तद् भजना मतेः ॥ ३८ ॥

इतरत्रापि शब्दस्य, परिणामाद् भवेच्छ्रुतम् ।
मत्या श्रुतोपलब्ध्या वा, यदि नामसमं भणेत् ॥ ३९ ॥

तदा श्रुतोपयोगः स्या-च्छ्रुतविज्ञप्तिहेतुभिः ।
प्रयोगः स्याद्ययं तु, नाक्षराद्य(रस्या)नुसारतः ॥ ४० ॥

भेदो विषयभेदेन, हेतुभेदोपजीवी वा ।
नूनं मतिश्रुते भेत्तुं, दर्शितो व्याख्ययाऽनया ॥ ४१ ॥

श्रुतमेव श्रुतं ज्ञेयं, भाषासम्भवशालि वा ।
इतरत्र तदापत्ति-र्भिन्नानुभववद्गिरा ॥ ४२ ॥

अथवा बुद्धिदृष्टेऽर्थे, श्रुतं सत्येव भासते ।
इतरत्राऽप्ययं न्यायो, द्वयोः साम्ये परं भवेत् ॥ ४३ ॥

ज्ञात्वा वा श्रुतदृष्टार्थान्, ब्रुवतो ह्युभयं श्रुतम् ।
भवेन्मत्युपयुक्तस्य, श्रुतं यदि समं भणेत् ॥ ४४ ॥

श्रुतं मत्युपलब्धार्थ-मतिसङ्गतमेव तत् ।
तादृशं स्यात्तदाऽन्यत्तु, श्रुतं यदि समं भणेत् ॥ ४५ ॥

केचिदाहुर्वल्कसमां, मतिं, सुम्बसमं श्रुतम् ।
तदयुक्तं तथाऽभेदे, श्रुतोच्छेदादिदूषणात् ॥ ४६ ॥

द्रव्यभावश्रुते भेत्तुं, युज्येते नैतया दिशा ।
मतिद्रव्यश्रुते वा यद्, ज्ञानभेदेऽत्र मृग्यते ॥ ४७ ॥

नाऽयं न्यायः पृथग्भावे, तयोर्गुणकथा वृथा ।
मतिर्वल्कं ततो भाव-श्रुतं सुम्बमिति स्थितिः ॥ ४८ ॥

दृष्टान्तेनाऽमुनाऽभेदा-श्लिष्टभेदप्रदर्शनम् ।
विशेषोऽस्य ततो हेतु-फलभावप्रदर्शनात् ॥ ४९ ॥

अनक्षराक्षरभेदादुक्तावन्ये मतिश्रुते ।
तदसत्साभिलापा य-न्मतिरेवं विलीयते ॥ ५० ॥

श्रुतनिश्रितभावेन, मतिरेषा यदि श्रुतम् ।
तर्ह्यवग्रहरूपैव, मतिरन्यच्छ्रुतं भवेत् ॥ ५१ ॥

श्रुतोदितविवेकश्चे-न्मतिरेवं श्रुतोच्छिदा ।
यौगपद्यं द्वयोर्भावे, एकदा चोपयोगयोः ॥ ५२ ॥

श्रुताभ्याससमुद्बुद्ध-क्षयोपशमसम्भवम् ।
श्रुतानुसारहीनं यत्, तदेवाऽश्रुतनिश्रितम् ॥ ५३ ॥

द्विविधापि मतिस्तस्माद्, द्विरूपैवेति का भिदा ।
तद्द्रव्याक्षरभेदेन, भावनीया भिदाऽनयोः ॥ ५४ ॥

द्रव्यश्रुतव्यवहते, र्भावाभावे विभिन्दतः ।
मतिश्रुते इतरथा, व्यवहारस्य सङ्करात् ॥ ५५ ॥

स्वपरज्ञप्तिहेतुत्वात्, तयोर्मूकान्यवद्भिदा ।
चेष्टादिमतिहेतोर-प्यन्यार्थत्वान्न युज्यते ॥ ५६ ॥

परप्रत्यायने शब्दो, ह्यसाधारणकारणम् ।
चेष्टापि शाब्दहेतुत्वात्, तदियं युज्यते गतिः ॥ ५७ ॥

मिथो मतिश्रुतभिदा, तदेवं सर्वहेतुभिः ।
दिशा प्रदर्शिताऽकम्प्र-सम्प्रदायपवित्रया ॥ ५८ ॥

प्रौढिं ये विबुधेषु जीतविजयप्राज्ञाः परामैयरु-
स्तत्सातीर्थ्यभृतो नयादिविजयप्राज्ञाः श्रयन्ति श्रियम् ।
तेषां न्यायविशारदेन शिशुना ज्ञानार्णवे निर्मिते,
पूर्णो भाष्यवचोऽमृतैरतितरामाद्यस्तरङ्गोऽभवत् ॥ १ ॥

ग्रन्थान्तरं रत्नजिघृक्षयाऽन्ये, जडास्तडागं परिशीलयन्ति ।
रत्नाकरं जैनवचोरहस्यं, वयं तु भाष्यं परिशीलयामः ॥ २ ॥

नमोऽस्तु भाष्यकाराय, भगवन्मतभानवे ।
पराहतेषु तर्केषु, भाष्यजीवातुदायिने ॥ ३ ॥

--o--

२/१

भेदपर्यायसुव्यक्तमथ तत्त्वनिरूपणात् ।
निरूप्यते मतिज्ञान-मुद्देशक्रमसङ्गतम् ॥ १ ॥

श्रुतनिश्रितमन्यच्च, तद्द्विधाऽवग्रहादिभिः ।
औत्पत्तिक्यादिकैर्भेदै-रेकैकं स्याच्चतुर्विधम् ॥ २ ॥

भिदाश्च ताश्चतस्रोऽव-ग्रहेहापायधारणाः ।
औत्पत्तिकी वैनयिकी, कार्मिकी पारिणामिकी ॥ ३ ॥

अपग्रहोऽवग्रहः स्या-दीहा भेदगवेषणम् ।
इदमेवेत्यपायो धी-र्धारणा तदविच्युतिः ॥ ४ ॥

अवग्रहेऽपि सामान्य-विशेषविषयं परे ।
प्राहुस्तेषामपायस्य, प्रवृत्तिरतिदुर्घटा ॥ ५ ॥

ईहां संशयमेवाहुः, परे तत्प्रकृताऽसहम् ।
हेतूपपत्तिव्यापारा, न चेहा संशयात्मिका ॥ ६ ॥

केचिदन्यविशेषस्या-भावव्यवसितिं जगुः ।
अपायमिदमेवेति, निश्चयं धारणां पुनः ॥ ७ ॥

अन्वयाद्व्यतिरेकाद-प्यन्वयव्यतिरेकतः ।
अपायस्योदयात्तन्नो, भिदाः पञ्च स्युरन्यथा ॥ ८ ॥

अविच्युतिरपायो हि, संस्कारो ज्ञानमेव न ।
अन्योऽपायः स्मृतिस्तेन, चतुर्भेदा मतिः कथम् ? ॥ ९ ॥

अविच्युतिर्ज्ञानधारा, वासना ज्ञानकारणम् ।
स्मृतिश्चेदं तदेवेति, धीरतः किन्नु दूषणम् ॥ १० ॥

तत्र द्विधाऽवग्रहः स्याद्, व्यञ्जनार्थावलम्बनः ।
तत्रेन्द्रियार्थसम्बन्धो, व्यञ्जनाऽवग्रहः स्मृतः ॥ ११ ॥

स तदन्ते ज्ञानभावा-दव्यक्तं ज्ञानमिष्यते(ताम्) ।
अन्यथा प्रागलाभं त-दन्तेऽपि न जनुर्लभेत् ॥ १२ ॥

स चतुर्धा भवेच्चक्षु-र्मनोवर्जेन्द्रियोद्भवः ।
उपघातानुग्रहाभ्यां, प्राप्यकारीणि तानि यत् ॥ १३ ॥

दूरार्थग्रहणाच्छ्रोत्र-घ्राणे अप्राप्यकारिणी ।
स्यातां न ते शब्दगन्धौ, यदि प्राप्नुवतः स्वयम् ॥ १४ ॥

सक्रियौ तौ संहरणाद्, वायुना वहनादपि ।
द्वारानुपाताच्छैलादि-प्रतिघातात्समूर्तिकौ ॥ १५ ॥

अप्राप्यकार्यधिष्ठाना-सम्बद्धग्राहि लोचनम् ।
अनुग्रहोपघाताभ्यां, विषयाद्भाव्यमन्यथा ॥ १६ ॥

अदृष्टकल्पनापत्ति-स्तैजसत्वे हि चक्षुषः ।
न च तत्साधकं किञ्चिद्, बलवन्मानमीक्ष्यते ॥ १७ ॥

१८ । १९ । २० । २१ । २२ । २३ । २४ ।
सप्तः गाथास्त्रुटिताः ।

किञ्च भावमनो गच्छेद्, बहिर्द्रव्यमनोऽथवा ।
नाद्यः शरीरवृत्तित्वा-दात्मनोऽनिर्गमाद् बहिः ॥ २५ ॥

कर्तृत्वं व्योमवन्न स्यात्, सर्वगत्वे किलात्मनः ।
प्रकृतेरेव कर्तृत्वं, युज्यते न कथञ्चन ॥ २६ ॥

सर्वासर्वग्रहोऽप्येवं, नित्यस्याऽन्यानपेक्षणात् ।
अपेक्षणेपि देहस्या-ऽपेक्षायामतिगौरवात् ॥ २७ ॥

विभुत्वसाधकं किञ्चित्, प्रमाणमपि नेक्ष्यते ।
स्वसम्बन्धविशेषेणा-ऽदृष्टं यत्कार्यमर्जति ॥ २८ ॥

अथ नित्यमहत्त्वेन, व्योमवद्विभुताऽस्य चेत् ।
नैवं तत्परिमाणं हि, यदुत्कर्षापकर्षभाक् ॥ २९ ॥

एवं सावयवत्वं तद्, नित्यत्वं नैव बाधते ।
कथञ्चित्परिणामित्वं, विना तन्न घटेत यत् ॥ ३० ॥

मूर्तत्वादिप्रसङ्गोऽपि, वारणीयोऽनया दिशा ।
मानराजादरे दुष्टा, हन्तापत्तिर्न पत्तिवत् ॥ ३१ ॥

विभुत्वे पुनरात्मा स्या-देक एवान्तरिक्षवत् ।
उपपत्तेर्व्यवस्थाया, विविधोपाधिभेदतः ॥ ३२ ॥

बहिर्द्रव्यमनो गच्छेत्, किं यद्धीहेतुरेव न ।
निमित्तमपि नो तस्या-ऽकरणं वा बहिर्गतम् ॥ ३३ ॥

चिन्ताहर्षादिना जीवो-पघातानुग्रहौ यदि ।
किं ताभ्यां ज्ञेयसंसर्गा-न्न ह्येतौ मनसो यतः ॥ ३४ ॥

देहोपचयदौर्बल्ये, मनःपुद्गलहेतुके ।
आहारपुद्गलादीनां, तद्धेतुत्वेन निश्चयात् ॥ ३५ ॥

मनसः प्राप्यकारित्वं, स्वप्नेनापि न सिद्धयति ।
यदसौ न तथारूपौ, व्यभिचारादिदर्शनात् ॥ ३६ ॥

हर्षादिकं ज्ञानफलं, स्वप्ने नैव क्रियाफलम् ।
तत्सम्भवे बुभुक्षापि, क्षीयेतौदनदर्शनात् ॥ ३७ ॥

स्वप्नोऽपि न मृषा कश्चि-न्नतु सर्व इति स्थितिः ।
तेन न प्राप्यकारित्वं, मनसः स समर्थयेत् ॥ ३८ ॥

स्त्यानर्धौ श्रवणादीनां, व्यञ्जनावग्रहादयः ।
भवेयुर्ननु चित्तस्य, स्वप्नोऽयमिति जानतः ॥ ३९ ॥

सर्वासर्वग्रहापत्ति-र्न चित्तेऽप्राप्यकारिणि ।
दृष्टस्यानुपपत्तेर्य-ददृष्टं परिकल्प्यते ॥ ४० ॥

अतः ९३ पर्यन्ताः त्रिपञ्चाशद्गाथास्त्रुटिताः ।
९३ गाथात्मको द्वितीयस्तरङ्गः पूर्णः ॥ क्रमाङ्काः ९९ थी १५१

तृतीयतरङ्गे आद्याः १ । २ । ३ । ४ गाथाः,
२० गाथातः परतश्च त्रुटिताः २१ यावत् २९ ॥

सारूप्यज्ञानमीहादौ, कोटिस्मारकतां भजत् ।
नियन्तुं प्रभवत्युच्चै-रुभयस्यावलम्बनम् ॥ ५ ॥

स्वप्नादावपि शब्दादि-विषयोऽवग्रहादयः ।
मनसोपि लसन्त्येव, हृषीकर्व्यापृतिं विना ॥ ६ ॥

व्यतिक्रमोत्क्रमौ नैतै-र्नैतेषां तत्त्वनिर्णयः ।
नेदृदृग्यस्वभावोऽपि, तदेते नियतक्रमाः ॥ ७ ॥

अभ्यस्ते निर्णयस्मृत्यो-र्लक्ष्यः सौक्ष्म्येण न क्रमः ।
पद्मपत्रशतच्छेदे, यथा वाऽन्यत्र बुद्धिषु ॥ ८ ॥

श्रोत्रादिभेदात्षोढा स्यु-र्यदर्थावग्रहादयः ।
चतुर्धा व्यञ्जनं तेन, स्युरष्टाविंशतिर्भिदाः ॥ ९ ॥

व्यञ्जनावग्रहस्थाने, चतुर्धा श्रुतनिश्रितम् ।
केचित्क्षिपन्ति तदसत्, तदन्तर्भूतिसम्भवात् ॥ १० ॥

नाना-नानाविध-क्षिप्रा-ऽनिश्रिताऽनिश्रितध्रुवैः ।
षट्त्रिंशच्छ(त्रिशत)त भेदाः स्युः, सेतरावग्रहादिभिः ॥ ११ ॥

नानार्थानां बहुत्वं हि, पृथग्जात्यवभासिता ।
नानात्वेनैव तज्ज्ञप्ति-रबहुत्वं प्रचक्षते ॥ १२ ॥

प्रत्येकं बहुधर्माणां, ज्ञानं बहुविधं मतम् ।
प्रत्येकं स्वल्पधर्माणां, विज्ञानं तद्विपर्ययः ॥ १३ ॥

क्षिप्रं त्वरितमुत्पन्न-मक्षिप्रं तु विलम्बितम् ।
अनिश्रितमलिङ्गोत्थं, निश्रितं लिङ्गसम्भवम् ॥ १४ ॥

निश्चितं संशयातीतं, तेन ग्रस्तमनिश्चितम् ।
सर्वदा यत्तथा ग्राहि, ध्रुवं तच्चान्यदध्रुवम् ॥ १५ ॥

न निश्चितादयोऽज्ञानं, ज्ञानं यत्संशयादयः ।
वस्त्वेकदेशग्राहित्वं, समानं निश्चयेपि नः ॥ १६ ॥

ज्ञानं मिथ्यादृशां सर्व-मज्ञानमुपवर्णितम् ।
एकग्रहेपि सर्वस्य, ज्ञानं सम्यग्दृशां ग्रहात् ॥ १७ ॥

तत्त्वोपगममाहात्म्या-ज्ज्ञानमेवास्य संशये ।
प्रयोजनवशादेक-पर्यायग्रहणेपि च ॥ १८ ॥

सम्यग्दृशः संशयो वा, ज्ञानं ज्ञानोपयोगतः ।
मिथ्यादृशां किलाऽज्ञानं, सर्वो बोधस्तमन्तरा ॥ १९ ॥

सामान्यतो निरूप्यत्वा-न्मतेः कापि न वा क्षतिः ।
ज्ञानाज्ञानविभागस्तु, ज्ञेयो फलविभागतः ॥ २० ॥

इतः २९ गाथास्तृतीयतरङ्गस्य त्रुटिताः, चतुर्थतरंगस्याप्याद्या ।

२९, ३१ तमी य त्रुटिताः, अग्रेपि ग्रन्थ खण्डितः

सर्ववेदिसमुद्घात-गतिरत्र न युज्यते ।
एकदा षड्दिशां व्याप्तिः, पराघातेन तत्र यत् ॥ ३० ॥

दण्डमेकदिशं कृत्वा, चतुर्भिः समयैः परे ।
लोकपूरणमिच्छन्ति, न च (नैतत्) युक्त्यागमक्षमम् ॥ ३२ ॥

ईहापोहौ च मीमांसा, मार्गणा च गवेषणा ।
संज्ञा स्मृतिर्मतिः प्रज्ञा, सर्वमाभिनिबोधिकम् ॥ ३३ ॥

## ॥ नयोपदेशः ॥

ऐन्द्रधाम हृदि स्मृत्वा नत्वा गुरुपदाम्बुजम् ।
नयोपदेशः सुधियां विनोदाय विधीयते ॥ १ ॥

सत्त्वासत्त्वाद्युपेतार्थेष्वपेक्षावचनं नयः ।
न विवेचयितुं शक्यं विनापेक्षां हि मिश्रितम् ॥ २ ॥

यद्यप्यनन्तधर्मात्मा वस्तु प्रत्यक्षगोचरः ।
तथापि स्पष्टबोधः स्यात् सापेक्षो दीर्घतादिवत् ॥ ३ ॥

नानानयमयो व्यक्तो मतभेदो ह्यपेक्षया ।
कोट्यन्तरनिषेधस्तु प्रस्तुतोत्कटकोटिकृत् ॥ ४ ॥

तेन सापेक्षभावेषु प्रतीत्यवचनं नयः ।
अभावाभावरूपत्वात् सापेक्षत्वं विधावपि ॥ ५ ॥

सप्तभङ्ग्यात्मकं वाक्यं प्रमाणं पूर्णबोधकृत् ।
स्यात्पदादपरोल्लेखि वचो यच्चैकधर्मगम् ॥ ६ ॥

यथा नैयायिकैरिष्टा चित्रे नैकैकरूपधीः ।
नयप्रमाणभेदेन सर्वत्रैव तथार्हतैः ॥ ७ ॥

अयं न संशयः कोटैरैक्यान्न च समुच्चयः ।
न विभ्रमो यथार्हत्वादपूर्णत्वाच्च न प्रमा ॥ ८ ॥

न समुद्रोऽसमुद्रो वा समुद्रांशो यथोच्यते ।
नाप्रमाणं प्रमाणं वा प्रमाणांशस्तथा नयः ॥ ९ ॥

स्वार्थे सत्याः परैर्नुन्ना असत्या निखिला नयाः ।
विदुषां तत्र नैकान्ता इति दृष्टं हि संमतौ ॥ १० ॥

बौद्धादिदृष्टयोऽप्यत्र वस्तुस्पर्शेन नाप्रमाः ।
उद्देश्यसाधने रत्नप्रभायां रत्नबुद्धिवत् ॥ ११ ॥

अयं संक्षेपतो द्रव्यंपर्यायार्थतया द्विधा ।
द्रव्यार्थिकमते द्रव्यं तत्त्वं नेष्टमतः पृथक् ॥ १२ ॥

तिर्यगूर्ध्वप्रचयिनः पर्यायाः खलु कल्पिताः ।
सत्यं तेष्वन्वयि द्रव्यं कुण्डलादिषु हेमवत् ॥ १३ ॥

आदावन्ते च यन्नास्ति मध्येऽपि हि न तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ १४ ॥

अयं द्रव्योपयोगः स्याद्विकल्पेऽन्त्ये व्यवस्थितः ।
अन्तरा द्रव्यपर्यायधीः सामान्यविशेषवत् ॥ १५ ॥

पर्यायार्थमते द्रव्यं पर्यायेभ्योऽस्ति न पृथक् ।
यत्नैरर्थक्रिया दृष्टा नित्यं कुत्रोपयुज्यते ॥ १६ ॥

यथा लूनपुनर्जातनखादावेकतामतिः ।
तथैव क्षणसादृश्याद् घटादौ द्रव्यगोचरा ॥ १७ ॥

तार्किकाणां त्रयो भेदा आद्या द्रव्यार्थिनो मताः ।
सैद्धान्तिकानां चत्वारः पर्यायार्थगताः परे ॥ १८ ॥

नैगमः संग्रहश्चैव व्यवहारर्जुसूत्रकौ ।
शब्दः समभिरूढाख्य एवम्भूतश्च सप्त ते ॥ १९ ॥

निगमेषु भवो बोधो नैगमस्तत्र कीर्तितः ।
तद्भवत्वं पुनर्लोकप्रसिद्धार्थोपगन्तृता ॥ २० ॥

तत्प्रसिद्धिश्च सामान्यविशेषाद्युभयाश्रया ।
तदन्यतरसंन्यासे व्यवहारो हि दुर्घटः ॥ २१ ॥

संग्रहः संगृहीतस्य पिण्डितस्य च निश्चयः ।
संगृहीतं परा जातिः पिण्डितं त्वपराः स्मृता ॥ २२ ॥

एकद्वित्रिचतुःपञ्चषड्भेदा जीवगोचराः ।
भेदाभ्यामस्य सामान्यविशेषाभ्यामुदीरिताः ॥ २३ ॥

उपचारा विशेषाश्च नैगमव्यवहारयोः ।
इष्टा ह्यनेन नेष्यन्ते शुद्धार्थे पक्षपातिना ॥ २४ ॥

उपचारेण बहुलो विस्तृतार्थश्च लौकिकः ।
यो बोधो व्यवहाराख्यो नयोऽयं लक्षितो बुधैः ॥ २५ ॥

दह्यते गिरिरध्वासौ याति स्रवति कुण्डिका ।
इत्यादिरुपचारोऽस्मिन् बाहुल्येनोपलभ्यते ॥ २६ ॥

विस्तृतार्थो विशेषस्य प्राधान्यादेष लौकिकः ।
पञ्चवर्णादि भृङ्गादौ श्यामत्वादि विनिश्चयात् ॥ २७ ॥

पञ्चवर्णाभिलापेऽपि श्रुतव्युत्पत्तिशालिनाम् ।
न तद्बोधे विषयताऽपरांशे व्यावहारिकी ॥ २८ ॥

भावत्वे वर्तमानत्वव्याप्तिधीरविशेषिता ।
ऋजुसूत्रः श्रुतः सूत्रे शब्दार्थस्तु विशेषितः ॥ २९ ॥

इष्यतेऽनेन नैकत्रावस्थान्तरसमागमः ।
क्रियानिष्ठाभिदाधारद्रव्याभावाद्यथोच्यते ॥ ३० ॥

पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित् ।
नासंयतः प्रव्रजति भव्योऽसिद्धो न सिध्यति ॥ ३१ ॥

दह्यमानेऽपि शाट्येकदेशे स्कन्धोपचारतः ।
शाटी दग्धेति वचनं ज्ञेयमेतन्नयाश्रयम् ॥ ३२ ॥

विशेषिततरः शब्दः प्रत्युत्पन्नाश्रयो नयः ।
तरप्प्रत्ययनिर्देशाद्विशेषिततमेऽगतिः ॥ ३३ ॥

ऋजुसूत्राद्विशेषोऽस्य भावमात्राभिमानतः ।
सप्तभङ्ग्यर्पणाल्लिङ्गभेदादेवार्थभेदतः ॥ ३४ ॥

सामानाधिकरण्यं चेन्न विकारापरार्थयोः ।
भिन्नलिङ्गवचःसंख्यारूपशब्देषु तत्कथम् ॥ ३५ ॥

नयः समभिरूढोऽसौ यः सत्स्वर्थेष्वसंक्रमः ।
शब्दभेदेऽर्थभेदस्य व्याप्त्यभ्युपगमश्च सः ॥ ३६ ॥

तटस्तटं तटीत्यादौ शब्दभेदोऽर्थभिद्यदि ।
तद् घटः कुम्भ इत्यादौ कथं नेत्यस्य मार्गणा ॥ ३७ ॥

संज्ञार्थतत्त्वं न ब्रूते त्वन्मते पारिभाषिकी ।
अनादिसिद्धः शब्दार्थो नेच्छा तत्र निबन्धनम् ॥ ३८ ॥

एवम्भूतस्तु सर्वत्र व्यञ्जनार्थविशेषणः ।
राजचिह्नैर्यथा राजा नान्यदा राजशब्दभाक् ॥ ३९ ॥

सिद्धो न तन्मते जीवः प्रोक्तः सत्त्वादिसंज्ञ्यपि ।
महाभाष्ये च तत्त्वार्थभाष्ये धात्वर्थबाधतः ॥ ४० ॥

जीवोऽजीवश्च नो जीवो नोअजीव इतीहिते ।
जीवः पञ्चस्वपि गतिष्विष्टो भावैर्हि पञ्चभिः ॥ ४१ ॥

नञि सर्वनिषेधार्थे पर्युदासे च संश्रिते ।
पुद्गलप्रभृतिद्रव्यमजीव इति संज्ञितम् ॥ ४२ ॥

नोजीव इति नोशब्दे जीवसर्वनिषेधके ।
देशप्रदेशौ जीवस्य तस्मिन् देशनिषेधके ॥ ४३ ॥

जीवो वा जीवदेशो वा प्रदेशो वाप्यजीवगः ।
अनयैव दिशा ज्ञेयो नोअजीवपदादपि ॥ ४४ ॥

नैगमो देशसंग्राही व्यवहारर्जुसूत्रकौ ।
शब्दः समभिरूढश्चेत्येवमेव प्रचक्षते ॥ ४५ ॥

भावमौदयिकं गृह्णन्नेवम्भूतो भवस्थितम् ।
जीवं प्रवक्त्यजीवं तु सिद्धं वा पुद्गलादिकम् ॥ ४६ ॥

नोअजीवश्च नोजीवो न जीवाजीवयोः पृथक् ।
देशप्रदेशौ नास्येष्टाविति विस्तृतमाकरे ॥ ४७ ॥

सिद्धो निश्चयतो जीव इत्युक्तं यद्दिगम्बरैः ।
निराकृतं तदेतेन यन्नयेऽन्त्येऽन्यथा प्रथा ॥ ४८ ॥

आत्मत्वमेव जीवत्वमित्ययं सर्वसंग्रहः ।
जीवत्वप्रतिभूः सिद्धेः साधारण्यं निरस्य न ॥ ४९ ॥

यज्जीवत्वं क्वचिद्द्रव्यभावप्राणान्वयात् स्मृतम् ।
विचित्रनैगमाकूतं तज्ज्ञेयं न तु निश्चयात् ॥ ५० ॥

धात्वर्थे भावनिक्षेपात् परोक्तं न च युक्तिमत् ।
प्रसिद्धार्थोपरोधेन यन्नयान्तरमार्गणा ॥ ५१ ॥

शैलेश्यन्त्यक्षणे धर्मो यथा सिद्धस्तथाऽसुमान् ।
वाच्यं नेत्यपि यत्तत्र फले चिन्तेह धातुगा ॥ ५२ ॥

उक्ता नयार्थास्तेषां ये शुद्ध्यशुद्धी वदेत् सुधीः ।
ते प्रदेशप्रस्थकयोर्वसतेश्च निदर्शनात् ॥ ५३ ॥

तथाहि–धर्माधर्माकाशजीवस्कन्धानां नैगमो नयः ।
तद्देशस्य प्रदेशश्चेत्याह षण्णां तमुच्चकैः ॥ ५४ ॥

दासेन मे खरः क्रीतो दासो मम खरोऽपि मे ।
इति स्वदेशस्वाभेदात् पञ्चानामाह संग्रहः ॥ ५५ ॥

व्यवहारस्तु पञ्चानां साधारण्यं न वित्तवत् ।
इति पञ्चविधो वाच्यः प्रदेश इति मन्यते ॥ ५६ ॥

पञ्चप्रकारः प्रत्येकं पञ्चविंशतिधा भवेत् ।
प्रत्येकवृत्तौ प्राक्पक्षः स्याद्गेहेष्विव वाजिनाम् ॥ ५७ ॥

प्रत्येकवृत्तिः साकाङ्क्षा बहुत्वेनेति सोऽप्यसन् ।
ऋजुसूत्रस्ततो ब्रूते प्रदेशभजनीयताम् ॥ ५८ ॥

भजनाया विकल्पत्वाद्व्यवस्थैवमपैति तत् ।
धर्मे धर्मः प्रदेशो वा धर्म इत्यादिनिर्णयः ॥ ५९ ॥

जीवे स्कन्धेऽप्यनन्ते नोशब्दाद्देशावधारणम् ।
इति शब्दनयं प्राह समासद्वयशुद्धिमान् ॥ ६० ॥

ब्रूते समभिरूढस्तु भेदाप्तेरत्र सप्तमीम् ।
देशप्रदेशनिर्मुक्तमेवम्भूतस्य वस्तु सत् ॥ ६१ ॥

प्रस्थकार्थं व्रजामीति वने गच्छन् ब्रवीति यत् ।
आदिमो ह्युपचारोऽसौ नैगमव्यवहारयोः ॥ ६२ ॥

अत्र प्रस्थकशब्देन क्रियाविष्टवनैकधीः ।
प्रस्थकेऽहं व्रजामीति ह्युपचारोऽपि च स्फुटः ॥ ६३ ॥

छिनद्मि प्रस्थकं तक्ष्णोम्युत्किराम्युल्लिखामि च ।
करोमि चेति तदनूपचाराः शुद्धताभृतः ॥ ६४ ॥

तमेतावति शुद्धौ तूत्कीर्णनामानमाहतुः ।
चितं मितं तथा मेयारूढमेवाह संग्रहः ॥ ६५ ॥

प्रस्थकश्चर्जुसूत्रस्य मानं मेयमिति द्वयम् ।
न कर्तृगताद्भावाच्छब्दानां सोऽतिरिच्यते ॥ ६६ ॥

लोके च तिर्यग्लोके च जम्बूद्वीपे च भारते ।
क्षेत्रे तद्दक्षिणार्द्धे च पाटलीपुत्रपत्तने ॥ ६७ ॥

गृहे च वसतिः कोणे नैगमव्यवहारयोः ।
अतिशुद्धौ तु निवसन् वसतीत्याहतुः स्म तौ ॥ ६८ ॥

तदर्थस्तत्र तत्कालावच्छिन्ना तस्य वृत्तिता ।
वसत्यद्य न सोऽत्रेति व्यवहारौचिती ततः ॥ ६९ ॥

यत्र तत्र गतस्यापि तद्वासित्वं निगद्यते ।
तद्वासवृत्तिभागित्वे ज्ञेयं तत्त्वौपचारिकम् ॥ ७० ॥

संग्रहो वसतिं ब्रूते जन्तोः संस्तारकोपरि ।
ऋजुसूत्रः प्रदेशेषु स्वावगाहनकृत्सु खे ॥ ७१ ॥

तेष्वप्यभीष्टसमये न पुनः समयान्तरे ।
चलोपकरणत्वेनान्यान्यक्षेत्रावगाहनात् ॥ ७२ ॥

स्वस्मिन् स्ववसतिं प्राहुस्त्रयः शब्दनयाः पुनः ।
एषानुयोगद्वारेषु दृष्टान्तमययोजना ॥ ७३ ॥

शुद्धा ह्येतेषु सूक्ष्मार्था अशुद्धा स्थूलगोचराः ।
फलतः शुद्धतां त्वाहुर्व्यवहारे न निश्चये ॥ ७४ ॥

क्रियाक्रियाफलौचित्यं गुरुः शिष्यश्च यत्र न ।
देशनानिश्चयस्यास्य पुंसां मिथ्यात्वकारणम् ॥ ७५ ॥

परिणामे नयाः सूक्ष्मा हिता नापरिणामके ।
न वातिपरिणामे च चक्रिणो भोजनं यथा ॥ ७६ ॥

आमे घटे यथा न्यस्तं जलं स्वघटनाशकृत् ।
तथाऽपरिणते शिष्ये रहस्यं नयगोचरम् ॥ ७७ ॥

पृथक्त्वे नाधिकारस्तन्नयानां कालिकश्रुते ।
अधिकारस्त्रिभिः प्रायो नयैर्व्युत्पत्तिमिच्छताम् ॥ ७८ ॥

तेनादौ निश्चयोद्ग्राह्यो नग्नानामपहस्तितः ।
रसायनीकृतविषप्रायोऽसौ न जगद्धितः ॥ ७९ ॥

उन्मार्गकारणं पापं परस्थाने हि देशना ।
बालादेर्नान्ययोग्यं च वचो भेषजवद्धितम् ॥ ८० ॥

ये सीदन्ति क्रियाभ्यासे ज्ञानमात्राभिमानिनः ।
निश्चयानिश्चयं नैते जानन्तीति श्रुते स्मृतम् ॥ ८१ ॥

इष्टः शब्दनयैर्भावो निक्षेपा निखिलाः परैः ।
मतं मङ्गलवादेऽन्यद्विदां द्रव्यार्थिके त्रये ॥ ८२ ॥

द्रव्यार्थे गुणवाञ्जीवः पर्यायार्थे च तद्गुणः ।
सामायिकमिति प्रोक्तं यद्दिशावश्यकादिषु ॥ ८३ ॥

घटोपयोगरूपो वा भावो द्रव्यार्थिकेऽमतः ।
तेन तत्र त्रयं प्रोक्तमिति जानीमहे वयम् ॥ ८४ ॥

तत्र नामघटः प्रोक्तो घटनाम्ना पटादिकः ।
तच्चित्रं स्थापनाद्रव्यं मृद्भावो रक्तिमादिकः ॥ ८५ ॥

एकद्रव्येऽप्यात्मनामाकृतिकारणकार्यताः ।
पुरस्कृत्य महाभाष्ये दिष्टा पक्षान्तरेण ते ॥ ८६ ॥

अप्रज्ञाप्याभिधाद्रव्यजीवद्रव्याद्ययोगतः ।
न चाव्यापित्वमेतेषां तत्तद्भेदनिवेशतः ॥ ८७ ॥

इतीयं प्रायिकी व्याप्तिरभियुक्तैर्निरूप्यते ।
यत्तत्पदाभ्यां व्याप्तिश्चानुयोगद्वारनिश्चिता ॥ ८८ ॥

आदिष्टजीवद्रव्याभ्यां द्रव्यन्यासस्य संभवम् ।
अप्रज्ञाप्ये जिनप्रज्ञानाम्नश्च ब्रुवते परे ॥ ८९ ॥

तच्चिन्त्यमुपयोगो यन्नाम द्रव्यार्थिकस्य न ।
नरादेर्द्रव्यजीवत्वे सिद्धे स्याद्भावजीवता ॥ ९० ॥

आदिष्टद्रव्यहेतुत्वाद्द्रव्यद्रव्यप्रतिश्रुतौ ।
भावद्रव्यं न किंचित् स्याद्गुणेऽपि द्रव्यतार्पणात् ॥ ९१ ॥

अन्ये तु द्रव्यजीवो धीसंन्यस्तगुणपर्ययः ।
तदसन्नधिया तेषां संन्यासः स्यात्सतां यतः ॥ ९२ ॥

संग्रहे स्थापना नेष्टा तस्या नाम्नैव संग्रहात् ।
किं नेन्द्रचित्रं नामेन्द्र इन्द्रनामकपिण्डवत् ॥ ९३ ॥

नामातिरिक्तो नामेन्द्रो लक्ष्य इन्द्रपदस्य हि ।
तस्य मुख्यार्थसादृश्यैर्वैसदृश्ये च नाग्रहः ॥ ९४ ॥

इदं कैश्चिन्मतं तच्च भाष्ये दूषितमुच्चकैः ।
नाम्नैव द्रव्यनिक्षेपेऽप्येवं संग्रहसंभवात् ॥ ९५ ॥

परिणामितया द्रव्यं वाचकत्वेन नाम च ।
भावस्थमिति भेदश्चेन्नाम्नेन्द्रे दुर्वचं ह्यदः ॥ ९६ ॥

परिणामित्वभिन्नश्चेन्नामनिक्षेपलक्षकः ।
संबन्ध इष्टः साम्यादिभिन्नः किं न तथेष्यते ॥ ९७ ॥

अतिप्रसङ्गो नैवं चाभिप्रायाकारयोगतः ।
यच्छ्रुतोक्तमनुल्लङ्घ्य स्थापना नाम चान्यतः ॥ ९८ ॥

अत एव न धीरर्हत्प्रतिमायामिवार्हतः ।
भावसाधोः स्थापना या द्रव्यलिङ्गिनि कीर्तिता ॥ ९९ ॥

सा हि स्थाप्या स्मृतिद्वारा भावादर्शविधायिनी ।
न चोत्कटतरे दोषे स्थाप्यस्थापकभावना ॥ १०० ॥

यद्वा प्रतिष्ठाविधिना स्वात्मन्येव परात्मनः ।
स्थापना स्यात् समापत्तिर्बिम्बे सा चोपचारतः ॥ १०१ ॥

प्रतिष्ठितप्रत्यभिज्ञासमापन्नपरात्मनः ।
आहार्यारोपतः स्याच्च द्रष्टृणामपि धर्मभूः ॥ १०२ ॥

तत्कारणेच्छाजनकज्ञानगोचरबोधकाः ।
विधयोप्युपयुज्यन्ते तेनेदं दुर्मतं हतम् ॥ १०३ ॥

प्रतिष्ठाद्यनपेक्षायां शाश्वतप्रतिमार्चने ।
अशाश्वतार्चापूजायां को विधिः किं निषेधनम् ॥ १०४ ॥

पूजादिविधयो ज्ञानविध्यङ्गित्वं यदाश्रिताः ।
शाश्वताशाश्वतार्चासु विभेदेन व्यवस्थिताः ॥ १०५ ॥

एतेन व्यवहारेऽपि स्थापनानाग्रहो हतः ।
तत्रार्धजरतीयं किं नाम्नापि व्यवहर्तरि ॥ १०६ ॥

ऋजुसूत्रेऽपि ये द्रव्यनिक्षेपं प्रवदन्ति न ।
व्याख्येया तैः कथं तत्र द्रव्यावश्यकसूत्रगीः ॥ १०७ ॥

तस्माद्यथोक्तनिक्षेपबिभागो भाष्यसंमतः ।
इतीयं मुहुरालोच्या निक्षेपनययोजना ॥ १०८ ॥

जातं द्रव्यास्तिकाच्छुद्धाद्दर्शनं ब्रह्मवादिनाम् ।
तत्रैके शब्दसन्मात्रं चित्सन्मात्रं परे जगुः ॥ १०९ ॥

अशुद्धाद्व्यवहाराख्यात्ततोऽभूत् सांख्यदर्शनम् ।
चेतनाचेतनद्रव्यानन्तपर्यायदर्शकम् ॥ ११० ॥

यद्यप्येतन्मतेऽप्यात्मा निर्लेपो निर्गुणो विभुः ।
अध्यासाद्व्यवहारश्च ब्रह्मवादेऽपि संमतः ॥ १११ ॥

प्रत्युतात्मनि कर्तृत्वं सांख्यानां प्रातिभासिकम् ।
वेदान्तिनां त्वनिर्वाच्यं मतं तद्व्यावहारिकम् ॥ ११२ ॥

अनुत्पन्नत्वपक्षश्च निर्युक्तौ नैगमे श्रुतः ।
नेति वेदान्तिसांख्योक्त्योः संग्रहव्यवहारता ॥ ११३ ॥

तथाप्युपनिषद्दृष्टिः सृष्टिवादात्मिका परा ।
तस्यां स्वप्नोपमे विश्वे व्यवहारलवोऽपि न ॥ ११४ ॥

सांख्यशास्त्रे च तन्नात्मव्यवस्था व्यवहारकृत् ।
इत्येतावत्पुरस्कृत्य विवेकः संमतावयम् ॥ ११५ ॥

हेतुर्मतस्य कस्यापि शुद्धोऽशुद्धो न नैगमः ।
अन्तर्भावो यतस्तस्य संग्रहव्यवहारयोः ॥ ११६ ॥

द्वाभ्यां नयाभ्यामुन्नीतमपि शास्त्रं कणाशिना ।
अन्योऽन्यनिरपेक्षत्वान्मिथ्यात्वं स्वमताग्रहात् ॥ ११७ ॥

स्वतन्त्रव्यक्तिसामान्यग्रहा येऽत्र तु नैगमे ।
औलूक्यसमयोत्पत्तिं ब्रूमहे तत एव हि ॥ ११८ ॥

ऋजुसूत्रादितः सौत्रान्तिकवैभाषिकौ क्रमात् ।
अभूवन् सौगता योगाचारमाध्यमिकाविति ॥ ११९ ॥

नयसंयोगजः शब्दालंकारादिश्च विस्तरः ।
कियान् वाच्यो वचस्तुल्यसंख्या ह्यभिहितानया ॥ १२० ॥

स्याद्वादनिरपेक्षैश्च तैस्तावन्तः परागमाः ।
ज्ञेयोपयुज्य तदियं दर्शने नययोजना ॥ १२१ ॥

नास्ति नित्यो न नो कर्ता न भोक्तात्मा न निर्वृतिः ।
तदुपायश्च नेत्याहुर्मिथ्यात्वस्थानकानि षट् ॥ १२२ ॥

षडेतद्विपरीतानि सम्यक्त्वस्थानकान्यपि ।
मार्गत्यागप्रवेशाभ्यां फलतस्तत्त्वमिष्यते ॥ १२३ ॥

स्वरूपतस्तु सर्वेऽपि स्युर्मिथोऽनिश्रिता नयाः ।
मिथ्यात्वमिति को भेदो नास्तित्वास्तित्वनिर्मितः ॥ १२४ ॥

धर्म्यंशे नास्तिको ह्येको बार्हस्पत्यः प्रकीर्तितः ।
धर्मांशे नास्तिका ज्ञेयाः सर्वेऽपि परतीर्थिकाः ॥ १२५ ॥

इत्थमेव क्रियावादे सम्यक्त्वोक्तिर्न दुष्यति ।
मिथ्यात्वोक्तिस्तथाज्ञानाक्रियाविनयवादिषु ॥ १२६ ॥

क्रियायां पक्षपातो हि पुंसां मार्गाभिमुख्यकृत् ।
अन्त्यपुद्गलभावित्वादन्येभ्यस्तस्य मुख्यता ॥ १२७ ॥

क्रियानयः क्रियां ब्रूते ज्ञानं ज्ञाननयः पुनः ।
मोक्षस्य कारणं तत्र भूयस्यो युक्तयो द्वयोः ॥ १२८ ॥

विज्ञप्तिः फलदा पुंसां न क्रिया फलदा मता ।
मिथ्याज्ञानात्प्रवृत्तस्य फलासंवाददर्शनात् ॥ १२९ ॥

क्रियैव फलदा पुंसां न ज्ञानं फलदं मतम् ।
यतः स्त्रीभक्ष्यभोगज्ञो न ज्ञानात्सुखितो भवेत् ॥ १३० ॥

ज्ञानमेव शिवस्याध्वा मिथ्यासंस्कारनाशनात् ।
क्रियामात्रं त्वभव्यानामपि नो दुर्लभं भुवेत् ॥ १३१ ॥

तण्डुलस्य यथा वर्म यथा ताम्रस्य कालिका ।
नश्यति क्रियया पुत्र ! पुरुषस्य तथा मलः ॥ १३२ ॥

बठरश्च तपस्वी च शूरश्चाप्यकृतव्रणः ।
मद्यपा स्त्री सती चेति राजन्न श्रद्दधाम्यहम् ॥ १३३ ॥

ज्ञानवान् शीलहीनश्च त्यागवान् धनसंग्रही ।
गुणवान् भाग्यहीनश्च राजन्न श्रद्दधाम्यहम् ॥ १३४ ॥

इति युक्तिवशात्प्राहुरुभयोस्तुल्यकक्षताम् ।
मन्त्रेऽप्याह्वानं देवादेः क्रियायुग्ज्ञानमिष्टकृत् ॥ १३५ ॥

ज्ञानं तुर्ये गुणस्थाने क्षायोपशमिकं भवेत् ।
अपेक्षते फले षष्ठगुणस्थानजसंयमम् ॥ १३६ ॥

प्रायः संभवतः सर्वगतिषु ज्ञानदर्शने ।
तत्प्रमादो न कर्तव्यो ज्ञाने चारित्रवर्जिते ॥ १३७ ॥

क्षायिकं केवलज्ञानमपि मुक्तिं ददाति न ।
तावन्नाविर्भवेद्यावच्छैलेश्यां शुद्धसंयमः ॥ १३८ ॥

व्यवहारे तपोज्ञानसंयमा मुक्तिहेतवः ।
एकः शब्दर्जुसूत्रेषु संयमो मोक्षकारणम् ॥ १३९ ॥

संग्रहस्तु नयः प्राह जीवो मुक्तः सदा शिवः ।
अनवाप्तिभ्रमात्कण्ठस्वर्णन्यायात् क्रिया पुनः ॥ १४० ॥

अनन्तमर्जितं ज्ञानं त्यक्ताश्चानन्तविभ्रमाः ।
न चित्रं कलयाप्यात्मा हीनोऽभूदधिकोऽपि वा ॥ १४१ ॥

धावन्तोऽपि नयाः सर्वे स्युर्भावे कृतविश्रमाः ।
चारित्रगुणलीनः स्यादिति सर्वनयाश्रितः ॥ १४२ ॥

सुनिपुणमतिगम्यं मन्दधीदुष्प्रवेशं
प्रवचनवचनं न क्वापि हीनं नयौघैः ।
गुरुचरणकृपातो योजयंस्तान् पदे यः
परिणमयति शिष्यांस्तं वृणीते यशःश्रीः ॥ १४३ ॥

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशु-
स्तत्त्वं किञ्चिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥ १४४ ॥

## ॥ आध्यात्मिकमतपरीक्षा ॥

श्रीवर्धमानं जिनवर्धमानं नमामि तं कामितकामकुम्भम् ।
आकारभेदेऽपि कुबुद्धिभेदे शस्त्रस्य तुल्यं यदुपज्ञशास्त्रम् ॥ १ ॥

बन्धोदयोदीरणसत्पदाख्यमुवोष कर्मेन्धनमिद्धतेजाः ।
ध्यानानलेन प्रबलेन यो न्वः समग्रवित्पातु स वीरदेवः ॥ २ ॥

नत्वा श्रीवीरतीर्थेशं कुतीर्थिकमदापहम् ।
स्थाप्यते कवलाहारस्तत्प्रसादाज्जिनेशितुः ॥ ३ ॥

अर्हतां यद्यतिशयाश्चतुस्त्रिंशत्ततो न किम् ।
विशेषसिद्धिः सामान्यसिद्धिमाक्षिपति स्फुटम् ॥ ४ ॥

व्यापकं कारणं कार्यं सार्वज्ञ्येन विरुध्यते ।
ननु तत्कवलाहारस्तेषां नाभ्युपगम्यते ॥ ५ ॥

तदप्यसत्तस्य वेद्योदीरणं व्यापकं न यत् ।
दर्शनावरणी निद्रा बुभुक्षा मोह एव च ॥ ६ ॥

पात्राभावाद्ध्यानविघ्नान्मोहाभावादवृद्धितः ।
परमौदारिकाङ्गानां ननु नाहारसंभवः ॥ ७ ॥

अङ्गवत्पात्रधरणेऽप्यप्रमत्तस्य न क्षतिः ।
गतिवत् स न मोहोत्थो न च ध्यानं तदेष्यते ॥ ८ ॥

पुद्गलोपचयाद्वृद्धिस्त्वौदारिकशरीरिणाम् ।
जिनानां हि भवेत्तेन भग्नं नग्नाटनाटकम् ॥ ९ ॥

परमौदारिकाङ्गानां सप्तधातुविवर्जितः ।
भुक्तिं नापेक्षते कायस्तदसंभवबाधितः ॥ १० ॥

अप्रमत्तगुणस्थानां न भुक्तिश्चेत् कुतः परः ।
बन्दीव प्रतिबन्दीयं सिद्धान्तवचनस्य नः ॥ ११ ॥

व्यभिचाराकुलं शुक्ललेश्यावत्त्वं प्रमत्तकैः ।
तद्विशिष्टमलेश्यत्वमसिद्धं चाप्रयोजकम् ॥ १२ ॥

क्षुदादयः केवलिनामेकादश परीषहाः ।
वेदनीयोदयोद्भूताः कवलाहारसाक्षिणः ॥ १३ ॥

किं रागहान्यतिशयो यथा तथा नैषु भुक्त्यभावस्य ।
आहारकथामात्रात् कथं च साधोः प्रमत्तत्वम् ॥ १४ ॥

वेद्योदयेऽपि तौल्याद्भुक्तिकथायाश्च मोहजनकत्वात् ।
प्रतिषेद्धव्य इति लपन्नुपासकाध्ययनटीकाकृत् ॥ १५ ॥

परम्परापराघातसंजातमतिविप्लवाः ।
तदेवं प्रतिषेद्धव्या युक्तिभिर्हरिदम्बराः ॥ १६ ॥

एवं साम्प्रतमुद्भवदाध्यात्मिकमतनिर्दलनदक्षम् ।
रचितमिदं स्थलममलं विकचयतु सतां हृदयकमलम् ॥ १७ ॥

समजनि यत्स्थलमेतत्सुकृतं सृजतोऽनुसृत्य वृद्धवचः ।
मम तेन भव्यलोको बोधिमणेः सुलभतां लभताम् ॥ १८ ॥

## ॥ अट्ठारससहस्ससीलंगाइरहा ॥

शीलाङ्गरथः

**जे नो करंति मणसा, णिज्जियआहारसन्नसोइंदी ।**
**पुढवीकायारम्भे, खंतिजुआ ते मुणी वंदे ॥ १ ॥**

भावार्थः :- यः क्षमाशीलः, पृथ्वीकायाऽऽरम्भं श्रोत्रेन्द्रियनिग्रहवान्, आहारसंज्ञाजयवान्, मनसा न करोमि

गुणकारा एवम् :- १०X१०=१००, १००X५=५००, ५००X४=२०००, २०००X३=६०००, ६०००X३=१८००० ।

अस्यां रीत्यां १८ सहस्राणि गाथा एवम् :-

जे कारंति न मणसा, जेऽणुमण्णंति ण मणसा तथा वयसा, तणुणा तथा णिज्जियभयसन्नु, इत्यादि तथा चक्खिन्दी.... इत्यादि तथा आउकायारंभे... वणस्सइआरंभे, बेइन्दियआरंभे.... पंचिंदियआरंभे, अजीवकायारंभे तथा समद्दवा, सअज्जवा, मुत्तिजुआ, तवजुआ, ससंजमा, सच्चजुआ, सोअजुआ, अकिंचणा, बंभजुअ त्ति

आलोचनाङ्गरथः

**कयचउसरणो णाणी, नियमियअसणो अ नाणअइआरं ।**
**आलोइअ पुढविजीए, अरिहसमक्खं खमावेमि ॥ २ ॥**

भावार्थः :- अर्हत्समक्षं पृथ्वीकायिकान् ज्ञानातिचारमालोच्य नियमिताऽशनो ज्ञानी कृतचतुःशरणश्चाहं क्षमयामि ।

गुणकारा एवम् :- १०X१०=१००, १००X५=५००, ५००X४=२०००, २०००X३=६०००, ६०००X३=१८००० ।

अस्यां रीत्यां १८ सहस्राणि गाथा एवम् :-

दुक्कडगरही, सुकडाणुमोई तथा सम्मी, चरणी तथा नियमिअपाणो, ०खाइमो, ०साइमो तथा दंसणऽइयारं, चरित्तअइयारं, तवअईयारं, वीरियऽइयारं तथा आउजीए.... पंचिंदिजिए, जणसंघे तथा सिद्ध-गणधर-केवलि-अवधिजिन-मनःपर्यायजिन-श्रुतजिन-साधु-श्रावका-ऽऽत्मसमक्षमिति

तपोऽङ्गरथः

**अविरयाऽणसणमणो, मणसंलीणो सुदव्वतणुक्लेसो ।**
**अप्पाहारोणुदरिओ, सित्थतवो खीरमावज्जे ॥ ३ ॥**

**अप्पाहार( १ )अवड्ढा( २ ),दुभाग( ३ )पत्ता( ४ )तहेवकिंचूणा( ५ )।**
**अट्ठ दुवालस सोलसचउवीसतहिक्कतीसा य ॥ ४ ॥**

भावार्थः :- क्षीरं वर्जयामि, सिक्थतपाः, अल्पाहाराभिधोनोदरीमान्, सुद्रव्यतनुक्लेशवान्, मनःसंलीनः, अविरतोऽप्यनशनमना अहम्।
गुणकारा एवम् :- १०X१०=१००, १००X५=५००, ५००X४=२०००, २०००X३=६०००, ६०००X३=१८००० ।
अस्यां रीत्यां १८ सहस्राणि गाथा एवम् :-
घृत-दधि-तैल-गृह-पक्वान्न-मधु-मद्य-मांस-म्रक्षणानि वर्जयामि तथा कवल....इत्यादि(दशधा)तपाः तथा अपार्ध-द्विभाग-प्राप्त-किञ्चिदूनोनोदरीमान् तथा सुक्षेत्र-सुकाल-सुभावतनुक्लेशवान् तथा वयसंलीणो, तणुसंलीणो तथा देसअणसणमणो, सव्वअणसणमणु त्ति

दशविधचक्रवालसामाचारीरथः

**मणगुत्तो सन्नाणी, पसमियकोहो अ इरियसमिओ अ ।**
**पुढविजीए रक्खंतो, इच्छाकारी नमो तस्स ॥ ५ ॥**

भावार्थः :- इच्छाकारी, पृथ्वीजीवान् रक्षन्, ईर्यासमितः, प्रशमितक्रोधः, सज्ज्ञानी, मनोगुप्तो यो मुनिस्तस्मै नमः ।
गुणकाराः पूर्ववत्, एवमेवाग्रेतनेषु चतुर्दशस्वपि रथेषु)

अस्यां रीत्यां १८ सहस्राणि गाथा एवम् :-

मिच्छाकारी, तहक्कारी, आवस्सईवं, नीसीहीवं, आपुच्छणवं, पडिपुच्छणवं, छंदणकारी, निमंतणवं, उवसंपण्णो तथा आउजीए,....... रक्खंतो, तथा भाषा....... समितः तथा प्रशमितमानः ०लोभः तथा सम्मद्दिट्ठी, सच्चरणी तथा वयगुत्तो तणुगुत्तु त्ति

संयमरथः

**हिंसइ न सयं मणसा, पेहासंजमजुओ सुइरियाइ ।**
**इच्छाकारेण जुओ, जावज्जीवं पुढवीकायं पि ॥ ६ ॥**

भावार्थः :- पृथ्वीकायम्, इच्छाकारेण, ईर्यया च युतः, इच्छाकारेणापि युतः, मनसा, स्वयं न हिनस्ति ।

गुणकाराः पूर्ववद्,

गाथार्थपरावर्तना :-

आउकायं ........ तथा मिच्छाकारेण .......... तथा सुभासाए .......... परिठवणेणं तथा उवेहासंजुओ, पमज्जणजुओ, परिट्ठवणसंजुओ तथा हिंसावइ नो मणसा, हिंसंतं न मुणे मणसा तथा वयसा, तणुण त्ति

धर्मरथः

**उड्ढदिसि नारिजीवो, दाणं विअरइ विसोयविसयमणो ।**
**पुढवीजिए रक्खंतो, खंतिखमो जावजीवं पि ॥ ७ ॥**

(परावर्तना :- अहोदिसि, तिरियदिसि तथा पुरिसजीवो, कीवजीवो तथा सीलं पालइ, तवमणुतप्पइ, भावं भावेइ तथा विचक्खुविसयमणो, विरसविसयमणो.......... तथा आउजीए...... तथा समद्दवो, सअज्जवो)

श्रमणरथः

**न हणेइ सयं साहू, मणसा आहारसन्नसुंवुडओ ।**
**सोइंदिसंवरणो, पुढवीजिए खंतिसंपुण्णो ॥ ८ ॥**

(परावर्तना प्रथमगाथावत्)

निन्दारथ:

**मोहवसेणं मणसा, देवभवे सद्द-असणसन्नाए ।**
**जं मे बद्धं पावं, अखंतिमंतेण तं निंदे ॥ ९ ॥**

(परावर्तना :- रागवसेणं, दोसवसेणं तथा वयसा तणुणा तथा मणुअभवे तिरिअभवे नरयभवे तथा रूव०, रस०, गन्ध०, फास०, तथा० भयसन्नाए, लोगसन्नाए ओहसन्नाए तथा अमद्दवेण..... त्ति)

परमेष्ठिरथ:

**भद्दं नाणजुआणं, जईण जिणवयण-जिणथुईकराणं ।**
**पाणिवहणियत्ताणं, इच्छाकारं भणंताणं ॥ १० ॥**

(परावर्तना :- वुड्ढी, कित्ती तथा दिट्ठिजुआणं, चरणजुआणं तथा पवयण० इत्यादि(चतुर्भिः) तथा सिद्धथुई०, आयरियथुई०, उवज्झायथुई०, साहुत्थुई० तथा अलियवयणियत्ताणं...... इत्यादि (दशानाम्) तथा मिच्छाकारं....... (१०) त्ति

स्वाध्यायस्तपोरथोवा

**नाणरुई देहविवेगी अट्टविवज्जिअ सुवायणिओ ।**
**गुरु-वेयावच्चकरो, सुज्झइ आलोइउ कोइ ॥ ११ ॥**

(परावर्तना :- सम्मरुई, चरणरुई तथा उवहिविवेगी, समत्तकसाई तथा रुद्दविवज्जिअ०, धम्मसुजुत्त०, सुक्कसुजुत्त० तथा सुपुच्छणिओ, परवत्ताणिओ, अणुपेहजुओ, धम्मकहजुत्तो तथा वायगवेयावच्चकरो....... इत्यादि (१०) तथा पडिकमणओ, तदुभया, विवेगओ, काउस्सगा, तवस्सिउं, च्छेयओ, मूलओ, ऽणवट्ठप्पा, पारंचिअ त्ति)

संसारपरिभ्रमणरथ:

**उड्ढदिसि पुरिसजीवो, कोही सोइंदियस्स सुहहेओ ।**
**जो हणइ पुढवीजीवे, सो संसारं परिभमइ ॥ १२ ॥**

(परावर्तना :- तिरिखदिसि, अहदिसि तथा कीवजीवो, नारिजीवो तथा माणी, माई, लोभी तथा चक्खिंदिअस्स.... (५) तथा आउजीवे .... (५) तथा भवाडविं सो न लंघे, सोऽखिलकम्मं पवत्तावे, सो जिट्ठठिइं पवत्तावे, सो तिव्वरसं पवत्तावे, सो बहुपासे पवत्तावे, सो दुक्खोहं परिवहइ, सो सुग्गइं न पावेइ, सो भावारी पवत्तावे, सो सिद्धिसुहं न पावेइ त्ति)

शुभलेश्यारुचिरथः

**जो तेउल्लेस मणसा, उवक्कमे उवसमिय सम्मत्ते ।**
**निसग्गरुइं धरंतो, आगमधारिं णमंसामि ॥ १३ ॥**

(परावर्तना :- पउलेस, सुक्कलेस तथा वयसा, तणुणा तथा णिक्खेवे, अणुगमे, णयेसु तथा सासाणसम्मते खउवसमसम्मते, वेयगम्मि सम्मत्ते, खाइयम्मि सम्मत्ते तथा उवएसरुइं, आणारुइं, सुत्तरुइं, बीयरुइं, अभिगमरुइं, वित्थाररुइं, किरियरुइं, संखेवरुइं, धम्मरुइं तथा सुअगणहरं सुत्तधरं तं, गंथधरं तं, सिद्धंतधरं, सासणधारिं, आणाधारिं, वयणधरं तं, उवएसधरं, पण्णवणऽज्जं ति)

प्रत्याख्यानरथः

**नाणविऊ वि य मणसा पिंडत्थज्झाण समाइयवयलीनो ।**
**णवकारसहिअमणागयं कया करिस्सामि भावेणं ॥ १४ ॥**

(परावर्तना :- (ज्ञानमवध्यादि) आगमविउए (=दशपूर्वधरादीन्), सुत्तविउए (=तदन्यश्रुतानि विदुषः) तथा वयसा, तणुणा तथा पयत्थ०, रूवत्थ०, अरूवि० तथा छेउवट्ठाओ, परिहारवओ, सुहुमसंपरओ, ऽहक्खायवयलीणो तथा पोरिसिमणागयं च,

पुरिमड्ढमणागयं च,
एगासणं अणागयं, एगट्ठाणमणागयं, आयंबिलमणागयं, अभत्तट्ठमणागयं, चरिममणागयं च, अभिग्गहमणागयं, विगइच्चागमणागयं तथा
अणागयमइक्कंतं, कोडिसहिअं, नियंटिअं, अणागारं, सागारं, निरवसेसं, परिमाणकडं, संकेअं, अद्धं ति)

अशुभलेश्यात्रिकरथः

**जो किण्हलेस मणसा, इत्थकहाई ऽय अभिग्गहविवज्जं ।**
**पुढविजीए रक्खंतो, खंतिजुए साहू वंदामि ॥ १५ ॥**

(परावर्तना :- नीललेस, काउलेस तथा वयसा, कायसा तथा भत्तकहाइ, देसकहाइ, रायकहाइ तथा अणभिगहवज्जं, अभिणिविसवज्जं, संसइयवज्जं, ऽणभोगविवज्जं तथा आउजीए, .... जणसंघे तथा समद्दवे, ....... अकिंचणि त्ति)

कामावस्थारथः

**जे कामरागरहिआ, मणसा देवेसु सद्दविसयम्मि ।**
**चिंतावत्थं ण गया, खंतिजुआ ते मुणी वंदे ॥ १६ ॥**

(परावर्तना :- णेहराग०, दिट्ठिराग० तथा वयसा, तणुणा तथा मणुएसु, तिरिएसु, नरएसु तथा रूव०, रस०, गंध०, फास० तथा पत्थावत्थं, सद्धावत्थं, संभरणं, विक्कवयं, लज्जाणासं पमायऽवत्थं, उम्मत्तयं, तब्भावयं, मरणाऽवत्थं
(एतासामवस्थानां प्रवचनसारोद्धारटीकानुसारेणार्थः,)
(१) अहो रूपादयस्तस्या गृह्या इत्यनुरागेण चिन्तनं=चिन्ता
(२) अदृष्टेऽपि रमण्यादौ श्रुत्वा तदभिलाषमात्रम्=प्रार्थः
(३) तत्सङ्गमाभिलाषः श्रद्धाः
(४) आलेख्यादौ तद्रूपदर्शनेनात्मनो विनोदनम्=संस्मरणम्

(५) तद्विरहदुःखातिरेकेण हासादिष्वपि निरपेक्षता=विक्लवता
(६) गुर्वादिसमक्षमपि तद्गुणोत्कीर्तनम्=लज्जानाशः
(७) तदर्थमेव सर्वारम्भेषु प्रवर्तनम्=प्रमादः
(८) नष्टचित्ततयाऽऽलजालजल्पनम्=उन्मत्तता
(९) स्तम्भादीनामपि तद्बुद्ध्याऽऽलिङ्गनादिचेष्टा=तद्भावः
(१०) मरणमिव=मरणम्, निश्चेष्टाऽवस्था मूर्च्छाप्राया काचिद्, न तु सर्वथा प्राणपरित्यागलक्षणेयम्] तथा समद्दवा, ...... अकिंचणं त्ति

ईर्यापथिकीरथः

**उवसमधरेण मणसा, कोहविमुक्को अ इरियसमिओ ।**
**पुढविकाइअजीवा, अभिहया ते खमावेमि ॥ १७ ॥**

(परावर्तना :- सविवेगेण, संवरधरेण तथा वयसा, तणुणा तथा माणविमुक्को, माय०, लोभ० तथा भाससमिओ.......... (५) तथा आउकाइअ.... १० तथा वत्तिया..... (१०) इति.)

मिथ्यात्वरथः

**चउसरणगओ नाणी, वज्जिअअसणो अ नाणअइआरं ।**
**आलोइय पुढविजीए, खमित्ता जिणवरं वंदे ॥ १८ ॥**

(परावर्तना :- गरहियदुकडो, अणुमयसुकडो तथा सड्ढी विरओ तथा० पाणो, ०खाइमो, ०साइमो तथा दंसणऽइयारं, चरित्तअइयारं, तवस्स अइयारं, वीरियऽइयारं तथा आउजीए........ (१०) तथा सिद्धऽप्पणो, सूरिणो, सुयधरे, साहुणो, चेइये, वयधरे, धम्मयं, पवयणं, दंसणं, ति)

मिथ्यात्वपरिहाररथः

**धम्मत्थिओ वि मणुओ, मणसा कोहं जिणित्तु कंदप्पिं ।**
**उग्गमदोसमधम्मे, धम्मसन्नं परिहरेइ ॥ १९ ॥**

(परावर्तना :- पुण्णत्थी, सुरभोगट्ठी तथा वयसा, कायसा तथा माणं.... (४) तथा किव्विसिं, अभिओगं, आसुरिं, संमोहं तथा उप्पायणदोस..... (१०) तथा धम्मे अधम्मसन्नं, उम्मग्गे मग्गसन्नं, मग्गे उम्मग्गसन्नं, साहुसु असाहुसन्नं, असाहुसु साहुसन्नं, जीवे अजीवसन्नं, अजीवे जीवसन्नं, मुत्ते अमुत्तसन्नं, अमुत्ते मुत्तसन्नं ति)

## ॥ श्रीशङ्खेश्वरपार्श्वजिनस्तोत्रम् ॥

अनन्तविज्ञानमपास्तदोषं महेन्द्रमान्यं महनीयवाचम् ।
गृहं महिम्नां महसां निधानं शङ्खेश्वरं पार्श्वजिनं स्तवीमि ॥ १ ॥

महानुभावस्य जनुर्जनुष्मतां गुणस्तवैरेव दधाति हृद्यताम् ।
घनं वनं कान्तवसन्तसम्पदा पिकीरवैरेव समृद्धमीक्ष्यते ॥ २ ॥

अवर्ण्यसंवर्णनकश्मलाविलः स्वकार्यरक्तस्य कवेर्गिरां रसः ।
गुणस्तवैर्देव ! तवातिनिर्मलो भवत्यवश्यं कतकोत्करोपमैः ॥ ३ ॥

गुणास्त्वदीया अमिता इति स्तुता-वुदासते देव ! न धीधना जनाः।
मणिष्वनन्तेषु महोदधेरहो न किं प्रवृत्तेरुपलम्भसम्भवः ? ॥ ४ ॥

भवद्गुणैरेव न चेदवेष्टयं स्वयं गिरं चित्रकवल्लिमुच्चकैः ।
तदा न किं दुर्जनवायसैरसौ क्षणाद् विशीर्येत निसर्गभीषणैः ॥ ५ ॥

न जानते नाथ ! यथा पथःस्थितिं प्रगल्भमानाश्च नृपानुपासते ।
श्रियं लभन्ते च विशृङ्खलाः खला इतीदमुच्चैः कलिकालचेष्टितम्॥६॥

अमीषु तीर्थेश ! खलेषु यत् पटुर्भवद्भुजिष्यस्तदिहासि कारणम् ।
हविर्भुजां हेतिषु यन्न दह्यते करः परस्तत्र गुणो महामणेः ॥ ७ ॥

कलौ जलौघे बहुपङ्कसङ्करे गुणव्रजे मज्जति सज्जनार्जिते ।
प्रभो ! वरीवर्ति शरीरधारिणां तरीव निस्तारकरी तव स्तुतिः ॥ ८ ॥

खलैः किमेतैः कलिकाललालितैर्विपश्चितां नाथ ! यदि प्रसीदसि ।
पराक्रमः कस्तमसां महीयसां तनोति भासं महसां पतिर्यदि ॥ ९ ॥

अमूढलक्ष्यत्वमिहेश ! दुर्जने न सम्यगब्धाविव तत्त्वचालनम् ।
कथा नु कोलाहलतां विगाहते ततः कथं नाथ ! बुधः प्रवर्तताम्॥१०॥

यथा पथा यात्युपमृद्य कण्टकान् जनो मनोऽभीहितबद्धलालसः ।
त्वदाज्ञया देव ! निहत्य दुर्जनान् तथा विधेयैव कथा विपश्चिता॥११॥

संवादसारा भवदागमा यज्जगच्चमत्कारकराः स्फुरन्ति ।
उच्छृङ्खलानां नियतं खलानां मुखे मषीलेपमहोत्सवोऽसौ ॥ १२ ॥

भवन्तमुत्सृज्य विलीनरागं परं भजन्ते स्वहितार्थिनो ये ।
तेषां वयं देव ! सचेतनानां विद्मो विशेषं किमचेतनेभ्यः ॥ १३ ॥

मोहावृतानामपि शास्त्रपाठो हहा महानर्थकरः परेषाम् ।
रागैकलुब्धस्य हि लुब्धकेभ्यो वधाय नूनं हरिणस्य कर्णौ ॥ १४ ॥

शमो दमो दानमधीतिनिष्ठा वृथैव सर्वं तव भक्तिहीनम् ।
भावक्रियां नैव कविप्रबन्धो रसं विना यच्छति चारुबन्धः ॥ १५ ॥

अन्तर्मुहूर्तं विहितं तपोऽपि त्वदाज्ञया देव ! तमस्तृणेढि ।
विना तु तां हन्त ! युगान्तराणि कथापि न क्लेशकृतां शिवस्य॥ १६ ॥

अज्ञानजं बन्धनमङ्गभाजां ज्ञानं विना देव ! कथं व्यपैति ।
अधर्मजं जाड्यमुपैति नाशं न घर्मरश्मेर्हि विना प्रतापम् ॥ १७ ॥

न ज्ञानमात्रादपि कार्यसिद्धिर्विना चरित्रं भवदागमेऽस्ति ।
अपीक्षमाणः पदवीं न पङ्गुर्विना गतिं हन्त ! पुरं प्रयाति ॥ १८ ॥

संसारसिन्धाविह नास्ति किञ्चिदालम्बनं देव ! विना त्वदाज्ञाम् ।
तया विहीनाः परकष्टलीना हहा महामोहहताः पतन्ति ॥ १९ ॥

महोषधी जन्मजरामयानां महार्गला दुर्गतिमन्दिरस्य ।
खानिः सुखानां कृतकर्महानिराज्ञा त्वदीयास्ति जिनेन्द्रचन्द्र !॥ २० ॥

रागं च कोपं च न नाथ ! धत्से स्तुत्यस्तुतीनां च फलं प्रदत्से ।
लोकोत्तरं किञ्चिदिदं त्वदीयं शीलं समाशीलितविश्वलीलम् ॥ २१ ॥

त्वद्ध्यानबद्धादरमानसस्य त्वद्योगमुद्राभिनिविष्टबुद्धेः ।
तवोपदेशे निरतस्य शश्वत् कदा भविष्यन्ति शमोत्सवा मे ॥ २२ ॥

अकुर्वतः सम्प्रति लब्धबोधिं समीहमानस्य परां च बोधिम् ।
न साम्प्रतं किञ्चन साम्प्रतं तद् दयस्व दीनं परमार्थहीनम् ॥ २३ ॥

निर्वेदमुख्यं च भवन्तमेव नाथन्ति नाथं यतयो न चान्यम् ।
सुधार्थमुच्चैर्विबुधाः सुधांशुं नाथन्ति नान्यं ग्रहमप्युदारम् ॥ २४ ॥

त्वत्तो न तीर्थेश ! परः कृपालुर्मत्तः कृपापात्रमपीह नान्यः ।
अतोऽस्ति योग्योऽवसरः कृपाया ब्रुवे किमन्यज्जगदीशितारम्॥ २५ ।

अथास्ति चेदेष जनः समन्तुस्तथाप्यहो ! ते किमुपेक्षणीयः ? ।
सकण्टकं किं न सरोजखण्डमुन्मीलयत्यंशुभिरंशुमाली ॥ २६ ॥

कृपावतां न स्वकृतोपकारे सदोषनिर्दोषविचारणास्ति ।
समं घनः सिञ्चति काननेषु निम्बं च चूतं च घनाभिरद्भिः ॥ २७ ॥

मुखं प्रसन्नं हसितेन्दुबिम्बं नेत्रे कृपार्द्रे जितपद्मपत्रे ।
पद्मासनस्था च तनुः प्रशान्ता न योगमुद्रापि तवाप्युतान्यैः ॥ २८ ॥

त्वद्योगमुद्रामपि वीक्षमाणाः प्रशान्तवैराः पुरुषा भवन्ति ।
विशिष्य वक्तुं कथमीशमहे तत् तवान्तरङ्गं प्रशमप्रभावम् ॥ २९ ॥

मूर्तिस्तव स्फूर्तिमती जनार्तिविध्वंसिनी कामितचित्रवल्ली ।
विश्वत्रयीनेत्रचकोरकाणां तनोति शीतांशुरुचां विलासम् ॥ ३० ॥

फणामणीनां घृणिभिर्भुवीश ! मूर्तिस्तवाभाति विनीलकान्तिः ।
उद्भिन्नरक्ताभिनवप्रवालप्ररोहमिश्रेव कलिन्दकन्या ॥ ३१ ॥

तवेश ! मौलौ रुचिराः स्फुरन्ति फणाः फणीन्द्रप्रवरस्य सप्त ।
तमोभरं सप्तजगज्जनानां धृता निहन्तुं किमु सप्त दीपाः ॥ ३२ ॥

त्वन्मौलिविस्फारफणामणीनां भाभिर्विनिर्यत्तिमिरासु दिक्षु ।
स्वकान्तिकीर्तिप्रशमात् प्रदीपाः शिखामिषात् खेदमिवोद्गिरन्ति॥३३॥

ध्यानानले सप्तभयेन्धनानि हुतानि तीव्राभयभावनाभिः ।
इतीव किं शंसितुमीश ! दध्रे मौलौ त्वया सप्तफणी जनेभ्यः ॥ ३४ ॥

अष्टापि सिद्धीर्युगपत् प्रदातुं किमष्ट मूर्त्तीस्त्वमिहानतानाम् ।
सप्तस्फुरद्दीप्तफणामणीनां क्रोडेषु सङ्क्रान्ततनुर्दधासि ॥ ३५ ॥

यद्येकनालानि समुल्लसेयुः सरोवरे कोकनदानि सप्त ।
तदोपमीयेत तवेश ! मौलौ तैरुच्चकैः सप्तफणी प्रदीप्रा ॥ ३६ ॥

भवेषु तीर्थेश ! चतुर्षु सारं मानुष्यकं यत्र तवास्ति सेवा ।
श्लाध्यो हि शैलेषु सुमेरुरेव यत्राप्यते कल्पमहीरुहश्रीः ॥ ३७ ॥

नृजन्म दुःखैकगृहं मुनीन्द्रैः प्रशस्यते त्वत्पदसेवयैव ।
सौरभ्यलोभात् सुधियः फणीन्द्रैरप्यावृतं चन्दनमाद्रियन्ते ॥ ३८ ॥

अवाप्य मानुष्यकमप्युदारं न येन तेने तव देव ! सेवा ।
उपस्थिते तेन फले सुरद्रोः करार्पणालस्यमकारि मोहात् ॥ ३९ ॥

जनुर्मनुष्यस्य दिवः शतेन क्रीणामि चेन्नास्मि तदाप्यविज्ञः ।
यत्र त्वदाज्ञाप्रतिपत्तिपुण्यादमुत्र तज्जैत्रमहोदयाप्तिः ॥ ४० ॥

स्तोमैः सुमानां तव देव ! पूजा पूज्यत्वहेतुर्जगतां जनानाम् ।
भवत्तनौ स्नात्रजलाभिषेकः साक्षादयं पुण्यसुरद्रुसेकः ॥ ४१ ॥

गुणैस्त्वदीयैर्ग्रथितां स्तुतिस्त्रजं स्वयं च ये कण्ठगतां वितन्वते ।
अभङ्गसौभाग्यवशीकृता इव श्रियो वरीतुं परितो भ्रमन्त्यमुम्॥ ४२ ॥

विनोदवत् त्वन्नुतिगोचरं मनो घनोत्सवे मन्नयने त्वदीक्षिणी ।
त्वदङ्घ्रिनम्रो मम मौलिरालयः श्रियः प्रियस्त्वज्जपविस्तरःकरः ॥४३॥

त्वदास्यसंवीक्षणशर्मवञ्चिते नयोज्झितानां नयने निरर्थके ।
भवत्कथाकर्णनरागहीनयोर्न भारतोऽन्यत् फलमस्ति कर्णयोः॥ ४४ ॥

पुष्पाणि पाणिर्न ललौ यदीयस्त्वदीयपूजाविधये प्रमादात् ।
अमुष्य दूरे भवदुःखहानिर्भाग्योज्झितस्येव सुवर्णखानिः ॥ ४५ ॥

भूयासमिन्द्राच्र्य ! भवद्भुजिष्यस्तव क्रमाम्भोजमधुव्रतः स्याम् ।
वहेय मौलौ परमां त्वदाज्ञां स्तवे भवेयं तव सावधानः ॥ ४६ ॥

त्वमीशिताहं तव सेवकश्चेत् ततः परा का पदवी विशिष्टा ? ।
समेधमानेऽत्र हि सन्निकर्षे पुरन्दरर्द्धिः प्रथते पुरस्तात् ॥ ४७ ॥

परेषु दोषास्त्वयि देव ! सद्गुणा मिथोऽवलेपादिव नित्यमासते ।
स्फुरन्ति नेन्दावपतन्द्रचन्द्रिकास्तमोभरा वा किमु सिंहिकासुतेः॥४८॥

विशङ्कमङ्के दधते विलासिनीर्विशिष्टमिच्छन्ति च देवतायशः ।
परे तदेते ज्वलता हविर्भुजा वितन्वते तापसमापनार्थिताम् ॥ ४९ ॥

कुदृष्टिभिर्देवतया श्रितेषु वा परेषु दोषोऽस्ति न नाम कश्चन ।
न मूढरूप्यभ्रमभाजनेष्वपि प्रवर्तते रङ्गगणेषु दुष्टता ॥ ५० ॥

सरागता चेज्जिनदेवमाश्रयेत् तमस्तदा तिग्मरुचं पराभवेत् ।
विरागता वा यदि तं न संश्रयेत् तदा प्रकाशोऽपि न भानुमालिनम्॥५१।

गवां विलासस्तव देव ! भास्वतस्तमोभरं घ्नन्ति भुवि प्रसृत्वरम् ।
अशेषदोषोपशमैकवृत्तयः प्रकाशमन्तः परमं प्रकुर्वते ॥ ५२ ॥

इदं महच्चित्रमहीनजातिजोऽप्युदग्रभोगप्रसरात् पराङ्मुखः ।
जनार्दनायोगकृतप्रसिद्धिभाग् न वैनतेयश्रियमातनोऽसि न ॥ ५३ ॥

जिनाऽसहायेन विनिर्जितक्रुधा विना जिगीषां च विना रणोत्सवम् ।
त्वया जितं यद् द्विषतां कदम्बकं जगज्जनानन्दकरं न किन्नु तत्॥५४॥

उपेक्षमाणोऽप्युपकृत्य कृत्यविज्जगत्त्रयीं यद् दुरितादुदीधरः ।
परः सहस्रा अपि हन्त ! तत्परे यशो न शोद्धुं निरताः प्रतारकाः ॥ ५५

हरेः समीपे हरिणा यदासते स्फुरन्ति नागाः पुरतो गरुत्मतः ।
अयं प्रभावस्तव कोऽप्यनुत्तरो विपश्चितां चेतसि हर्षवर्षदः ॥ ५६ ॥

अलौकिकी योगसमृद्धिरुच्चकैरलौकिकं रूपमलौकिकं वचः ।
न लौकिकं किञ्चन ते समीक्ष्यते तथापि लोकत्वधिया हताः परे ५७॥

विनैव दानं ततदानकीर्तये विना च शास्त्राध्ययनं विपश्चिते ।
विनानुग्रगं भवते कृपावते जगज्जनान्दकृते नमो नमः ॥ ५८ ॥

स्मरापहस्याप्यभवस्य विस्फुरत्सुदर्शनस्याप्यजनार्दनस्य च ।
न नाभिजातस्य तवातिदुर्वचं स्वरूपमुच्चैः कमलाश्रयस्य ॥ ५९ ॥

चतुर्मुखोऽङ्गीकृतसर्वमङ्गलो विराजसे यन्नरकान्तकारणम् ।
विरञ्चिगौरीशमुकुन्दसञ्ज्ञिता सुरत्रयी तत् त्वयि किं न लीयते ६० ॥

वृथा कथासौं परदोषघोषणैस्तव स्तुतिर्विश्वजनातिशायिनः ।
प्रसिद्धिहीनादनपेक्ष्य तुल्यतां भवेदलीकातिशयान्न वर्णना ॥ ६१ ॥

अलं कलङ्कैर्भणितैः परेषां निजैर्गुणैरेव तवास्ति शोभा ।
महोभरैरेव तव प्रसिद्धिः पतङ्गनिन्दानिकरैः किमस्य ? ॥ ६२ ॥

कृतप्रसर्पद्रथचक्रचूर्णितक्षमारजःकैतवपापचूर्णनैः ।
अनारतं त्वं जिन ! सङ्घनायकैरुपास्यते (से) मङ्गलनादसादरैः॥ ६३ ॥

स्त्रियः प्रियध्वानमुपेत्य तन्वते तथा पुरस्ते जिन ! सङ्घसङ्गताः ।
यथा तदाकर्णनजातविस्मया भवन्ति सर्वाः स्तिमिताः सुरप्रियाः॥६४॥

प्रियस्वनैः सङ्घजनैस्त्वदालयप्रदक्षिणादानपरायणैर्घनैः ।
महान्तरीपं परितः प्रसृत्वरा अनुक्रियन्ते जलधेर्महोर्मयः ॥ ६५ ॥

मृदङ्गवेणुध्वनिभिर्विसृत्वरैः समुच्छलत्पञ्चममूर्छनाभरैः ।
अनारतं सङ्घवृते त्वदालये शिवश्रियो नृत्यविधिर्विजृम्भते ॥ ६६ ॥

जगज्जनानन्दन ! चन्दनद्रवैस्त्वदङ्गमभ्यर्च्य ससान्द्रकुङ्कुमैः ।
कथं भजन्ते भुवि सङ्घमानवाः समग्रतापप्रशमेन निर्वृतिम् ?॥ ६७ ॥

अवेक्ष्य धूमं तव चैत्यमूर्धनि प्रसर्पिकृष्णागुरुधूपसम्भवम् ।
समुन्नमन्मेघधिया कलापिनामुदेत्य विश्रान्तमकाण्डताण्डवम्॥ ६८ ॥

वनं यथा पुष्पभरेण पावनं ग्रहव्रजैर्वा गगनं प्रकाशिभिः ।
तथा सदा सङ्ज्जनैरलङ्कृतैर्विराजते त्वद्भवनं श्रिया घनम् ॥ ६९ ॥

प्रसारयेत् कः पुरतः स्वपाणी कल्पद्रुमस्य त्वयि दानशौण्डे ? ।
काष्ठत्वसंसर्गजदोषजास्य श्रुता हि लीनालिमिषात् कुकीर्तिः ॥ ७० ॥

लब्ध्वा भवन्तं विदितं वदान्यं याचेत चिन्तामणिमादृतः कः ? ।
विधोरिवाङ्केन महस्विनोऽपि पाषाणभावेन दितं यशोऽस्य ॥ ७१ ॥

अभ्यर्थनीयाऽपि न कामधेनुः प्रसद्य सद्यो ददति त्वयीश ! ।
इयं पशुर्नाकिमनो धिनोतु पयोभरैरेव न दानकीर्त्या ॥ ७२ ॥

न पाटवं कामघटस्य दाने भिदेलिमस्योपलतः क्षणेन ।
सदा प्रदानोत्सवकान्तकीर्त्तिं विहाय तत्त्वां सजतीह को वा ?॥ ७३ ॥

त्वत्तः प्रसीदन्ति हि कामधेनुकल्पद्रुचिन्तामणिकामकुम्भाः ।
त्वदप्रसत्तौ च तदप्रसत्तिरिति त्वमेवासि बुधैर्निषेव्यः ॥ ७४ ॥

कायप्रयासेन निषेव्यमाणाश्चिरं नृपाः स्वल्पकृपा भवन्ति ।
भवांस्तु भक्त्यैव तनोति सर्वमनोरथान् इत्यखिलातिशायी ॥ ७५ ॥

स्वर्गापवर्गार्पणसावधानं त्वां याचते वैषयिकं सुखं कः ? ।
कल्पद्रुमं को बदरीफलानि याचेत वा चेतनया विहीनः ॥ ७६ ॥

त्वदीयसेवा विहिता शिवार्थं ददाति भोगानपि चानुषङ्गात् ।
कृषीबलाः शस्यकृते प्रवृत्ताः पलालजालं त्वनुषङ्गसङ्गि ॥ ७७ ॥

सितोपला त्वद्वचसा विनिर्जिता तृणं गृहीत्वा वदने पलायिता ।
क्षणादसङ्कुच्यत हारहूरया ततस्त्र(त्र)पानिर्गतकान्तिपूरया ॥ ७८ ॥

रसैर्गिरस्ते नवभिर्मनोरमाः सुधासु दृष्टा बहुधापि षड् रसाः ।
अतोऽनयोः कः समभावमुच्चरेद् वरेण्यहीनोपमितिर्विडम्बना॥ ७९ ॥

तृणैकजात्येषु यदल्पसारता विचक्षणैरिक्षुषु दिक्षु गीयते ।
समग्रसारा तव भारती ततः कथं तदौपम्यकथाप्रथाऽसहा ॥ ८० ॥

भवद्वचःपानकृतां न नाकिनां सुरद्रुमाणां फलभोगनिष्ठता ।
द्विधाप्यमीषां न ततः प्रवर्तते फलैस्त्रपाभिश्च न भारनम्रता ॥ ८१ ॥

प्रकाममन्तःकरणेषु देहिनां वितन्वती धर्मसमृद्धिमुच्चकैः ।
चिरं हरन्ती बहु पङ्कसङ्करं सरस्वती ते प्रथते जगद्धिता ॥ ८२ ॥

स्फुरन्ति सर्वे तव दर्शने नयाः पृथग् नयेषु प्रथते न तत् पुनः ।
कणा न राशौ किमु कुर्वते स्थितिं कणेषु राशिस्तु पृथग् न वर्तते ॥८३॥

स्वतः प्रवृत्तैर्जिन ! दर्शनस्य ते मतान्तरैश्चेत् क्रियते पराक्रिया ।
तदा स्फुलिङ्गैर्महतो हविर्भुजः कथं न तेजःप्रसरत् पिधीयते ?॥ ८४ ॥

स्फुरन्नयावर्तमभङ्गभङ्गतरङ्गमुद्यत्पदरत्नपूर्णम् ।
महानुयोगहृदिनीनिपातं भजामि ते शासनरत्नराशिम् ॥ ८५ ॥

तवोपदेशं समवाप्य यस्माद् विलीनमोहाः सुखिनो भवामः ।
नित्यं तमोराहुसुदर्शनाय नमोऽस्तु तस्मै तव दर्शनाय ॥ ८६ ॥

न नाम हिंसाकलुषत्वमुच्चैः श्रुतं न चानाप्तविनिर्मितत्वम् ।
परिग्रहो नो नियमोज्झितानामतो न दोषस्तव दर्शनेऽस्ति ॥ ८७ ॥

'महाजनो येन गतः स पन्था' इति प्रसिद्धं वचनं मुनीनाम् ।
महाजनत्वं च महाव्रतानामतस्तदिष्टं हि हितं मतं ते ॥ ८८ ॥

समग्रवेदोपगमो न केषुचित् क्वचित् त्वसौ बुद्धसुतेऽपि वृत्तिमान् ।
अशेषतात्पर्यमति प्रसञ्जकं ततोऽपुनर्बन्धकतैव शिष्टता ॥ ८९ ॥

न वासनायाः परिपाकमन्तरा नृणां जडे तादृशतेति सौगताः ।
न कापिलास्तु प्रकृतेरधिक्रियाक्षयं तथा भव्यतयेति ते गिरः ॥ ९० ॥

इहापुनर्बन्धकभावमन्तरा बिभर्ति वाणी तव कर्णशूलताम् ।
विना किमारोग्यमतिं ज्वरोदये न याति मिष्टान्नततिर्विषात्मताम्॥ ९१ ॥

शास्त्राणि हिंसाद्यभिधायकानि यदि प्रमाणत्वकथां भजन्ते ।
हविर्भुजः किं न तदातितीव्राः पीयूषसाधर्म्यमवाप्नुवन्ति ॥ ९२ ॥

विधाय मूर्धानमधस्तपस्यया किमुच्चमन्त्रव्रतशीलशीलनैः ।
श्रुतं न शङ्केश्वरनाम विश्रुतं किमत्र विद्याव्रजबीजमुज्ज्वलम् ॥ ९३ ॥

मदाम्बुलुभ्यद्भ्रमरारवेण प्रवृद्धरोषं गिरितुङ्गकायम् ।
अश्रान्तमान्दोलितकर्णतालं प्रोन्मूलयन्तं विपिनं विशालम् ॥ ९४ ॥

करप्रहारैः कुलिशानुकारैः सन्त्रासयन्तं बहुवन्यजन्तून् ।
अभ्यापतन्तं द्विरदं निरीक्ष्य भियं जनास्त्वच्छरणा न यान्ति ॥ ९५ ॥

विदीर्णदन्तिव्रजकुम्भपीठव्यक्तक्षरद्रक्तरसप्रसक्तम् ।
गिरिप्रतिध्वानकरैः प्रणादैर्विध्वंसयन्तं करिणां विनोदम् ॥ ९६ ॥

अतुच्छपुच्छस्वनवारबिभ्यद्वराहमातङ्गचमूरुयूथम् ।
मृगारिमुद्वीक्ष्य न शङ्कते ते नाम स्मरन् नाथ ! नरो नितान्तम् ॥ ९७ ॥

तमालहिन्तालरसालतालविशालसालव्रजदाहधूमैः ।
दिशः समस्ता मलिना वितन्वन् दहन्निवाभ्रं प्रसृतैः स्फुलिङ्गैः ॥९८॥

मिथो मिलज्जालजटालमूर्तिर्दवानलो वायुजवात् करालः ।
त्वदीयनामस्मरणैकमन्त्राद् जलायते विश्वजनाभिवन्द्य ! ॥ ९९ ॥

स्फुरत्फणाडम्बरभीमकायः फूत्कारभारैरुदयद्विषायः ।
उल्लालयन् क्रूरकृतान्तदंष्ट्राद्वयाभजिह्वायुगलं प्रकोपात् ॥ १०० ॥

पापाणुभिः किं घटितः पयोदश्यामः फणीन्द्रस्तव नाममन्त्रात् ।
भृशं विशङ्कं व्रजतां समीपे न भीतिलेशं तनुते नराणाम् ॥ १०१ ॥

भटासिभिन्नद्विपकुम्भनिर्यन्मुक्ताफलैस्तारकिताभ्रदेशे ।
धनुर्विमुक्तैस्तव काण्डवृन्दैः प्रदर्शिताकाण्डतडिद्विलासे ॥ १०२ ॥

रणाङ्गणे धीरमृगारिनादैः पलायमानाखिलभीरुलोके ।
जयं लभन्ते मनुजास्त्वदीयपदाब्जसेवाप्रथितप्रसादाः ॥ १०३ ॥

उत्तालभूयः पवमानवेगादुल्लोलकल्लोलसहस्रभीष्मे ।
समुच्छलत्कच्छपनक्रचक्रसङ्घट्टनाभङ्गुरयानपात्रे ॥ १०४ ॥

पतन्महाशैलशिलारवेण गलत्प्रमीलीकृतपद्मनाभे ।
श्रियं लभन्ते भवतः प्रभावात् सांयात्रिका वीतभियः पयोधौ ॥१०५॥

जलोदरा दत्तदरा न जातु ज्वराःप्रशान्तप्रसरा भवन्ति ।
न पुष्टतां कुष्टरुजः प्रमेहा विदीर्णदेहा न समुद्भव(वह)न्ति॥ १०६ ॥

भगन्दरः प्राणहरः कथं स्यात् क्षणाद् व्रणानां क्षयमेति पीडा ।
ब्रूमः किमन्यत् तव नाममन्त्राद् रुजः समस्ता अपि यान्ति नाशम्॥१०७॥

आपादकण्ठार्पितशृङ्खलौघा व्रणैर्विशीर्णाः प्रतिगात्रदेशम् ।
व्यथावशेन क्षणमप्यशक्ता उच्छ्वासमुल्लासयितुं समन्तात् ॥ १०८ ॥

दशामवाप्ता भृशशोचनीयां विमुक्तरागा निजजीवितेऽपि ।
नरा जपन्तस्तव नाममन्त्रं क्षणाद् गलद्बन्धभया भवन्ति ॥ १०९ ॥

इत्यष्टभीतिदलनप्रथितप्रभावं नित्यावबोधभरबुद्धसमग्रभावम् ।
विश्वातिशायिगुणरत्नसमूहधाम ! त्वामेव देव ! वयमीश्वरमाश्रयामः॥११०॥

जिन ! कृपाढ्य ! भवन्तमयं जनस्त्रिजगतीजनवत्सल ! याचते ।
प्रतिभवं भवतो भवतात् कृपारससमये समये परमा रतिः ॥ १११ ॥

प्रणमहरिमण्डलीमुकुटनीलरत्नत्विषां
स्वकीयदशनत्विषामपि मिथः प्रसङ्गोत्सवे ।
सृजन्निव कलिन्दजा सुरतरङ्गिणीसङ्गमं
भवान् भवतु भूतये भवभृतां भवत्सेविनाम् ॥ ११२ ॥

इति जिनपतिर्भूयो भक्त्या स्तुतः शमिनामिन-
स्त्रिदशहरिणीगीतस्फीतस्फुरद्गुणमण्डलः ।
प्रणमदमरस्तोमः कुर्याज्जगज्जनवाञ्छित-
प्रणयनपटुः पार्श्वः पूर्णां यशोविजयश्रियम् ॥ ११३ ॥

# ॥ श्रीशमीनपार्श्वस्तोत्रम् ॥

........... ............. ............. .............. ।
........... ............. ............. .............. ॥ १ ॥

कल्यद्रुमोऽद्य फलितो लेभे चिन्तामणिर्मया ।
प्राप्तः कामघटः सद्यो यज्जातं तव दर्शनम् ॥ १ ॥

क्षीयते सकलं पापं दर्शनेन जिनेश ! ते ।
तृण्या प्रलीयते किं न ज्वलितेन हविर्भुजा ? ॥ २ ॥

मूर्त्तिः स्फूर्त्तिमती भाति प्रत्यक्षा तव कामधुक् ।
सम्पूरयन्ती भविनां सर्वं चेतःसमीहितम् ॥ ३ ॥

लोचने लोचने ह्येते ये त्वन्मूर्तिविलोकिनी ।
यद् ध्यायति त्वां सततं मानसं मानसं च तत् ॥ ४ ॥

सती वाणी च सा वाणी या त्वन्नुतिविधायिनी ।
येन प्रणम्रौ त्वत्पादौ मौलिर्मौलिः स एव हि ॥ ५ ॥

*मुखस्फूर्तिं तवोद्वीक्ष्य ज्योस्नामिव विसृत्वरीम् ।*
मुखानि कैरवाणीव हसन्ति नियतं सताम् ॥ ६ ॥

घटी पटीयसी सैव तद् गलद्वृजिनं दिनम् ।
समयोऽसौ रसमयो यत्र त्वद्दर्शनं भवेत् ॥ ७ ॥

श्रीशमीनाभिधः पार्श्वः पार्श्वयक्षनिषेवितः ।
इति स्तुतो वितनुतां यशोविजयसम्पदम् ॥ ८ ॥

..... ..... ..... ..... ..... ॥ ६ ॥

स्मरः स्मारं स्मारं भवदवथुमुच्चैर्भवरिपोः
पुरस्ते चेदास्ते तदपि लभते तां बत दशाम् ।
रिपुर्वा मित्रं वा द्वयमपि समं हन्त ! सुकृतो-
ज्झितानां किं ब्रूमो जगति गतिरेषास्ति विदिता ॥ ७ ॥

दृशां प्रान्तैः कान्तैर्नहि वितनुषे स्नेहघटनां
प्रसिद्धस्ते हस्ते न खलु कलितोऽनुग्रहविधिः ।
भवान् दाता चिन्तामणिरिव समाराधनकृता-
मिदं मत्वा सत्त्वा दधति तव धर्मे दृढरतिम् ॥ ८ ॥

स सेवाहेवाकैः श्रित इह परैर्यः शुभकृते
नियन्ता हन्तायं सजति गृहिणीं गाढमुरसा ।
भवेदस्मात् कस्मात् फलमनुचितारम्भरभसा-
ल्लतावृद्धिर्न स्याद् दवदहनतो जातु जगति ॥ ९ ॥

प्रदीपं विद्यानां प्रशमभवनं कर्मलवनं
महोमाहद्रोहप्रसरदवदाने(ते)न विदितम् ।
स्फुटानेकोद्देशं शुचिपदनिवेशं जिन ! तवो-
पदेशं निःक्लेशं जगदधिप ! सेवे शिवकृते ॥ १० ॥

अगण्यैः पुण्यैश्चेत् तव चरणपङ्केरुहरजः
शुचिश्लोका लोकाः शिरसि रसिका देव ! दधते ।
तदा पृष्ठाकृष्टा धृतधृतिरमीषां कृतधिया-
मविश्रान्तं कान्तं त्यजति न निशान्तं जलधिजा ॥ ११ ॥

उदारं यस्तारं तव समुदयत्पूषविलस-
न्मयूषे प्रत्यूषे जिनप ! जपति स्तोत्रमनिशम् ।

प्रसर्पद्दानाम्भःसुभगकरघ्यनां करटिनां
घट्य तस्य द्वारि स्फुरति सुभघ्यनामपि न किम् ? ॥ १२ ॥

महालोभक्षोभव्यसनरसिकं चेतसि यदि
स्फुरेद् वारं वारं कृतभवनिकारं त्वदभिधम् ।
तमोह्रासादासादितततविकासाय मुनये
तदा मायाकाया न खलु निखिला द्रुह्यति निशा ॥ १३ ॥

स्थलीषु प्रभ्रष्टान् शिवपथपथः सङ्घभविनो
विना त्वामन्यः कः पथि नयति दीपानुकृतिभिः ।
प्रभावादुद्भूतस्तव शुचिरितः कीर्तिनिकरः
करोत्यच्छं स्वेच्छं कलिमलिनमह्नाय भुवनम् ॥ १४ ॥

*विलोलैः कल्लोलैर्जवनपवनैर्दुर्दिनशता-*
हतोद्योतैः पोतैर्निकटविकटोद्यज्जलचरैः ।
जनानां भीतानां त्वयि परिणता भक्तिरवना (नौ)
जगद्बन्धो ! सिन्धोर्नयति विलयं कष्टमखिलम् ॥ १५ ॥

अटव्यामेकाकी नतनिखिलनाकीश ! पतितो
वृतायां कीनाशैरयि ! (रिव)हरिकरिव्याघ्रनिकरैः ।
जनस्तत्पूतात्मा भवन इव भीतिं न लभते
मनश्चेत् त्वन्नामस्मरणकरणोत्कं वितनुते ॥ १६ ॥

जपन्तस्त्वन्नाम प्रतिदशमि मन्त्राक्षरमयं
दशानामाशानां श्रियमुपलभन्ते कृतधियः ।
दशाप्याचाम्लैस्तु त्रिदशतरवः सन्निदधते
कृतैः किं वा न स्याद् दशनिरयवासार्तिविलयः ॥ १७ ॥

स्रजं भक्त्या जन्तुर्घनसुमनसां सौरभमयीं
न यः कण्ठे धत्ते तव भवभयार्तिक्षयकृतः ।

कथं प्रेत्याभ्येत्य त्रिदशतरुपुष्पस्त्रजमहो
शुभायत्तां धत्तां त्रिदशतरुणी तस्य हृदये ? ॥ १८ ॥

पिता त्वं बन्धुस्त्वं त्वमिह नयनं त्वं मम गति-
स्त्वमेवाऽसि त्राता त्वमसि च नियन्ता नतनृपः ।
भजे नान्यं त्वत्तो जगति भगवन् ! दैवतधिया
दयस्वातः प्रीतः प्रतिदिनमनन्तस्तुतिसृजम् ॥ १९ ॥

जगज्जैत्रैश्चित्रैस्तव गुणगणैर्यो निजमनः
स्थिरीकृत्याकृत्याद् भृशमुपरतो ध्यायति यतिः ।
इहाप्यस्योदेति प्रशमलसदन्तःकरणिका-
समप्रेमस्थेमप्रसरजयिनी मोक्षकणिका ॥ २० ॥

फणैः पृथ्वीं पृथ्वीं कथमिह फणीन्द्रः सुमृदुभि-
र्हरिन्नागा रागात् कथमतिभरक्लान्ततनवः ।
क्व कूर्मो वा धत्तां निभृततनुरेको जलचरः
पटुर्धर्मः शर्मप्रभव ! तव तां धर्तुमखिलाम् ॥ २१ ॥

ज्वलन् ज्वालाजालैर्ज्वलनजनितैर्देव ! भवता
बहिः कृष्टः काष्ठात् कमठहठपूरैः सह दितात् ।
नमस्कारैः स्फारैर्दलितदुरितः सद्‌गुणफणी
किमद्यापि प्रापि प्रथितयशसा नेन्द्रपदवीम् ॥ २२ ॥

महारम्भा दम्भाः शठकमठपञ्चाग्निजनिता-
स्त्वया दीर्णाः शीर्णाखिलदुरितकौतूहलकृता ।
किमाश्चर्यं वर्यं तदिह निहताः किं न रविणा
विनायासं व्यासं रजनिषु गता ध्वान्तनिकराः ॥ २३ ॥

ज्वलत्काष्ठक्रोडात् फणिपतिसमाकर्षणभवं
यशः कर्षत्युच्चैस्तव परयशःकारणगुणात् ।

इदं चित्रं काष्ठाद् बहिरपसृताज्जातमहितो
न यत् स्पष्टं काष्ठापसरणरसं हन्त ! वहति ॥ २४ ॥

द्विषत्तापव्यापप्रथनपटुभिर्मोहमथनैः
प्रतापैराक्रान्तस्तव न कमठः कान्तिमधृत ।
महोभिः सूरस्य प्रथितरुचिपूरस्य दलित-
द्युतिस्तोमः सोमः श्रयति किमु शोभालवमपि ? ॥ २५ ॥

विलासः पद्मानां भवति तमसामप्युपशमः
प्रलीयन्ते दोषा व्रजति भवपङ्कोऽपि विलयम् ।
प्रकाशः प्रोन्मीलेत् तव जिन ! जगज्जित्वरगुण !
प्रतापानां भानोरिव जगदभिव्याप्तिसमये ॥ २६ ॥

किमु स्पष्टैः कष्टैः किमु परिणतैरासनशतैः
प्रयोगा योगानां नहि भववियोगाय पटवः ।
त्वदाज्ञा चेदेका शिरसि न विवेकादुपहृता
विना वीर्यं कार्यं न भवति नृणां भेषजगणैः ॥ २७ ॥

नराः शीर्षे शेषामिव तव विशेषार्थविदुषः
शतै राज्ञामाज्ञामिह दधति ये देव ! महिताम् ।
अविश्रामैस्तेषामहमहमिकायातनृपति-
प्रणामैरुद्दामैः समुदयति कीर्तिर्दिशि दिशि ॥ २८ ॥

जगत्स्वामी चामीकररजतरत्नोपरचितै-
र्विशालैस्त्वं सालैः परमरमणीयद्युतिरसि ।
तव ब्रूते भूतेः समवसरणक्ष्माप्यतिशयं
ध्वजव्याजभ्राजत्सरसरसनादुन्दुभिरवैः ॥ २९ ॥

सभायामायाताः सुरनरतिरश्चां तव गणाः
स्फुटाटोपं कोपं न दधति न पीडामपि मिथः ।

न भीतिं नानीतिं त्वदतिशयतः केवलमिमे
सकर्णाः कर्णाभ्यां गिरमिह पिबन्ति प्रतिकलम् ॥ ३० ॥

गिरः पायं पायं तव गलदपायं किमभवन्
सुधापाने जाने नियतमलसा एव विबुधाः ।
तदक्षुद्रा मुद्रा सितमहसि पीयूषनिलये
निजायत्ता दत्ता जठरविलुठल्लक्ष्ममिषतः ॥ ३१ ॥

तनीयानप्युच्चैर्न पटुरशनीया परिभवः
पिपासापि क्वापि स्फुरति न भवद्गीःश्रवणतः ।
भवेत् साक्षाद् द्राक्षारसरसिकता हन्त ! बहुधा
सुधास्वादः सद्यः किमु समुदयेन्नाधिवसुधम् ॥ ३२ ॥

ब्रुवाणैर्गीर्वाणैर्जिन ! सितकरं कीर्तिनिकरं
तव प्रत्नै रत्नैर्झटिति घटिता धर्मपरिषत् ।
अमन्दा मन्दारद्रुमकुसुमसौरभ्यसुभगा
न किं चित्ते धत्ते भुवनभविनां मेदुरमुदम् ? ॥ ३३ ॥

'अशोक'स्ते श्लोकश्रवणजनितोऽयं जयति किं
शिरो धुन्वन् भूयश्चपलदलदम्भादतिमुदः ।
समस्तोदस्तोद्यद्दुरितपटलस्य प्रतिभुवः
शिवश्रीलाभस्य प्रथितगुणरत्नव्रजभुवः ॥ ३४ ॥

जगद्भानोर्जानोः सममसमसौरभ्यकलितं
पुरः के वा देवास्तव न दधते 'पुष्पनिकरम्' ।
प्रसर्पत्कन्दर्पस्मयमथनमुक्ताश्रव ! भवत्-
प्रभावादस्यापि व्रजति नियतं बन्धनमधः ॥ ३५ ॥

गलद्रोधं बोधं निजनिजगिरा श्रोतृनिकरा
लभन्ते हन्तेह त्वदुदित'गिरा' नात्तभिदया ।

इमां ते योगर्द्धिं न खलु कुशलाः स्पर्द्धितुमहो !
परे धाम क्रामद् गगनमिव सूर्यस्य शलभाः ॥ ३६ ॥

मुखेन्दुज्योत्स्नेव स्फुटतनुलसत्कान्तियमुना-
प्रशंसा हंसाली किमु किमुत पुण्यर्द्धिरखिला ? ।
स्मितश्रीः किं लक्ष्म्याः किमुत परमध्यानघटना
प्रभो ! त्वन्मौलिस्था विलसति सिता 'चामरततिः' ॥ ३७ ॥

न किं देवाः सेवां विदधति 'मृगेन्द्रासन' जुष-
स्तव प्रौढाम्भोदप्रतिमवपुषः पुण्यजनुर्षः ।
प्रदेशे स्वर्णाद्रेः क्वचन रुचिरे नन्दनवने
प्रियङ्गोः सङ्गोत्काः किमु न सततं षट्पदगणाः ॥ ३८ ॥

अभून्नेन्दुर्भूयःप्रभविभुमुखीभूय न सुखी
तमोग्रासोल्लासस्तदिह ननु मय्येव पतितः ।
इदं मत्वा सत्त्वात् किमु तव रविर्मौलिमधुना
श्रितो नेतश्चेतःसुखजनन 'भामण्डल' मिषात् ॥ ३९ ॥

स्फुरत्कैवल्यश्रीपरिणयनदिव्योत्सवमिव
त्रिलोकीलुण्टाकस्मरजयरमाताण्डवमिव ।
सदा धामस्थामप्रसरमिव शंसन्नतितरां
तवाकाशेऽकस्मात् स्फुरति पुरतो 'दुन्दुभिरवः' ॥ ४० ॥

परं चिह्नं विश्वत्रितयजयदिव्यव्यवसितेः
कृतव्यापत्तापत्रयविलयसौभाग्यनिलयः ।
धृतं हस्तैः शस्तैस्त्रिदशपतिभिः प्रेमतरलै-
र्भवन्मौलौ 'छत्रत्रय' मतितरां भाति भगवन् ! ॥ ४१ ॥

विलासो नारीणामिह खलु पराभूतिरुदिता
प्रसिद्धा चान्येषां तव च परमोहव्यवसितिः ।

इदं सर्वं साम्यं तदपि तव तैनैव तुलनां
सहर्षं भाषन्ते परमकवयः कौतुकमदः ॥ ४२ ॥

अपारव्यापारव्यसनरसनिर्माणविलय-
स्थितिक्रीडाव्रीडा न खलु तव विश्वे विलसति ।
न कोपं नारोपं न मदमदिरोन्मादमनिशं
न मोहं न द्रोहं कलयसि निषेव्योऽसि जगतः ॥ ४३ ॥

भवेद् भूतावेशः परतनुनिवेशः कथमहो !
परेषां संक्लेशः स्फुरति हि महामोहवशतः ।
न चेदेवं देवं यदि चपलयेन्नर्मरचना
विलीना दीनासौ तदिह भुवनेऽधीरिमकथा ॥ ४४ ॥

त्वदौपम्यं रम्यं यदि हतधियो ! हन्त ! ददते
परेषामुल्लेखात् प्रकृतहितदानस्य जगति ।
न किं ते भाषन्ते विषतरुषु कल्पद्रुतुलनां
प्रलापाः पापानां सपदि मदिरापानजनिताः ॥ ४५ ॥

निशाभ्यः प्रत्यूषे विफलबदरीभ्यः सुरतरौ
विषेभ्यः पीयूषे चुलुकसलिलेभ्यो जलनिधौ ।
गिरिभ्यः स्वर्णाद्रौ करिणि हरिणेभ्यः खलु यथा
तथान्येभ्यो नाथ ! त्वयि गुणसमृद्धेरतिशयः ॥ ४६ ॥

मुखं ते निस्तन्द्रं जितसकलचन्द्रं विजयते
कृपापात्रे नेत्रे हसितकजपत्रे विलसतः ।
त्वदङ्गो वामाक्षीपरिचयकलङ्कोज्झित इति
प्रभो ! मूर्तिस्फूर्तिस्तव शमरसोल्लासजननी ॥ ४७ ॥

तरी संसाराब्धेर्भुवनभविनां निर्वृतिकरी
सदा सद्यः प्रोद्यत्सुकृतशतपीयूषलहरी ।

जरीजृम्भड्डिम्भत्रिदशमणिकान्तिस्मयहरी
वरीवर्ति स्फूर्तिर्गतभव ! भवन्मूर्तिनिलया ॥ ४८ ॥

इमां मूर्तिस्फूर्तिं तव जिन ! समुद्वीक्ष्य सुदृशां
सुधाभिः स्वच्छन्दं स्नपितमिव वृन्दं ननु दृशाम् ।
कुदृष्टीनां दृष्टिर्भवति विषदिग्धेव किमतो
विना घूकं प्रीतिर्जगति निखिले किं न तरणेः ? ॥ ४९ ॥

इमां मूर्तिस्फूर्तिं तव जिन ! गतापायपटलं
नृणां द्रष्टुं स्पष्टं सततमनिमेषत्वमुचितम् ।
न देवत्वे ज्यायो विषयकलुषं केवलमदो
निमेषं निःशेषं विफलयतु वा ध्यानशुभदृक् ॥ ५० ॥

भवद्ध्यानस्नानप्रकृतिसुभगं मे सुहृदयं
पवित्रा चित्रा मे तव गरिमनुत्या भवतु गीः ।
प्रणामैः सच्छायस्तव भवतु कायश्च सततं
त्वदेकस्वामित्वं समुदितविवेकं विजयताम् ॥ ५१ ॥

अहीनत्वख्यातिं वहसि महसा पीनसुषमां
क्षमां बिभ्रद् भूयः फणमणिघृणिध्वस्ततिमिरः ।
तथाप्येतच्चित्रं क्षणमपि न कृ (तृ) ष्णाश्रयणकृत्
न वाधो निर्बाधो वसतिमितसिद्धिर्वितनुषे ॥ ५२ ॥

गलत्पोषा दोषास्त्वयि गुणगणाः क्लृप्तशरणा
गतक्षोभा शोभा हृदयमपि लोभादुपरतम् ।
त्विषां पात्रं गात्रं वदनमतिलावण्यसदनं
तवाक्षुद्रा मुद्रामृतरसकिरः पर्षदि गिरः ॥ ५३ ॥

विना बाणैर्विश्वं जितमिह गुणैरेव भवता
विना रागं चित्तं भुवनभविनां रञ्जितमपि ।

विना मोहं मुग्ध: श्रितबुधविनाङ्गीकृतशिवो
विरूपाक्षाकारं विगलितविकारं विजयसे ॥ ५४ ॥

गुणास्ते स्पर्द्धन्ते प्रसृमरशरच्चन्द्रनिकरान्
कथं व्यक्तं रक्तं भवति हृदयं तैर्भवभृताम् ।
कठोरं चेतस्ते यदपि कुलिशाद् घोरनियमे
कथं विश्वे विश्वेश्वरवर ! कृपाकोमलमद: ॥ ५५ ॥

मुनीनां ध्यानाब्धौ तव मुखविधोर्दर्शनरसात्
तरङ्गैरिङ्गद्भिः प्रशमरससंज्ञैः प्रसृमरैः ।
भृशं फेनायन्ते हतमदनसेना गुणगणाः
तवोच्चैः कैलाशद्युतिमदभिदायां सुनिपुणाः ॥ ५६ ॥

गुणास्ते ते हंसास्त्रिजगदवतंसायित ! चिरं
भजन्ते ये ध्यानामृतरसभृतं मानसमदः ।
भिदां तन्वन्त्येते बत परयशोमौक्तिकगणैः
कृताहाराः स्फारा न किमु पयसोर्दोषगुणयोः ॥ ५७ ॥

(अतः परं विशीर्णानि पद्यानि पञ्च)

विधिः कारं कारं गणयति नु रेखास्तव गुणान्
सुधाबिन्दोरिन्दोर्वियति विततास्तारकमिषाः ।
प्रतिश्यामायामान् व्रजति न विलासोऽस्य निधनं
ततो रिक्ते चन्द्रे पुनरपि निधत्तेऽमृतभरम् ॥ ६३ ॥

महो राहोर्नाहोमलिनमलिपङ्क्तिश्च धवला
बलाकामाकारा द्विकवृकपिकानामनुसृताः ।
न शैलाः कैलाशा इव किमभवन्नञ्जनमुखा
भृशं विश्वं विश्वं शिसयति भवत्कीर्तिनिकरे ॥ ६४ ॥

यशोभिस्तेऽशोभि त्रिजगदतिशुभ्रैर्भृशमित-
स्तिथिः सा का राका तिथिरिह न या हन्त ! भवति ।

कुहूर्नाम्नैवातः पिकवदनमातत्यशरणं
श्रिता साक्षादेषा परवदनवेषा विलसति ॥ ६५ ॥

यशोदुग्धाम्भोधौ भवति तव मीनाकृति नभो
ध्रुवं स्फारास्तारा जलकणतुलामीश ! दधते ।
किमावर्तः श्वभ्रं गिरीशगिरिगौरीशशशभृत्-
त्रिपिण्डी डिण्डीरद्युतिमुपगता नास्ति किमिह ॥ ६६ ॥

प्रयोगेऽस्मिन् विश्वे प्रसरति भवत्कीर्तिरनिशं
रसैस्तुङ्गा गङ्गा गिरीशगिरिशीतांशुविशदा ।
परेषां निःशेषा जिनवर ! कुकीर्तिश्च यमुना
घनाम्भोदश्यामा ननु महसहस्रापतदिह ॥ ६७ ॥

(इतः परं त्रुटितमस्ति त्रिनवतिश्लोक पर्यन्तम्)

कथा का ते ख्यातेः कृतविपुलसातेश्वर ! भवत्-
प्रभावादन्येषामपि भवति नो कूटघटना ।
न कः प्राणी वाणीरसहृतजगन्मानसतृषं
श्रयेत त्वां नाथं दलितघनमायामृषमतः ॥ ९४ ॥

भवान् चक्री कर्मव्रजविकटवैताढ्यघटितं
कपाटं ग्रन्थ्याख्यं सुपरिणतिदण्डाद् विघटयन् ।
प्रतीर्योद्यद्वीर्यो जयति सकलासद्ग्रहजलं
प्रपूर्णेच्छम्लेच्छव्रजसदृशमिथ्यात्वविजयात् ॥ ९५ ॥

मता देवाः सुभ्रूस्तनजघनसेवासु रसिका
महादम्भारम्भाः प्रकृतिपिशुनास्तेऽपि गुरवः ।
दयाहीनो धर्मः श्रुतिविदितपीनोदय इति
प्रवृद्धं मिथ्यात्वं सुसमयघरट्टैर्दलितवान् ॥ ९६ ॥

परं देव ! त्वत्तो न खलु गणयामि क्षणमपि
त्वदादिष्टादिष्टाद् गुरुमपि पथः प्रच्युतमिह ।

सहे नान्यं धर्मं नृपसदसि जल्पव्रजमहे
महेश ! त्वं तस्मान्मयि कुरु दयां शश्वदुदयाम् ॥ ९७ ॥

भयं सर्वं याति क्षयमुदयति श्रीः प्रतिदिनं
विलीयन्ते रोगा लसति शुभयोगादपि सुखम् ।
महाविद्यामूलं सततमनुकूलं त्रिभुवना-
भिराम ! त्वन्नाम स्मरणपदवीमृच्छति यदि ॥ ९८ ॥

नमदमर्त्यकिरीटमणिप्रभापटलपाटलपादनखत्विषे ।
गलितदोषवचोधुतपाप्मने शुभवते भवते भगवन् ! नमः ॥ ९९ ॥

सुरतरुः फलितो मम साम्प्रतं विगलितोऽपि च दुष्कृतसञ्चयः ।
सुरमणी रमणीयभवन्नुतेः करतले रतलेपहरालुठत् ॥ १०० ॥

दिशति कार्मणमीश ! शिवश्रियः प्रियसमागमहेतुरनुत्तरः ।
विजयते विहितोत्कटसङ्कटव्युपरमा परमा तव संस्तुतिः ॥ १०१ ॥

तव मतं यदि लब्धमिदं मया किमपरं भगवन्नवशिष्यते ? ।
सुरमणौ करशालिनि किं धनं स्थितमुदीतमुदीश ! पराङ्मुखम् ॥१०२॥

सर्पत्कन्दर्पसर्पस्मयमथनमहामन्त्रकल्पेऽवकल्पे
प्रत्यक्षे कल्पवृक्षे परमशुभनिधौ सत्तमोहे तमोहे ।
निर्वाणानन्दकन्दे त्वयि भुवनरवौ पावना भावना भा-
ध्वस्तध्वान्ते समग्रा भवतु भक्तुदे सङ्गता मे गतामे ॥ १०३ ॥

प्रसीद सद्यो भगवन् ! अवद्यं हरस्व पुण्यानि पुषाण भर्तः ! ।
स्मर्तव्यतामेति न कश्चिदन्यस्त्वमेव मे देव ! निषेवणीयः ॥ १०४ ॥

हरिदन्तिसरीसृपानलप्रधनाम्भोनिधिबन्धरोगजाः ।
न भियः प्रसरन्ति देहिनां तव नामस्मरणं प्रकुर्वताम् ॥ १०५ ॥

चिदानन्दनिस्यन्दवन्दारुशक्रस्फुरन्मौलिमन्दारमालारजोभिः ।
पिशङ्गौ भृशं गौरकीर्तेस्तवाङ्घ्री गलल्लोभशोभाभिराम ! स्मरामः ॥१०६॥

बहुधात्र सुधारुचिरैर्वचनैर्भवता भवतापभरः शमितः ।
अमितप्रसरद्गुणरत्ननिधे ! शरणं चरणौ तव तेन भजे ॥ १०७ ॥

इति प्रथितविक्रमः क्रमनमन्मरुन्मण्डली-
किरीटमणिदर्पणप्रतिफलन्मुखेन्दुः शुभः ।
जगज्जनसमीहितप्रणयनैककल्पद्रुमो
यशोविजयसम्पदं प्रवितनोतु वामाङ्गजः ॥ १०८ ॥

## ॥ वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ॥ १ ॥

ऐन्द्रमौलिमणिदीधितिमाला-पाटले जिनपदे प्रणिपत्य ।
संस्तवीमि दुरितद्रुमपार्श्वं, भक्तिभासुरमना जिनपार्श्वम् ॥ १ ॥

अस्य सम्प्रति जनस्य रसज्ञा, त्वद्गुणौघगणनास्पृहयालुः ।
उद्यतं तुलयति स्थितमुर्व्यां, स्वर्गशाखिकुसुमावचयाय ॥ २ ॥

विश्वविश्वविभुतां निभृतं(तां) यः शङ्कते परसुरेषु तवेव ।
तस्य हन्त ! खलता खलतायां, पद्मसौरभमिवानुमिनोति ॥ ३ ॥

यः परं परमदेव ! विमूढ-स्त्वत्समानमनुमित्सति तर्कैः ।
भास्करत्वमनुमीय पतङ्गं, सूरमेव न करोति कुतोऽसौ ॥ ४ ॥

देवदेव ! वचनं यदवोचः, सप्तभङ्गमपि निर्गतभङ्गम् ।
तन्यते ननु मनः श्रमणाना-मस्तमोहमपि तेन समोहम् ॥ ५ ॥

न्यक्कृतः शुभवता भवता य-च्चित्तभूस्त्रिजगतामपकारी ।
तज्जिनोत्तम ! तमोदलन ! त्व-च्छाययैव तनुमेष बिभर्ति ॥ ६ ॥

अप्सरोभिरपि नार्द्रितकं य-द्यच्च न स्मरशिलीमुखभेद्यम् ।
वज्रतुल्यमपि तत्कथमन्त-र्भक्तिभृत्सु तव मार्दवमेति ॥ ७ ॥

स्वं विशुद्धमुपयुज्य यदाप्य, श्राम्यसीह न परं परिणम्य ।
सर्वगोपि नहि गच्छसि सर्वं, तद्विभासि भुवने त्वमिव त्वम् ॥ ८ ॥

रोहिताविहितसख्यमरीचि–त्वन्नखाग्रविधृतप्रतिबिम्बः ।
मज्जति प्रणमतां भवताप–व्यापदामुपशमाय नु कायः ॥ ९ ॥

वेद यो विमलबोधमयं त्वां, शुद्धनिश्चयनयेन विपश्चित् ।
स स्वमेव विमलं लभमानो, द्वेष्टि रज्यति न वा भुवि कश्चित्॥ १० ॥

ईहते शिवसुखं व्रतखिन्न–स्त्वामनादृतवता मनसा यः ।
विश्वनाथ ! स मरुस्थलसेवा–योग्यतामिह बिभर्त्ति पिपासुः ॥ ११ ॥

आश्रितः कमलया जिननाथ !, त्वं विभासि नरकान्तक एव ।
युज्यतामिति तवामृतधाम–ग्रासलालसतमो विनिघातः ॥ १२ ॥

त्वां श्रितं जिन ! विदन्ति दिनोद्य–न्मानवारविमलं सुरसार्थैः ।
उद्भटं सुरुचिभिर्वचनौघै–र्मानवारविमलं सुरसार्थैः ॥ १३ ॥

आकलय्य तव वार्षिकदानं, याचकार्थनिजभेदविशङ्की ।
निह्नुते किमिह किन्नरगीतै–स्त्वद्यशोभिरमराद्रिरपि स्वम् ॥ १४ ॥

वर्षणैर्मुशलधारघनानां, पङ्कलेशमपि या न बभार ।
सा क्षमैव तव कापि नवीना, चञ्चलेऽपि कमठे न चकम्पे ॥ १५ ॥

अम्बरत्रिपथगाशतपत्रं, लाञ्छनभ्रमरशोभि विभाति ।
तीर्थनाथ ! तव कीर्त्तिमराली–भुक्तशिष्टमिह मण्डलमिन्दोः ॥ १६ ॥

त्वत्प्रतापदृढदण्डवितु(नु)न्नं, बम्भ्रमीति गगने ग्रहचक्रम् ।
कुम्भमत्र जिनराज ! तदुच्चैः, प्रातरेव सृजति द्युतिमन्तम् ॥ १७ ॥

दुर्जनस्य रसना रसनाम, द्वेषपित्तकटुरेव न वेद ।
नो सुधाशिरसमोचितसारान्, सद्गुणानपि तवाद्रियते या ॥ १८ ॥

जङ्गमोऽसि जगदीश ! सुरद्रु–र्दानपात्रमिह तद्बहु याचे ।
सर्वगोऽसि परिपूरय सर्वं, हृद्दरीपरिसरस्थितमिष्टम् ॥ १९ ॥

यस्तव स्रजमवाप कृपाया–स्तं 'यशोविजय' मेनमवैमि ।
तत्र सत्रमिव मङ्गललक्ष्म्याः, सम्पदे तदधुनापि तवाख्या ॥ २० ॥

वासवोऽपि गुरुरप्यपरोऽपि,त्वद्गुणान् गणयितुं कथमीष्टे ।
अस्यते करुणयैव दिगेषा, भ्राजता तदपि भूरिविशेषा ॥ २१ ॥

## ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥ २ ॥

ऐँकाररूपां प्रणिपत्य वाचं, वाचंयमव्रातकृतांह्रिसेवम् ।
जनुःपुपूर्षुर्दुरितं जिहासुः, शङ्खेश्वरं पार्श्वजिनं स्तवीमि ॥ १ ॥

अप्येकमीशं जगतां भवन्तं, विहाय ये नाम परं भजन्ते ।
कुपक्षिणस्ते ननु पारिजात-स्रजं भजन्ते न करीरसक्ताः ॥ २ ॥

आहार्यदेवान् भजतां सरागाँ-स्त्वद्द्वेषिणां चेतसि या मुमुक्षा ।
अज्ञानभाजां किल सा जनानां, तृषर्थिनां शैलशिलाबुभुक्षा ॥ ३ ॥

परेषु देवत्वमुपेत्य देव !, मूढा विमूढेषु हितार्थिनो ये ।
आरोपितादित्यगुणेन तेषां, खद्योतपोतेन कृतार्थताऽस्तु ॥ ४ ॥

त्वद्दर्शनाय स्वहितार्थिनोऽपि, द्रुह्यन्ति ये नाम जिनेश ! मूढाः ।
मोहेन पीयूषमपि त्यजद्भिः, पिपासुभिस्ते सह तोलनीयाः ॥ ५ ॥

त्वत्सेविनां दैशिकशासनेभ्यो, ये नाम वाचं न विशेषयन्ति ।
जागर्तु तेषां भृशमन्धकार-प्रकाशयोरप्यविशेषबुद्धिः ॥ ६ ॥

दुर्नीतयः शान्तरसं स्रवन्तीं, ये सप्तभङ्गीं तव नाद्रियन्ते ।
पिपासवस्ते पतिताः कृशानौ, हता हता एव हहा हताशाः ॥ ७ ॥

विधिं निषेधं च दिशन् जनेभ्यो, जगज्जगन्नाथ ! पितेव पासि ।
चित्रं तथापि स्वपितामहादीन्, त्वां निह्नुवन्तोऽपि न निह्नुवन्ति॥ ८ ॥

वसुन्धरां नीरभरेण सिञ्चन्, यथोषरानूषरयोः पयोमुक् ।
असत्सतोरन्यतरत्र नैव, तथोपदेशस्तव पक्षपाती ॥ ९ ॥

महीसिचः पङ्ककृतः पयोदा-द्धर्मं दिशन्देव ! विलक्षणोऽसि ।
यथा यथा सिञ्चसि भव्यचेत-स्तथा तथा पङ्कमपाकरोषि ॥ १० ॥

स्फुटे विनिर्णेतरि देवदेव !, सन्देग्धि यस्त्वय्यपि जागरूके ।
निमील्य चक्षुः स घटाद्यपश्यन्, प्रदीपवृन्दैरपि किं करोतु ॥ ११ ॥

सोऽयं मया ध्यानपथोपनीतः, केनाऽपि रूपेण चिरन्तनेन ।
भवभ्रमघ्नो मम देवदेव !, प्रणम्रदेवेन्द्र ! चिराय जीयाः ॥ १२ ॥

अलोकलोकव्यतिवृत्तिदक्षा, शक्तिस्त्वदीया समये स्मृता या ।
अस्मादृशां सा सहतामपायं, भेत्तुं क्षणार्द्धेऽपि कथं विलम्बम्॥ १३ ॥

प्रश्ने परेषां यदधीष्टदेश्यं, त्वमेव देवो मम वक्तुमर्हः ।
ततोऽस्य भक्तस्य समीहितार्थं, पद्मावतीभोगिपती क्रियेताम् ॥ १४ ॥

अदाः सदा नम्रसुरासुरेश !, प्रसूनमालां किल यां मनस्वी ।
त्वत्किङ्करस्यास्य तयैव विश्वे, प्रकाश्यतां देव ! चिरं जयश्रीः॥ १५ ॥

कथाश्लथासत्यपथः परीक्षा, परीक्षकाणां हृदये निलीना ।
कलौ कुपक्षग्रहिलप्रतापे, त्वत्किङ्कराणां शरणं त्वमेव ॥ १६ ॥

औदास्यभागेव तुलां दधाने, खद्योतपोते द्युतिमालिनो या ।
कलौ गलद्बुद्धिपरीक्षकाणां, तां चातुरीं देव ! वयं न विद्मः ॥ १७ ॥

कवेः सभायां कुपरीक्षकाणा-मधिक्रियापि स्फुटधिक्क्रियैव ।
बकस्य पङ्क्तौ वसतो न किं स्यात्, मरालबालस्य महोपहासः॥ १८ ॥

कण्ठीरवा एव कुपन्थिनागे, भवत्प्रसादाद्वयमुद्धताः स्मः ।
स्याद्वादमुद्रारहिताः कुतीर्थ्याः, श्रृगालबाला इव नाद्रियन्ते ॥ १९ ॥

याचामहे देव ! तवैव भूयः, कृपाकटाक्षेण कृतार्थभावम् ।
जरानिहन्ता किल यादवानां, दासं दृशैनं प्रविलोकयस्व ॥ २० ॥

प्रत्यक्षलक्ष्यामिव कल्पवल्लीं, तवापि मूर्त्तिं किल यो न मेने ।
स्वबोधिबीजस्य जिनेश ! तेन, न्यधायि कण्ठे कठिनः कुठारः॥ २१ ॥

नयानविज्ञाय जिनेश ! किञ्चित्, अभ्यस्य येषां तव वाग्बुभुत्सा ।
द्रुतं रुताभ्यासकृतां तु तेषां, पिकस्वरेच्छा किल वायसानाम्॥ २२ ॥

एकत्र वस्तुन्यऽभिदीर्णशोषं, कुपक्षिणां यः किल पक्षपातः ।
स एव तीर्थेश ! परानुयोगे, मतिच्छिदायाः परमं निदानम् ॥ २३ ॥

भिन्दन्ति तत्त्वानि भिदाप्रतीतिं, निदानमासाद्य कुवादिनो ये ।
संख्यामनासाद्य विहाय भूमीं, विहायसि स्थातुममी धृताशाः ॥ २४ ॥

येऽपि प्रकामं प्रतिजानतेऽज्ञा, जगज्जिनैकान्तत एकमेव ।
जारं च सत्यं पितरं च तेऽपि, समानबुद्ध्यैव समाश्रयन्तु ॥ २५ ॥

अभिन्नभिन्नं तु नयैरशेषै-रदीदृशः साधु तथा पदार्थम् ।
दोषाख्यया नाथ ! यथाश्रियन्ते, त्वद्द्वेषिणो वाततयोद्द्विषां वा (षन्तः)

पदार्थगान् पर्यनुयोगयोग्यान्, ससापि भङ्गान् विभनक्ति भाषा ।
तथा तवाधीश यथा कथायां, शङ्कासमाधीरपरे लभन्ते ॥ २७ ॥

जिह्वासहस्त्रं जिनराज ! युष्म-द्गुणान्न संख्यातुमलं यदासीत् ।
सहस्त्रजिह्वोऽपि ततः स्वनाम्ना, द्विजिह्व इत्येव जनैः प्रतीतः ॥ २८ ॥

जङ्गालभावं कलयन्नशेषं नभो जिनाक्रामति यः क्रमाभ्याम् ।
अशासनैस्तस्य पदं निदध्याद्, वक्तुं विशेषं तव सर्ववाचाम्॥ २९ ॥

प्रणम्रदेवेन्द्रशिरःकिरीट-रत्नद्युतिद्योतितदिग्विभागः ।
अस्मन्मनोवाञ्छितपूरणायां, कल्पद्रुकल्पः कुशलाय भूयाः ॥ ३० ॥

हितार्थिना सम्प्रति सम्प्रतीतः, संस्तूयसे यच्छिवशर्मदाने ।
तेनैव तीर्थेश ! भवे भवेऽस्तु, भवत्पदाम्भोरुहभृङ्गभूयम् ॥ ३१ ॥

इत्थं श्रीशङ्खेश्वर-पार्श्वनाथः प्रणतलोकहितदाता ।
स्तुतिपन्थानं नीतः, यशोविजयसम्पदं तनुताम् ॥ ३२ ॥

अध्ययनाध्यापनयुग्-ग्रन्थकृतिप्रभृतिसर्वकार्येषु ।
श्रीशङ्खेश्वरमण्डन !, भूया हस्तावलम्बी मे ॥ ३३ ॥

## ॥ श्रीशङ्खेश्वरपार्श्वनाथस्तोत्रम् ॥ ३ ॥

ऐँकाररूपस्मरणोपनीतां, कृतार्थभावं धियमानयामि ।
समूलमुन्मूलयितुं रुजः स्वाः, संस्तूय शङ्खेश्वरपार्श्वनाथम् ॥ १ ॥

भवद्गुणानां गणनां विधातुं, पुरन्दरोऽपि प्रभुरेव न स्यात् ।
तथापि निःशङ्कतया प्रवृत्तेः(त्तिः), यत्तत्र हेतुर्निजकार्य(र्थ)लोभः॥ २

यः कार्यमासाद्य महान्तमीशं, न याचते नाम निजानुरूपम् ।
रत्नानि वर्षत्यपि वारिवाहे, स पाणिदाने क्षपणत्वमेति ॥ ३ ॥

त्वयि प्रभौ पूरयति प्रकामं, मुहुर्मनःप्राथितमर्थमेषः ।
चिरं करालम्बनदत्तखेदां, कल्पद्रुकोटीमपि किं करोतु ? ॥ ४ ॥

वाञ्छातिगार्थप्रदमीशमेन–मासाद्य लोकः पुरुषोत्तमं त्वाम् ।
चिन्तामणौ यच्छति कञ्चिदर्थं, को रज्यते ग्राव्णि विशेषदर्शी ॥ ५ ॥

तृणानि भुक्त्वा किल कामधेनु–र्गवान्तरस्यैव दशां बिभर्तु ।
अस्याः पुरो न्यस्यति कः करौ स्वौ, त्वदेकनाथे भुवने मनस्वी॥ ६ ॥

कथं निषेव्यो दृषदाहतोऽपि, व्ययं व्रजन् देव ! मकत्करीरः ।
त्वां पारिजातं सुकृतैरपूर्वं, सदातनं प्राप्य सचेतनञ्च ॥ ७ ॥

अन्विष्यमाणं तु हितानुरूपं, देवेषु रूपं त्वयि पर्यवस्यत् ।
कुतूहलं भानुमतः सभायां, ग्रहस्य किञ्चित् कलयाम्बभूव ॥ ८ ॥

किं कालकूटाशिनि शूलपाणौ, सृजन्ति देवत्वधिया न मूढाः ।
वयं तु सद्बोधसुधां लिहन्तं, त्वामेव देवं विनिभालयामः ॥ ९ ॥

इच्छावशं चेद् भुवनं भवस्य, तिष्ठेत् सदा वा निपतेत् सदा वा ।
नेच्छावशं चेद् भुवनं भवस्य, कर्मप्रकृत्यैव तदा सदाशम् ॥ १० ॥

सर्वत्र कार्ये न कृतिर्निमित्तं, विलक्षणत्वेन यदत्र तत्त्वम् ।
जिनेश ! किञ्चिन्निजवासनायां, न्यायं नयन्तः कुदृशः पतन्ति॥ ११ ॥

इत्थं च कार्ये न सकर्तृकत्वम्, शक्यं बुधैः कार्यतयाऽनुमातुम् ।
तर्कं विना यत् किल जागरूकः, शरीरजन्यत्वमुपाधिरत्र ॥ १२ ॥

भवेद्भवे दुर्नयतो हि नित्य-प्रमेव नित्यभ्रम एव भूयान् ।
मानं यतस्तस्य धियो न किञ्चित्, प्रत्यक्षतायां किल पक्षपाती॥ १३ ॥

कार्यानुरोधेन कुदर्शनानां, कर्तेव नित्यस्तनुरस्तु नित्या ।
जगच्छरीरैर्यदसौ शरीरी, तदीश्वरास्तर्हि वयं भवामः ॥ १४ ॥

उत्पत्तिनाशौ न यथा नितान्तं, नेयं सिसृक्षा न च सञ्जिहीर्षा ।
मृषा गुणारोपकृता किलैषा, विडम्बना केवलमीश्वरस्य ॥ १५ ॥

देवं परे श्रद्दधते यदीमे, कषायकालुष्यकलङ्कशून्यम् ।
तदा मदाघूर्णितलोचनेयं, गौरी वरीतुं वरमीहतां कम् ॥ १६ ॥

देवं परे श्रद्दधते यदीमे, कालीकटाक्षस्पृहणीयशोभम् ।
कुतस्तदा श्रद्दधते न भानुं, समुद्धतध्वान्तविलुप्तदीप्तिम् ॥ १७ ॥

तीर्थेश ! वाणी तव सप्तमार्गा, गङ्गां त्रिमार्गामतिशेत एव ।
विहाय तीर्थं परमं तदेना-मन्यां भजन्तो न कथं त्रपन्ते ॥ १८ ॥

प्रभो ! परेषां त्वयि मोहभाजां, यो नाम योग्यानुपलम्भदम्भः ।
अर्थे समस्तेऽपि बिभर्तु मौनं स देशकालव्यवधानभाजि ॥ १९ ॥

अपह्नुवन्ते नितमां भवन्तं, जागर्ति येषां दृगयोग्यतोच्चैः ।
स्वनेत्रपन्थानमनाप्नुवन्त-स्तेषामयोग्याः स्वपितामहाद्याः ॥ २० ॥

नखेषु चन्द्रेषु वितेनिरे यै-स्तारासमालिङ्गनकौतुकानि ।
त्वत्पादयोर्देव ! नमोऽस्तु तेभ्यः, सुरेन्द्रचिन्तामणिचुम्बितेभ्यः॥ २१ ॥

नीलां जिनाधीश ! तवैव देह-च्छायां नु कामं मनुते मनस्वी ।
सम्भाव्यते नाम न रूपमीदृक्, त्रिनेत्रनेत्रानलभस्मनस्तु ॥ २२ ॥

कल्पद्रुकोटीगुणलुण्टनस्य, द्वारेव सङ्क्रान्तमिति त्वदीये ।
सौरभ्यमङ्गेऽप्सरसां भ्रमद्भि-र्दृग्भिर्मिलिन्दैः परिचीयते च ॥ २३ ॥

परस्य रोगान् हरतस्त्व(ति त्व)दीये, रोगाः शरीरे न विशन्ति युक्तम् ।
विषव्यथानाशकरं जनानां, किं कालकूटान्यमृतं स्पृशन्ति ॥ २४ ॥

न शोणिमानं रुधिरामिषौ ते, न स्वेदखेदौ दधतश्च मेदः ।
इदं विदन्तोऽपि कुपन्थिनो ये, त्वदक्षमास्तेषु जगाम खेदः ?॥ २५ ॥

कल्पद्रुसौरभ्यसुखं मिलिन्दा, भजन्त्यमी श्वाससमीरणं ते ।
अवाप्य किं नो गुणिनं गुणज्ञाः, प्रमोदमेदस्वलतां व्रजन्ति ॥ २६ ॥

यशो यतो जन्म लभन्नितान्त-मद्यापि विश्वं विशदीकरोति ।
तस्मिन् शरीरे रुधिरामिषौ ते, गोक्षीरधाराधवले कथं नो ? ॥ २७ ॥

तन्मानसे कस्य न चर्करीति, चिरं चमत्कारभरं बुधस्य ।
आहारनीहारविधिर्विरेजे, दृश्या(शा)प्यदृश्या(श्यो)भवतो यदुच्चैः २८

गुणैरमीभिः किल जन्मतोऽपि, विश्वं विनेतर्ननु योऽतिशेषे ।
नृधर्ममात्रेण कथं कृशाशाः, कुवादिनस्त्वां तमपह्नुवन्ति ॥ २९ ॥

पुंसोऽतिशेषे पुरुषोत्तमत्वा-द्देवाधिदेवः सकलाँश्च देवान् ।
अन्यत्र कुत्राप्युपमानमुद्रा, कुवादिविज्ञानसमानशीला ॥ ३० ॥

त्वं शङ्करो भासि महाव्रतित्वा-द्ब्रह्माऽसि लोकस्य पितामहत्वात् ।
विष्णुर्विनेतः पुरुषोत्तमत्वा-ज्जिनोऽसि रागादिजयाज्जनार्च्यः॥ ३१ ॥

विधृत्य वाचं भवतः कथाया-मक्षान्तपक्षान्तरसन्निवेशः ।
उदास्यमाने कुपरीक्षकौघो, त्वत्किङ्करः किं करवै विनेतः ॥ ३२ ॥

कलौ कुकाले किल सत्परीक्षा भिक्षाचराणां सुलभा न भिक्षा ।
कथाप्रथायामिति कीर्तिलाभे, त्वत्किङ्करस्यास्य गतिस्त्वमेव॥ ३३ ॥

भक्तप्रसादाद्भवविद्धबुद्धिर्लघुर्महानेव तवास्तु दासः ।
ग्रावाऽप्यधिष्ठापकसन्निधानाच्चिन्तामणिः किं न जगन्निषेव्यः॥ ३४ ॥

अयं जनो यद्यपि कुन्थुरेव (श्रुताढ्यनाग) प्रभृतीनवेक्ष्य ।
भजे तथापि प्रसभं कथायां, भवत्प्रसादात् परवारणत्वम् ॥ ३५ ॥

एकान्तमुद्रामधिशय्य शय्यां, नयव्यवस्था किल या प्रमीला।
तया निमीलन्नयनस्य पुंसः, स्यात्कार एवाञ्जनिकी शलाका ॥ ३६ ॥

एकान्तभेदः किल धर्मधर्मिव्यवस्थया विष्णुवदे (वस्तुषु नै) व लभ्यः
गोरश्वतेव प्रविभिद्यते चेत्, गोत्वं लभेत्कस्तदिदं विशेषः ॥ ३७ ॥

प्रत्येति जल्पन् समवायमेकं, गवीव गोत्वं न कथं तुरङ्गे।
आधारतैक्येऽपि समानयुक्ते-स्तया प्रतीकारकृतिर्न युक्ता ॥ ३८ ॥

अभेदभेदात्किल धर्मधर्मिविशिष्टबुद्धिस्तव शासने नु(तु)।
तदात्मतावृत्त्यनियामकत्वमेकान्तताभाजि ततो न दोषः ॥ ३९ ॥

एकत्र वृत्तौ हि विरोधभाजोर्या स्यादवच्छेदकभेदयाच्ञा।
द्रव्यत्वपर्यायतयोर्विभेदं, विजानतां सा कथमस्तु नस्तु ॥ ४० ॥

भेदः पृथग् भूतिरथान्यभावो, द्विधेति तत्र प्रथमं वदन्ति।
विभक्तदेशेषु तथान्त्यमन्ये, स्वधर्मधर्मित्वविभागहेतुम् ॥ ४१ ॥

अभेदभेदोल्लसदेकवृत्तौ, तेषामवच्छेदकमप्यमृग्यम्।
स्वाभावयोरेव यदेकवृत्तौ, जागर्त्यवच्छेदकभेदयाच्ञा ॥ ४२ ॥

सदेव चेत् स्यादसदेव चेत् स्या-देकीभवेद्वा न जगद्भवेद्वा।
इमां क्षतिं सोढुमशक्नुवन्त-स्त्वच्छासनं देव! परे श्रयन्तु ॥ ४३ ॥

परेण रूपेण भजत्यजस्रं, स्वरूपतोऽस्तित्वमनस्तिभावम्।
अनस्तिभावः पुनरस्तिभावं, परोपनीतः स्वचतुष्टयेन ॥ ४४ ॥

विना भवन्तं स्थितिहेतुमन्यं विश्वस्य या धावति देवमाप्तुम्।
जागर्ति वन्ध्यातनयस्य मौलिमलङ्करिष्णुः कतमा कलेयम् ॥ ४५ ॥

जनुर्भृतां दुर्नयनाशितानां सञ्जीवनी नाम तवैव वाणी।
उपेत्य मच्चेतसि सा समस्त-रुजां विनाशे पटिमानमेतु ॥ ४६ ॥

त्वयि प्रभो! जाग्रति दानशौण्डे गोपायति स्वं ननु पारिजातः।
न केवलं तैः पटलैरलीनां, स्वदारुभावादपि दुर्यशोभिः ॥ ४७ ॥

अन्ये कथं जाग्रति पारिजाते, ह्यपारिजाते न तव व्यथायै ।
निषेव्यतामेष जगन्निषेव्यो, मम प्रभुर्नूनमपारिजातः ॥ ४८ ॥

भवद्यशोभिर्भुवि भासितायां, सितेतरन्नाम सिते ममज्जे ।
लुम्पत्परेषामभिधां स्वनाम्ना, सितं न तत्र स्वधिया ममज्जे ॥ ४९ ॥

हसन्निमीलद्युगपत्पयोजं भवन्महो भानुयशःशशिभ्याम् ।
शङ्कां वितेने दिनरात्रशिल्प–क्रमे विधेर्नूनमकौशलस्य ॥ ५० ॥

विश्वेऽपि यो मात्यपि नैव वर्णः, सकर्णकर्णादरकोणवासी ।
बोद्धुं क्षमास्तीव्रधियोऽपि धीराः, श्लोकं त(त्व)दीयं कथमेतमेते॥५१॥

स्वैरं दिवः स्नातवतस्तटिन्यां, समुच्छलत्तारकतोयबिन्दु ।
सितत्विषस्त्वद्यशसः पवित्रं, विधुस्तनुं प्रोञ्छनकं विभाति ॥ ५२ ॥

अयं हि चन्द्रो ननु सैंहिकेयो, यस्यास्ति रङ्कुः किल कुक्षिगामी ।
उपैत्यमुं म्लानतमं न को वा, विशेषदर्शी यशसस्तवाग्रे ॥ ५३ ॥

वियद्विघीतो प्रतिघस्त्रधृष्ट–चन्द्रेण भानुद्युतिसिञ्चनैश्च ।
भवद्यशोराशिनिवासयोग्यं, मत्वैव नित्यं कुरुते पवित्रम् ॥ ५४ ॥

भवद्यशोभिः सकलेऽपि सारे, मुष्टे विंधुर्नाम बभूव भिक्षुः ।
कपालिनं सम्प्रति सेवमानः, प्राप्नोति लक्ष्मैष कपालमेव ॥ ५५ ॥

भवद्यशःपुष्टिकृते विधिर्यत् सुधाब्धिमिन्दुं निबिडं निपीड्य ।
गृह्णाति सारं तदमुत्र ह्युक्त–मङ्कः समुद्गच्छति पङ्क एव ॥ ५६ ॥

आदाय सारं सकलं यदिन्दोरशोभि विश्वं भवतो यशोभिः ।
लक्ष्मच्छलात्तत् स्फुटमीक्षतेऽसौ, सुधाम्बुधिः शैवलमात्रशेषः ॥ ५७

भवद्यशःपूजनतत्पराया, दिवः प्रसूनाञ्जलिरेव चन्द्रः ।
तयैव साक्षादुपढोक्यमाना, लाजा इवामी विलसन्ति ताराः ॥ ५८ ॥

जिगीषुणा त्वद्यशसा जगन्ति, पत्रं ज(ल)लम्बे विधुरन्तरिक्षे ।
तदस्य धात्रोपरि वर्षितानि, ताराः प्रसूनानि जयस्य चिह्नम् ॥ ५९ ॥

कथं समस्त्वद्यशसा शशाङ्को, यमष्टमी चुम्बति वक्रमेव ।
ततो मुधा साम्यविधित्सुरुच्चैस्तक्ष्णोति धाता तनुमेतदीयाम् ॥ ६० ॥

इयद्वियत्तावककीर्तिगङ्गा नीलाब्जलीलाग्रहयालुमूर्तिः ।
मरालबालस्य तदत्र युक्तं, सुखं सुधांशुः सुख(ष)मां बिभर्त्तु ॥ ६१ ॥

भवद्यशोहंसमवेक्ष्य यस्य, स्वरूपमाख्याति विशेषदर्शी ।
वितत्य पक्षौ वियति व्रजिष्णुः, स मीनभोगी बक एव चन्द्रः॥ ६२ ॥

दग्धस्य चन्द्रो हरनेत्रवह्नौ, मनोभुवो भ्राजति भस्मगोलः ।
विलीयते यं सततं त्वदीय-यशःसुधावारिदवर्षणेन ॥ ६३ ॥

राकामयं ते तनुते जगद्यद्यशो विधोर्लाञ्छनपङ्कमार्जि ।
अस्यायमिन्दोर्ननु पक्षपातो, द्विषाऽन्यथा वेति कथं विवेच्यः॥ ६४ ॥

स्वल्पानुरागेव जडं शशाङ्कं, मास्येकवारं भजते नु राका ।
निरन्तरं प्रेम्णि निमज्जतीयं, भवद्यशोभिस्तु सहेन्द्रगेयैः ॥ ६५ ॥

भवद्यशोभिः सह लक्ष्मदम्भात्, स्पर्द्धां दधानः सुपरीक्षकेण ।
करेण चन्द्रः कलिकालक्लृप्तिकालेन धात्रा गलहस्तितः किम्॥ ६६ ॥

ब्रह्मा किल ब्रह्ममयं तनोति, यशश्च विश्वं तव देव ! शुभ्रम् ।
मध्ये नु राजा तदिह द्विजानां, ब्रह्माद्वयं वा शितिमाद्वयं वा ॥ ६७ ॥

सुधा सुधांशोः कियती किलेयं, विलीयते या त्रिदशैर्निपीता ।
वर्द्धन्त एवात्र जगज्जनैस्ते, यशांसि पीतान्यपि कर्णपत्रैः ॥ ६८ ॥

सुधाकरस्ते यश एव साक्षाच्चन्द्रे नु तत्त्वभ्रम एव भूयान् ।
सहावतिष्ठेत कुतोऽन्यथा वा, दोषाकरत्वेन सुधाकरत्वम् ॥ ६९ ॥

भवद्यशःक्षीरनिधेः पयांसि, भृत्वा शशिद्रोणमियं किल द्यौः ।
भवद्गुणस्वर्द्रुमकन्दरूपं, तारागणं सिञ्चति शुभ्रभासम् ॥ ७० ॥

यशोभरस्ते प्रविभाति विश्वसमुद्गकेऽसौ घनसारसारः ।
यदेकदेशो विधुरञ्जनत्वं, दिवस्तमोलुप्तदशः प्रयाति ॥ ७१ ॥

भवद्यशःस्पर्द्धनजं रजः किं, मिलत्सुधाधाम्नि कलङ्कपङ्कः ।
जडे भवत्येव नु पङ्किलत्वं, व्याप्तौ निदानं सहचारबुद्धिः ॥ ७२ ॥

देवाधिदेवस्य तव स्वरूपं, स्तोतुं न देवा अपि शक्नुवन्ति ।
तथापि कल्याणकरी ममास्तु, भक्त्या भवद्वर्णनवर्णिकेयम् ॥ ७३ ॥

पीयूषपात्रं वितनोति तारा-रेखाभिराभिः शशिनं तु रिक्तम् ।
भवद्गुणानां गणनां विधित्सुर्विधिः पुनः किं दिवि पूर्यमाणम्॥ ७४ ॥

भवेद् भवप्रक्षयशुद्धिभाजां, वाग्वर्णनानां तुलना धियां चेत् ।
गाने गुणानां तु तदा कदाचित्, पदं निदध्युस्तव योगिनोऽमी॥ ७५ ॥

परार्द्धयपाथोनिधिपारदृश्वा, विधेर्यदि स्याद् गणितप्रकारः ।
भवद्गुणानां गणना तथापि, कथापि वा वारिधिलङ्घनस्य ॥ ७६ ॥

भवद्गुणानां विधिरभ्रपट्टे, भवत्प्रतापैः परितर्जितस्य ।
द्रवैः सुमेरोस्त्रपया द्रुतस्य, सौवर्णवर्णैर्लिखतु प्रशस्तिम् ॥ ७७ ॥

भवद्गुणानां गणनाय नायं, ताराङ्करेखाः प्रवरं प्रकारः ।
स्मरत्विदानीं द्रुहिणस्त्रिलोक्यं, दोधूयमानां परमाणुराजिम् ॥ ७८ ॥

न्यस्तां कदाचिद्धनमूलकूले, करेशयानां च कदाचिदिन्दुम् ।
भवद्गुणानां गणकस्य धातुः, खटीं विना नाम घटी न यातु ॥ ७९ ॥

धातुस्तव श्लोकपरीक्षणेच्छोश्छन्दोऽपि मन्दोदरतां प्रयाति ।
येनैकवर्णेन जगज्जगाहे, सीमैव काऽनुष्टुभि तस्य नाम ॥ ८० ॥

दिक्चक्रचक्रभ्रमणैर्गुणैस्ते, यशःपटं यत् कवयो वयन्ति ।
अस्मिन् विधातुः किल तार्किकस्य, पपात तर्कः पथि कर्कशेऽस्य ८१

विद्याकलाकौशलशिल्पिनोऽपि, गुणेऽपि वृद्धिस्तव सुप्रतीता ।
तदत्र वैयाकरणो विधाता, विलक्षणं लक्षणमभ्युपैतु ॥ ८२ ॥

तारापदैस्ते सुगुणप्रशस्तेर्यस्याः सिसृक्षा नभसः सितस्य ।
सेयं विधातुः कतमा समीक्षा, भिक्षाचरी भूतवती मनीषा ॥ ८३ ॥

स्वनिग्रहानुग्रहतः स्वभक्तं, परे परं धातुमधीशतां ते ।
मामेव मां कर्त्तुमलम्भविष्णुस्त्वमेव देवः कुशलानि कुर्याः ॥ ८४ ॥

धृत्वा नयं निश्चयमभ्युपेयस्त्वं नाम नैवात्यहमाप्तमुख्यः ।
वर्ते तथापि व्यवहारवर्ती, त्वत्किङ्करत्वस्पृहयालुरेव ॥ ८५ ॥

विद्याविदो देव ! तवैव सेवां, मुख्यं महानन्दपदं वदन्ति ।
इदं पदस्य क्वचिदन्यदर्थे, निरूढया लक्षणया प्रयोगः ॥ ८६ ॥

अद्यावद्यापनोदादुदयति मम हृन्नन्दने पारिजातो,
नद्याः सद्यः सुधाया मम तनुरखिला निर्झरैरद्य स(श)स्ते ।
चिन्तारत्नं च मेऽभूत् कलितकरतलक्रोडसङ्क्रीडनश्रीः,
श्रीर्मे त्वद्यै(य्ये)व भर्तर्भवति भवतिरोधानदक्षे प्रदृष्टे ॥ ८७ ॥

याचे नाचेतनं यत् किमपि सुरमणिं नापि कल्पद्रुपूगं,
स्वर्धेनुं नापि नापि प्रसृमरकमलाक्रीडितं कामकुम्भम् ।
सेवाहेवाकिदेवाधिपतिशतनतस्तद्भवानेव भर्त-
र्दाता मे पर्यवस्यन् भवतु भवतुदे वाञ्छितार्थे श्रिये च ॥ ८८ ॥

सङ्कल्पाः कस्य न स्युर्निजहृदयदरीकोणजाङ्कूरकल्पाः,
सेकच्छेकस्य तत्र प्रभवति नु परं भर्तुरिच्छा रसस्य ।
ते तत्त्वं याच्यमानः किमपि निजमनःसञ्चरिष्णुर्भविष्णु-
र्भ्राजिष्णुर्भावभाजां मम विमलफलं योग्य एवासि दातुम् ॥ ८९ ॥

मोहापोहाय चेत् स्याज्जिनमतसुमता काम्यकर्मप्रलिप्सा,
भर्तर्भक्तिस्तु तत् स्यादभिविभु कृतया याच्ञया नानुबन्धः ।
तेनायं याचमानो किमपि जिन ! भवत्किङ्ककरो योग्य एव,
प्रायो योग्यत्वभाजस्तव पदकमले भृङ्गभूयं भजन्ते ॥ ९० ॥

भर्ता संसारगर्तापतदखिलजनत्राणदक्षस्त्रिलोक्यं,
भर्ता हर्ता जनानां दुरितसुविततेर्जन्मलक्षोर्जितायाः ।

भर्ता तर्ता भवाब्धेर्निजसविधजुषां तारणेऽपि प्रभूष्णु-
र्भर्ता कर्ताऽस्तु शङ्खेश्वरनगरमणिर्भावुकानां ममासौ ॥ ९१ ॥

जीयाःस्वर्णाद्रिचूलाद्यंतुलतरकचस्यूतजीमूतमाला,
कालिन्दीमध्यवेल्लत्कुवलयवलयश्यामलच्छायकायः ।
कायोत्सर्गावलम्बे शठकमठहठोन्मुक्तमेघोपलोप-
च्छत्रीभूताहिनाथस्फुटमणिकिरणश्रेणिविद्योतिताशः ॥ ९२ ॥

जीयाश्चान्द्रीयरोचिर्निचयसितयशः क्षीरपाथोधिमज्ज-
द्ब्रह्माण्डोड्डीनबिन्दूभवदमरनदीनीरपूतान्तरिक्षः ।
जृम्भत्कुन्दावदातत्रिदशपतिकराम्भोजसंवीजिताभ्यां,
चारुभ्यां चामराभ्यां त्रिभुवनविभुतां व्यञ्जितां बिभ्रदुच्चैः ॥ ९३ ॥

जीयाः सज्ज्ञानभास्वन्मुकुरपरिसरक्रीडिताऽऽकारभारं,
विश्वं गृह्णन् समग्रं प्रतिसमयभवद्भूरिपर्यायभूमिम् ।
बिन्दूभूताहमिन्द्राद्यखिलसुखमहानन्दसंदर्भगर्भ-
ज्योतिर्बिभ्रत् प्रकृष्टं जननजनितभीभेदमेदस्विताभूत्(:) ॥ ९४ ॥

जीयाः प्रद्योतिदन्तद्युतिततिषु लसज्ज्ञानुदध्नप्रसून-
भ्राम्यद्भृङ्गाङ्गनानां भवति सति मुहुः पुष्यतादात्म्यबोधे ।
श्रीमद्धर्मोपदेशे श्वसितपरिमलोद्गारसारेण दार्ढ्यं,
सौरभ्यं पारिजातव्रतितिततिगतामुष्णतां दातुमुत्कः ॥ ९५ ॥

जीयाः संसारधन्वाध्वनि जनिजनितानन्ततापासहानां,
भव्यानां कल्पवल्लीपरिचितसखितामादिशन् देशनां स्वाम् ।
मोक्षाध्वन्यस्य साधोर्गहनतमतमोध्वंसनिर्बन्धभाजां,
दत्वा सज्ज्ञानदीपं घनरुचिरुचिरं क्लृप्तविश्वोपकारः ॥ ९६ ॥

जीयाः पादावनम्रत्रिदशपतिशिरोमौलिवैडूर्यरोचिः,
कस्तूरीपत्रवल्लीनवनवरचनारोचितक्ष्माशरीरः ।
उत्सर्पद्भिः पदाब्जान्नखरुचिपटलैः पाटलैः कुङ्कुमाम्भो-
दम्भोदग्रैर्दशानामपि तनुमनिशं भूषयन् दिग्वधूनाम् ॥ ९७ ॥

जीयाः पीयूषवीचीनिचयपरिचितिं प्राप्य माधुर्यधुर्यां,
वाचं वाचंयमेभ्यो ननु जननजरात्रासदक्षां ददानः ।
चेतस्युत्पन्नमात्रां निजपदकमलं भेजुषां याचकानां,
याच्ञां सम्पूर्य कल्पद्रुमकुसुमसितैर्व्याप्नुवन् द्यां यशोभिः ॥ १८ ॥

## ॥ अनेकान्तव्यवस्थाप्रकरणस्य मुङ्गलप्रशस्ती ॥

ऐन्द्रस्तोमनतं नत्वा, बीतरागं स्वयम्भुवम् ।
अनेकान्तव्यवस्थायां, श्रमः कश्चिद् वितन्यते ॥ १ ॥

जिनमतमतिगम्भीरं, नयलवविद्भिः परैरनन्तनयम् ।
आघ्रातुमपि न शक्यं, हरिणेन व्याघ्रवदनमिव ॥ २ ॥

वस्तुधर्मो ह्यनेकान्तः, प्रमाणनयसाधितः ।
अज्ञात्वा दूषणं तस्य, निजबुद्धेर्विडम्बनम् ॥ ३ ॥

---

विना यं लोकानामपि न घटते संव्यवहृतिः,
समर्था नैवार्थानधिगमयितुं शब्दरचना ।
वितण्डा चण्डाली स्पृशति च विवादव्यसनिनं,
नमस्तस्मै कस्मैचिदनिशमनेकान्तमहसे ॥ १ ॥

कथायां लुप्यन्ते वियति बत तारा इव रवौ,
नयाः सर्वे दीप्ता अपि समुदिते यत्र सहसा ।
उदासीने त्वब्धाविव जलतरङ्गा बहुविधाः,
समन्ताल्लीयन्ते श्रयत तमनेकान्तमनिशम् ॥ २ ॥

अनेकान्तं वादं यदि सकलनिर्वाहकुशलं,
मतानि स्पर्धन्ते नयलवसमुत्थानि बहुधा ।
तदा किं नो भावी बहुलकलिकौतूहलवशाद्,
घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः ॥ ३ ॥

मिथो द्राग् युध्यन्ते महिषसदृशा ये परनयाः,
प्रयातारः खेदं त इह बहुधा जर्जरतराः ।
अनेकान्तो द्रष्टा पुनरवनिपालः प्रकृतितः,
परावृत्तिं नैभ्यो व्रजति परिपूर्णाभिलषितः ॥ ४ ॥

विरुद्धैः सत्त्वाद्यैरिह बहुगुणैर्गुम्फिततनुं,
प्रधानं यो वाञ्छत्यखिलजगतः सर्गनिपुणम् ।
अनेकान्तं सांख्यः स कथमवमन्येत विलसेत्,
प्रमाणाक्षक्रीडारसिकहृदयश्चेत्परिषदि ॥ ५ ॥

अबद्धं तत्त्वेन व्यवहृतिवशाद्बद्धमुपयन्,
परं ब्रह्म व्यष्ट्या जगदपि समष्ट्या च विविधम् ।
तपस्वी वेदान्ती वदतु(ति) वदनेनाऽद्वयकथा-
मनेकान्तं कान्तं स्मरति हृदये न त्वविकलम् ॥ ६ ॥

प्रमाणं नीलादौ क्षणपरिचयादौ च न तथा,
वदन्नेकं ज्ञानं सुगततनयश्चित्रमपि च ।
अनेकान्तं स्वान्ते स्मरति यदि नो तन्निजमत-
ग्रहावेशक्लेशः क्षपयति तदीयं गुणगणम् ॥ ७ ॥

घटे चित्रं रूपं पृथगपि च नीलादिकमपि,
ब्रुवाणौ हेतुं वाप्यजनकमपीष्टान्यविधया ।
अनेकान्तं छेत्तुं बत कथमुभौ यौगकणभुक्-
तनूजौ स्वारूढद्रुमविटपतुल्यं प्रभवतः ॥ ८ ॥

परोक्षं मेयांशे किमपि मतिमात्रंशविषये-
ऽपरोक्षं चैकं यः प्रभणति गुरुर्ज्ञानमवशः ।
परोऽपि द्वैरूप्यं जगति कलयन् जैमिनिसुतः,
कुतः स्याद्वादं यः स्पृहयति न रुच्यार्थविमुखः ॥ ९ ॥

न यन्नाम ब्रूते समयविगमह्रीपरवशाः,
हृदा तु स्नेहं न त्यजति विपुलं यद्‌गुणकृतम् ।
अनेकान्तस्याग्रे कलितविनया मौनरचना-
दिदानीं सञ्जाता ननु नववधूर्वादिपरिषद् ॥ १० ॥

स्मिताक्षीणां मुक्तौ सकलविदि भुक्तौ च न भजे-
न्मुनीन्द्रूनां धर्मोपकरणविधौ चापि भजनम् ।
विहस्तो दिग्वासा यदि मदिरयेवावृतमतिः,
प्रसिद्धैः सिद्धान्तैस्तदहह महद्वैरमुदयेत् ॥ ११ ॥

क्रियायां ज्ञाने च व्यवहृतिविधौ निश्चयपदे-
ऽपवादे वोत्सर्गे कलितमिलितापेक्षणसु(मु)खैः ।
हतैकान्तध्वान्तं मतमिदमनेकान्तमहसा,
पवित्रं जैनेन्द्रं जयति सितवस्त्रैर्यतिवृषैः ॥ १२ ॥

इमं ग्रन्थं कृत्वा विषयविषविक्षेपकलुषं,
फलं नान्यद् याचे किमपि भवभूतिप्रकृतिकम् ।
इहाऽमुत्रापि स्तान्मम मतिरनेकान्तविषये,
ध्रुवेत्येतद् याचे तदिदमनुयाचध्वमपरे ॥ १३ ॥

सूरिश्रीविजयादिदेवसुगुरोः पट्टाम्बराहर्मणौ,
सूरिश्रीविजयादिसिंहसुगुरौ शक्रासनं भेजुषि ।
सूरिश्रीविजयप्रभे श्रितवति प्राज्यं च राज्यं कृतो,
ग्रन्थोऽयं वितनोतु कोविदकुले मोदं विनोदं तथा ॥ १४ ॥

वाचकपरिषत्तिलक-श्रीमत्कल्याणविजयगणिशिष्याः ।
श्रीलाभविजयविबुधा, अभवन्विद्यावतां धुर्याः ॥ १५ ॥

श्रीजीतविजयविबुधा-स्तेषां शिष्यास्तपागणप्रथिताः ।
तेषां सतीर्थ्यमुख्याः श्रीनयविजयाभिधा विबुधाः ॥ १६ ॥

तत्पादपद्ममधुपः श्रीपद्मविजयानुजः ।
सत्तर्कमकरोदेनं यशोविजयवाचकः ॥ १७ ॥

## ॥ श्री पुण्डरीकतीर्थपतिस्तोत्रम् ॥

आदिजिनं वन्दे गुणसदनं, सदनन्तामलबोधं रे ।
बोधकतागुणविस्तृतकीर्त्तिं, कीर्तितपथमविरोधं रे ॥ १ ॥

रोधरहितविस्फुरदुपयोगं, योगं दधतमभङ्गं रे ।
भङ्गनयव्रजपेशलवाचं, वाचंयमसुखसङ्गं रे ॥ २ ॥

सङ्गतपदशुचिवचनतरङ्गं, रङ्गं जगति ददानं रे ।
दानसुरद्रुममञ्जुलहृदयं, हृदयङ्गमगुणभानं रे ॥ ३ ॥

भानन्दितसुरवरपुन्नागं, नागरमानसहंसं रे ।
हंसगतिं पञ्चमगतिवासं, वासवविहिताशंसं रे ॥ ४ ॥

शंसन्तं नयवचनमनवमं, नवमङ्गलदातारं रे ।
तारस्वरमघघनपवमानं, मानसुभटजेतारं रे ॥ ५ ॥

इत्थं स्तुतः प्रथमतीर्थपतिः प्रमोदाच्छ्रीमद्यशोविजयवाचकपुङ्गवेन ।
श्रीपुण्डरीकगिरिराजविराजमानो, मानोन्नतानि वितनोतु सतां सुखानि

## ॥ ऐन्द्रस्तुतयः ॥

### १ ऋषभजिनस्तुतयः

ऐन्द्रव्रातनतो यथार्थवचनः प्रध्वस्तदोषो जगत्,
सद्योगीतमहोदयः शमवतां राज्याधिकाराजितः ।
आद्यस्तीर्थकृतां करोत्विह गुणश्रेणीर्दधन्नाभिभूः,
सद्यो गीतमहोदयः शमवतां राज्याऽधिकाराजितः ॥ १ ॥

उद्भूताननतिरोधबोधकलितत्रैलोक्यभावव्रजा-
स्तीर्थेशस्तरसा महोदितभयाऽकान्ताः सदाशापदम् ।

पुष्णन्तु स्मरनिर्जयप्रसृमरप्रौढप्रतापप्रथा-
स्तीर्थेशस्तरसा महोदितभयाः कान्ताः सदा शापदम् ॥ २ ॥

जैनेन्द्रं स्मरताऽतिविस्तरनयं निर्माय मिथ्यादृशां
सङ्गत्यागमभङ्गमानसहितं हृद्यप्रभा विश्रुतम् ।
मिथ्यात्वं हरदूर्जितं शुचिकथं पूर्णं पदानां मिथः,
सङ्गत्या गमभङ्गमानसहितं हृद्यप्रभावि श्रुतम् ॥ ३ ॥

या जाड्यं हरते स्मृताऽपिं भगवत्यम्भोरुहे विस्फुरत्-
सौभाग्या श्रयतां हिता निदधती पुण्यप्रभाविक्रमौ ।
वाग्देवी वितनोतु वो जिनमतं प्रोल्लासयन्ती सदाऽ-
सौ भाग्याऽऽश्रयतां हितानि दधती पुण्यप्रभावि क्रमौ ॥ ४ ॥

## २ अजितजिनस्तुतयः

मुनिततिरपि यं न रुद्ध(शीर्ण)मोहा शमजितमारमदं भवन्दिताऽऽपत् ।
भज तमिह जयन्तमासुमीशं शमजितमारमदम्भवन् ! दितापत् ॥ १ ॥

हर रुचिर ! ददज्जिनौघ ! तं द्राक् परमतमोहर ! यं भयानि दानम् ।
नियतमुपगता भवे लभन्ते परमतमोहरयं भया निदानम् ॥ २ ॥

नयगहनमतिस्फुटानुयोगं जिनमतमुद्यतमानसा ! धुतारम् ।
जननभयजिहासया निरस्ताजि नमत मुद्यतमानसाधुतारम् ॥ ३ ॥

पविमपि दधतीह मानसीन्द्रैर्महितमदम्भवतां महाधिकारम् ।
दलयतु निवहे सुराङ्गनानामहितमदं भवतां महाधिकारम् ॥ ४ ॥

## ३ श्रीसम्भवजिनस्तुतयः

सम्भव ! सुखं ददत् त्वं भाविनि भावारवारवारण ! विश्वम् ।
वासवसमूहमहिताऽभाविनिभाऽवाऽरवारवाऽरण ! विश्वम् ॥ १ ॥

यद्धर्मः शं भविनां सन्ततमुदितोदितोऽदितोदारकरः ।
स जयतु सार्वगणः शुचिसन्ततमुदितोऽदितोदितोऽदारकरः ॥ २ ॥

जैनी गीः सा जयतात् न यया शमितामिता मिताक्षररुच्या ।
किं सन्तः समवतरन्नयया शमिताऽमिताऽमिताक्षररुच्या ॥ ३ ॥

दलयतु काञ्चनकान्तिर्जनतामहिता हिता हि तारागमदा ।
इह वज्रशृङ्खला दुर्जनतामहिताऽऽहिताऽहिताऽरागमदा ॥ ४ ॥

## ४ अभिनन्दनजिनस्तुतयः

त्वमभिनन्दन ! दिव्यगिरा निराकृतसभाजनसाध्वस ! हारिभिः।
अहतधैर्य ! गुणैर्जय राजितः कृतसभाजन ! साध्वसहारिभिः ॥ १ ॥

भगवतां जननस्य जयन्निहाऽऽशु भवतां तनुतां परमुत्करः !
त्रिजगतीदुरितोपशमे पटुः शुभवतां तनुतां परमुत्करः ॥ २ ॥

त्रिदिवमिच्छति यश्चतुरः स्फुरत्सुरसमूहमयं मतमर्हताम् ।
स्मरतु चारु ददत् पदमुच्चकैः सुरसमूहमयं मतमर्हताम् ॥ ३ ॥

धृतसकाण्डधनुर्द्यतु तेजसा न रहिता सदया रुचिराजिता ।
मदहितानि परैरिह रोहिणी नरहिता सदया रुचिराऽजिता ॥ ४ ॥

## ५ श्रीसुमतिजिनस्तुतयः

नम नमदमरसदमरससुमतिं सुमतिं सदसदरमुदारमुदा ।
जनिताऽजनितापदपदविभवं विभवं नरकान्तं नर ! कान्तम् ॥ १ ॥

भवभवभयदाऽभयदावली बलीयोदयोदयाऽमाथामा ।
दद्यादद्याऽमितमितशमा शमादिष्टदिष्टबीजाऽबीजा ॥ २ ॥

दमदमसुगमं सुगमं सदा सदानन्दनं दयाविद्याविद् ! ।
परमपरमस्मर ! स्मर महामहा धीरधीर ! समयं समयम् ॥ ३ ॥

काली कालीरसरसभावाभावाय नयनसुखदाऽसुखदा ।
महिमहितनुता तनुतादिताऽदिताऽमानमानरुच्या रुच्या ॥ ४ ॥

## ६ श्रीपद्मप्रभजिनस्तुतयः

पद्मप्रभेश ! तव यस्य रुचिर्मते सद्-
विश्वासमानसदयापर ! भावि तस्य ।
नोच्चैःपदं किमु पचेलिमपुण्यसम्पद्,
विश्वाऽसमान ! सदयाऽपर ! भावितस्य ॥ १ ॥

मूर्तिः शमस्य दधती किमु या पटूनि,
पुण्यानि काचन सभासु रराज नव्या ।
सा स्तूयतां भगवतां विततिः स्वभक्त्या,
पुण्याऽनिकाचन ! सभासुरराजनव्या ॥ २ ॥

लिप्सुः पदं परिगतैर्विनयेन जैनीं वाचंयमैः सततमञ्चतु रोचितार्थाम् ।
स्याद्वादमुद्रितकुतीर्थनयावतारां वाचं यमैः सततमं चतुरोचितार्थाम् ॥ ३ ॥

साहाय्यमत्र कुरुषे शिवसाधने याऽपाता मुदा रसमयस्य निरन्तराये ! ।
गान्धारि ! वज्रमुसले जगतीं तवास्याः पातामुदारसमयस्य निरन्तराये ॥ ४ ॥

## ७ श्रीसुपार्श्वजिनस्तुतयः

यदिह जिनसुपार्श्व ! त्वं निरस्ताकृतक्ष्मा-
वनमद ! सुरवाऽधा हृद्यशोभाऽवतारम् ।
तत उदितमजस्रं कैर्बुधैर्गीयते ना-
वनमदसुरबाधाहृद् यशो भावतारम् ॥ १ ॥

जगति शिवसुखं ये कान्तिभिर्भासयन्तोऽ-
दुरितमदरतापध्यानकान्ताःसदाऽऽशाः ।
जिनवरवृषभास्ते नाशयन्तु प्रवृद्धं,
दुरितमदरतापध्यानकान्ताः सदाशाः ॥ २ ॥

मुनिततिरपठद् यं वर्जयन्ती हतोद्यत्-
तमसमहितदात्रासाऽऽधिमानन्दितारम् ।

समयमिह भजाऽऽसेनोक्तमुच्चैर्दधानं,
तमसम ! हितदांत्रा साधिमानं दितारम् ॥ ३ ॥

अवतु करिणि याता साऽर्हतां प्रौढभक्त्या,
मुदितमकलितापाया महामानसी माम् ।
वहति युधि निहत्यानीकचक्रं रिपूणा-
मुदितमकलितापा या महामानसीमाम् ॥ ४ ॥

## ८ श्रीचन्द्रप्रभजिनस्तुतयः

तुभ्यं चन्द्रप्रभ ! भवभयाद् रक्षते लेखलेखा-
नन्तव्याऽपापमदमहते सन्नमोऽहासमाय ! ।
श्रेयःश्रेणीं भृशमसुमतां तन्वते ध्वस्तकामा-
नन्तव्यापाऽपमद ! महते सन्नमोहाऽसमाय ॥ १ ॥

श्रेयो दत्तां चरणविलुठन्नम्रभूपालभूयो-
मुक्तामाला ऽसमदमहिता बोधिदानामहीना ।
मोहापोहादुदितपरमज्योतिषां कृत्स्नदोषै-
र्मुक्ता मालाऽसमदमहिता वोऽधिदानाऽऽमहीना ॥ २ ॥

रङ्गद्भङ्गः स्फुटनयमयस्तीर्थनाथेन चूला-
मालापीनः शमदमवताऽसङ्गतोपायहृद्यः ।
सिद्धान्तोऽयं भवतु गदितः श्रेयसे भक्तिभाजा-
मालापी नः शमदमवता सङ्गतोऽपायहृद् यः ॥ ३ ॥

सा त्वं वज्राङ्कुशि ! जय मुनौ भूरिभक्तिः सुसिद्ध-
प्राणायामेऽशुचि मतिमतापाऽऽपदन्ताऽबलानाम् ।
दत्से वज्राङ्कुशभृदनिशं दर्पहन्त्री प्रदत्त-
प्राणा या मे शुचिमतिमता पापदन्ताबलानाम् ॥ ४ ॥

## ९ श्रीसुविधिजिनस्तुतयः

यस्यातनोद् देवततिर्महं सुप्रभावऽतारे शुचि मन्दरागे ।
इहास्तु भक्तिः सुविधौ दृढा मे प्रभावतारे शुचिमन्दरागे ॥ १ ॥

अभूत् प्रकृष्टोपशमेषु येषु न मोहसेना जनिताऽऽपदेभ्यः ।
युष्मभ्यमाप्ता प्रथितोदयेभ्यो नमोऽहसेना ! जनितापदेभ्यः ॥ २ ॥

वाणी रहस्यं दधती प्रदत्तमहोदयाऽवद्भिरनीति हारि ।
जीयाज्जिनेन्द्रैर्गदिता त्रिलोकीमहो दयावद्भिरनीतिहारि ॥ ३ ॥

जगद्गतिर्विभ्र(द्रु)मकान्तकान्तिः करोऽतुलाभं शमदम्भवत्याः ।
ददन्नतानां ज्वलनायुधे ! नः करोतु लाभं शमदं भवत्याः ॥ ४ ॥

## १० श्रीशीतलजिनस्तुतयः

जयति शीतलतीर्थपतिर्जने वसु मती तरणाय महोदधौ ।
ददति यत्र भवे चरणग्रहे वसुमतीतरणाय महो दधौ ॥ १ ॥

वितर शासनभक्तिमतां जिनावलि ! तमोहरणे सुरसम्पदम् ।
अधरयच्छिवनाम महात्मना वलितमोहरणे ! सुरसं पदम् ॥ २ ॥

भगवतोऽभ्युदितं विनमाऽगमं जन ! यतः परमापदमादरात् ।
इह निहत्य शिवं जगदुन्नतिं जनयतः परमापदमादरात् ॥ ३ ॥

स्तवरवैस्त्रिदशैस्तव सन्ततं न परमच्छवि ! मानवि ! लासिता ।
न घनशास्त्रकलाऽप्यरिदारिणी न परमच्छविमानविलासिता ॥ ४ ॥

## ११ श्रीश्रेयांसजिनस्तुतयः

जिनवर ! भजन् श्रेयांस ! स्यां व्रताम्बुहृतोदयद्-
भवदव ! नतोऽहं तापातङ्कमुक्त ! महागम ! ।
गतभववनभ्रान्तिश्रान्तिः फलेग्रहिरुल्लसद्-
भवदवनतो हन्तापातं कमुक्तमहागम ! ॥ १ ॥

जिनसमुदयं विश्वाधारं हरन्तमिहाङ्गिनां
भवमदरदं रुच्याऽकान्तं महामि तमोहरम् ।
विनयमधिकं कारंकारं कुलादिविशिष्टता-
भवमदरदं रुच्या कान्तं महामितमोहरम् ॥ २ ॥

शुचिगमपदो भङ्गैः पूर्णो हरन् कुमतापहोऽ-
नवरतमलोभावस्थामाश्रयन्नयशोऽभितः ।
जन ! तव मनो यायाच्छायामयः समयो गल-
न्नवरतमलो भावस्थामाश्रयं नयशोभितः ॥ ३ ॥

सुकृतपटुतां विघ्नोच्छित्या तवाऽरिहतिक्षमाऽ-
पविफलकरा द्युत्याऽगेहा घनाघनराजिता ।
वितरतु महाकाली घण्टाक्षसन्ततिविस्फुरत्-
पविफलकरा द्युत्यागेहा घनाघनराजिता ॥ ४ ॥

## १२ श्रीवासुपूज्यजिनस्तुतयः

पद्मोल्लासे पटुत्वं दधदधिकरुचिर्वासुपूज्यार्कतुल्यो
लोकं सद्धीरपाताशमरुचिरपवित्रासहारिप्रभाऽव ।
लुम्पन् स्वै र्गोविलासैर्जगति घनतमो दुर्नयध्वस्ततत्त्वा-
ऽऽलोकं सद्धीर पाता शमरुचिरपवित्रास ! हारिप्रभाव ! ॥ १ ॥

लोकानां पूरयन्ती सपदि भगवतां जन्मसंज्ञे गतिर्मे,
हृद्या राजी वनेऽत्राभवतुदमरसार्थानताऽपातमोहा ।
साक्षात् किं कल्पवल्लिर्विबुधपरिगता क्रोधमानार्तिमाया-
हृद् या राजीवनेत्रा भवतु दमरसाऽर्थानतापा तमोहा ॥ २ ॥

उत्तुङ्गस्त्वय्यभङ्गः प्रथयति सुकृतं चारुपीयूषपानाऽऽ-
स्वादे शस्तादरातिक्षतशुचि सदनेकान्त ! सिद्धान्त ! रागः ।

रङ्गद्रङ्गप्रसङ्गोल्लसदसमनये निर्मितानङ्गभङ्ग-
स्वादेश ! स्तादऽरातिक्षतशुचिसदने कान्त ! सिद्धान्तरागः ॥ ३ ॥

वाग्देवि ! प्रीणयन्ती पटु विविधनयोन्नीतशास्त्रार्थनिष्ठा-
शङ्कान्ते देहि नव्येरितरणकुशले ! सुभ्रु ! वादे विशिष्टम् ।
श्रद्धाभाजां प्रसादं सुमतिकुमुदिनीचन्द्रकान्ति प्रपूर्णा-
शं कान्ते ! देहिनव्येऽरितरणकुशले सुभ्रुवा देवि ! शिष्टम् ॥ ४ ॥

## १३ श्रीविमलजिनस्तुतयः

नमो हतरणायते ! ऽसमदमाय ! पुण्याशया-
सभाजित ! विभासुरैर्विमल ! विश्वमारक्षते ।
न मोहतरणाय ते समदमाय ! पुण्याशया-
ऽसभाजितविभासुरैर्विमलविश्वमारक्षते ! ॥ १ ॥

महाय तरसाहिताऽजगति बोधिदानामहो
दया भवतुदां तताऽसकलहाऽसमानाऽभया ।
महायतरसा हिता जगति वोऽधिदाना महो-
दया भवतु दान्तताऽसकलहाऽसमानाऽऽभया ॥ २ ॥

क्रियादरमनन्तरागततयाचितं वैभवं
मतं समुदितं सदा शमवताऽभवेनोदितम् ।
क्रियादरमनन्तरागततया चितं वैभवं
मतं समुदितं सदाशमवता भवे नो दितम् ॥ ३ ॥

प्रभा वितरतादरं सुरभियाततारोहिणी-
हिताऽशुगुरु चाऽपराजितकराशमारोचिता ।
प्रभावितरताऽऽदरं सुरभियाऽतता रोहिणी
हिताऽऽशु गुरुचापराजितकरा शमारोचिता ॥ ४ ॥

## १४ अनन्तजिनस्तुतयः

कलितमोदमनं तरसाऽऽश्रये शिवपदे स्थितमस्तभवापदम् ।
त्रिदशपूज्यमनन्तजितं जिनं कलितमोदमनन्तरसाश्रये ॥ १ ॥

जिनवरा गततापदरोचितां प्रददतां पदवीं मम शाश्वतीम् ।
दुरितहृद्वचना न कदाचनाजिनवरागततापदरोचिताम् ॥ २ ॥

सुरसमानसदक्षरहस्य ! ते मधुरिमागम ! सोऽस्तु शिवाय नः ।
जगति येन सुधाऽपि घनप्रभासुरसमानसदक्षर ! हस्यते ॥ ३ ॥

सदसिरक्षतिभा सुरवा जिनं जगदिता फलकेषुधनुर्धरा ।
जयति येयमिह प्रणताऽच्युता सदसि रक्षति भासुरवाजिनम् ॥ ४ ॥

## १५ श्रीधर्मजिनस्तुतयः

श्रीधर्म ! तव कर्मद्रु-वारणस्य सदायते ! ।
स्तवं कर्तुं कृतद्वेषि-वारणस्य सदा यते ॥ १ ॥

गिरा त्रिजगदुद्धारं, भाऽसमाना ततान या ।
श्रिया जीयाज्जिनाली सा, भासमानाऽतताऽनया ॥ २ ॥

वचः पापहरं दत्त-सातं केवलिनोदितम् ।
भवे त्राणाय गहने, सातङ्केऽबलिनोदितम् ॥ ३ ॥

दद्युः प्रसादाः प्रज्ञप्त्याः, शक्तिर्मत्या जिता दराः ।
तस्या यया द्विषां सर्वे, शक्तिमत्याजितादराः ॥ ४ ॥

## १६ श्रीशान्तिजिनस्तुतयः

अस्याभूद् व्रतघाति नातिरुचिरं यच्छ्रेयसे सेवना-
दक्षोदं भरतस्य वैभवमयं साराजितं तन्वतः ।
लिप्सोः(प्सो !) शान्तिजिनस्य शासनरुचिं सौख्यं जयद् ब्रह्म भो-
दक्षोऽदम्भरतस्य वै भवमयं साराजितं तन्वतः ॥ १ ॥

येषां चेतसि निर्मले शमवतां मोक्षाध्वनो दीपिका-
प्रज्ञालाभवतां क्रिया सुरुचिताऽरं भावनाऽऽभोगतः ।
ते श्रीमज्जिनपुङ्गवा हतभया नित्यं विरक्ताः सुखं
प्रज्ञाला भवतां क्रियासुरुचितारम्भावना भोगतः ॥ २ ॥

मिथ्यादृष्टिमतं यतो ध्रुवमभूत् प्रध्वस्तदोषात् क्षिता-
वाऽऽचारोचितमानमाऽरयमदम्भावारिताऽपाप ! हे ।
तं सिद्धान्तमभङ्गभङ्गकलितं श्रद्धाय चित्ते निजे
वाचा रोचित ! मानमारयमदं भावारितापापहे ॥ ३ ॥

शत्रूणां घनधैर्यनिर्जितभया त्वां शासनस्वामिनी
पातादाऽऽनतमानवा सुरहिता रुच्या सुमुद्राऽऽजिषु ।
श्रीशान्तिक्रमयुग्मसेवनरता नित्यं हतव्यग्रता-
पातादानतमा नवासु रहिता रुच्या सुमुद्राजिषु ॥ ४ ॥

## १७ श्रीकुन्थुजिनस्तुतयः

स जयति जिनकुन्थुर्लोभसंक्षोभहीनो
महति सुरमणीनां वैभवे सन्निधाने ।
इह भवति विना यं मानसं हन्त केषां
महति सुरमणीनां वैभवे सन्निधाने ॥ १ ॥

जयति जिनततिः सा विश्वमाधातुमीशा-
ऽमदयतिमहिताऽरं किन्न रीणाऽऽमपाशम् ? ।
विलसितमपि यस्या हन्त नैव स्म चित्तं
मदयति महि तारं किन्नरीणामपाशम् ॥ २ ॥

अवतु गदितमाप्तैस्त्वां मतं जन्मसिन्धौ,
परमतरणहेतुश्छायया भासमानैः ।

विविधनयसमूहस्थानसंगत्यपास्ता-
परमतरणहेतुश्छायया भाऽसमानैः ॥ ३ ॥

कलितमदनलीलाऽधिष्ठिता चारु कान्तात्,
सदसि रुचितमाराद् धाम हन्ताऽपकारम् ।
हरतु पुरुषदत्ता तन्वती शर्म पुंसां,
सदसिरुचितमाराद्धाऽमहं तापकारम् ॥ ४ ॥

## १८ अरजिनस्तुतयः

हरन्तं संस्तवीम्यहं त्वामरजिन ! सततं भवोद्भवा-
मानमदसुरसार्थवाचंयम ! दम्भरताऽऽधिपापदम् ।
विगणितचक्रवर्तिविभवमुद्दामपराक्रमं हता-
मानमदसुरसार्थवाचं यमदं भरताधिपाऽऽपदम् ॥ १ ॥

भीमभवं हरन्तमपगतमदकोपाटोपमर्हतां
स्मरत रणाधिकारमुदितापदमुद्यमविरतमुत्करम् ।
भक्तिनताखिलसुरमौलिस्थितरत्नरुचाऽरुणक्रमं
स्मरतरणाधिकारमुदितापदमुद्यमऽविरतमुत्करम् ॥ २ ॥

भीमभवोदधेर्भुवनमेकतो विधुशुभ्रमञ्जसा-
ऽभवदवतो यशोऽभितरणेन नमाऽदितं नयमितं हि तम् ।
जिनपसमयमनन्तभङ्गं जन ! दर्शनशुद्धचेतसा
भददवतोय ! शोभित ! रणेन न मादितं न यमितं हितम् ॥ ३ ॥

चक्रधरा करालपरघातबलिष्ठमधिष्ठिता प्रभा-
सुरविनता तनुभवपृष्ठमनुदितापदऽरङ्गतारवाक् ।
दलयतु दुष्कृतं जिनवरागमभक्तिभृतामनारतं
सुरविनता तनुभवपृष्ठमनु दितापदरङ्गतारवाक् ॥ ४ ॥

## १९ श्रीमल्लिजिनस्तुतयः

महोदयं प्रवितनु मल्लिनाथ ! मेऽघनाघ ! नोदितपरमोहमान ! सः ।
अभूर्महाव्रतघनकाननेषु यो घनाघनोऽदितपरमोहमानसः ॥ १ ॥

मुनीश्वरैः स्मृत कुरु सौख्यमर्हतां सदानतामर ! समुदाय ! शोभितः ।
घनैर्गुणै र्जगति विशेषयन् श्रिया सदानतामरस ! मुदा यशोऽभितः॥२॥

जिनः स्म यं पठितमनेकयोगिभिर्मुदा रसं गतमपरागमाह तम् ।
सदागमं शिवसुखदं स्तुवेतरामुदारसंगव्रमपरागमाहतम् ॥ ३ ॥

तनोतु गीः समयरुचिं सतामनाविला सभा गवि कृतधीरतापदा ।
शुचिद्युतिः पटुरणदच्छकच्छपी विलासभागविकृतधीरतापदा ॥ ४ ॥

## २० श्रीमुनिसुव्रतजिनस्तुतयः

तव मुनिसुव्रत ! क्रमयुगं ननु कः प्रतिभा-
वनघन ! रोहितं नमति मानितमोहरणम् ।
नतसुरमौलिरत्नविभया विनयेन विभा-
वनघ ! नरो हितं न मतिमानितमोहरणम् ॥ १ ॥

अवति जगन्ति याशु भवती मयि पारगता-
वलि ! तरसेहितानि सुरवारसभाजितया ।
दिशतु गिरा निरस्तमदना रमणीहसिताऽ-
वलितरसे हितानि सुरवा रसभाजि तया ॥ २ ॥

यतिभिरधीतमहितमतं नयवज्रहता-
घनगमभङ्गमानमरणैरनुयोगभृतम् ।
अतिहितहेतुतां दधदपास्तभवं रहितं
घनगमभङ्गमानम रणैरनु योगभृतम् ॥ ३ ॥

वितरतु वाञ्छितं कनकरुग् भुवि गौर्यशो-
हृदिततमा महाशुभविनोदिविमानवताम् ।
रिपुमदनाशिनी विलसितेन मुदं ददती
हृदि ततमाम्महाऽऽशु भविनो दिवि मानवताम् ॥ ४ ॥

## २१ श्रीनमिजिनस्तुतयः

यतो यान्ति क्षिप्रं नमिरघवने नात्र तनुते
विभावर्योऽनाशङ्कमनलसमानं दितमदः ।
दधद् भासां चक्रं रविकरसमूहादिव महा-
विभावर्यो नाशं कमनलसमानन्दितमदः ॥ १ ॥

भवोद्भूतं भिन्द्यात् भुवि भवभृतां भव्यमहिता
जिनानामायासं चरणमुदिताऽऽली करचितम् ।
शरण्यानां पुण्या त्रिभुवनहितानामुपचिता-
जिनानामायासंचरणमुदितालीकरचितम् ॥ २ ॥

जिनानां सिद्धान्तश्चरणपटु कुर्यान् मम मनो-
ऽपराभूतिर्लोके शमहितपदानाम्रविरतम् ।
यतः स्याच्चक्रित्वत्रिदशविभुताद्या भवभृतां
परा भूतिर्लोकेशमहितपदानामविरतम् ॥ ३ ॥

गजव्यालव्याघ्रानलजलसमिद्बन्धनरुजो-
ऽगदाऽक्षाऽऽली काली नयमवति विश्वाऽसमहिता ।
जनैर्विश्वध्येया विघटयतु देवी करलसद्-
गदाक्षाऽलीकाऽलीनयमवति विश्वासमहिता ॥ ४ ॥

## २२ श्रीनेमिजिनस्तुतयः

त्वं येनाक्षतधीरिमा गुणनिधिः प्रेम्णा वितन्वन् सदा,
नेमेऽकान्त ! महामना ! विलसतां राजीमतीरागतः ।
कुर्यास्तस्य शिवं शिवाङ्गज ! भवाम्भोधौ न सौभाग्यभाग्,
नेमे ! कान्तमहामनाविल ! सतां राजीमतीरागतः ॥ १ ॥

जीयासुर्जिनपुङ्गवा जगति ते राज्यर्धिषु प्रोल्लसद्-
धामानेकपराजितासुं विभयाऽसन्नाभिरामोदिताः ।
योधालीभिरुदित्वरा न गणिता यैः स्फातयः प्रस्फुरद्-
धामानेकपराऽजितासु विभया सन्नाभिरामोदिताः ॥ २ ॥

या गङ्गेव जनस्य पङ्कमखिलं पूता हरत्यञ्जसा,
*भारत्यागमसङ्गता नयतताऽमायाचिता साधुना ।*
अध्येतुं गुरुसन्निधौ मतिमता कर्तुं सतां जन्मभी-
भारत्यागमसंगता न यततामायाचिता साऽधुना ॥ ३ ॥

व्योम स्फारविमानतूरनिनदैः श्रीनेमिभक्तं जनं,
प्रत्यक्षामरसालपादपरतां वाचालयन्ती हितम् ।
दद्यान्नित्यमिताऽऽम्रलुम्बिलतिकाविभ्राजिहस्ताऽहि तं,
प्रत्यक्षामरसालपादपरताऽम्बा चालयन्तीहितम् ॥ ४ ॥

## २३ श्रीपार्श्वजिनस्तुतयः

सौधे सौधे रसे स्वे रुचिररुचिरया हारिलेखारिलेखा,
पायं पायं निरस्ताघनयघनयशो यस्य नाथस्य नाथ ।
पार्श्वं पार्श्वं तमोद्रौ तमहतमह ! न क्षोभजालं भजाऽलं,
कामं कामं जयन्तं मधुरमधुरमाभाजनत्वं जन ! त्वम् ॥ १ ॥

तीर्थे तीर्थेशराजी भवतु भवतुदऽस्तारिभीमारिभीमा-
लीकालीकालकूटाऽकलितकलितयोल्लासमूहे समूहे ।

या मायामानहर्त्री भवविभवविदां सास विश्वासविश्वा-
ऽनाप्तानाप्ताभिशङ्का विमदविमदनत्राऽसमोहाऽसमोहा ॥ २ ॥

गौरागौरातिकीर्तेः परमपरमतह्रासविश्वासविश्वा-
देया देयान् मुदं मे जनितजनितनूभावतारावतारा ।
लोकालोकार्थवेत्तुर्नयविनयविधव्यासमानासमाना-
ऽभङ्गाऽभङ्गानुयोगा सुगमसुगमयुक् प्राकृतालङ्कृताऽलम् ॥ ३ ॥

लोके लोकेशनुत्या सुरससुरसभां रञ्जयन्ती जयन्ती,
व्यूहं व्यूहं रिपूणां जनभजनभवद्गौरवा मारवामा ।
कान्ता कान्ताहिपस्येरितदुरितदुरन्ताहितानां हितानां,
दद्यादद्यालिमुच्चैरुचितरुचितमा संस्तवे च स्तवे च ॥ ४ ॥

## २४ श्रीमहावीरजिनस्तुतयः

तव जिनवर ! तस्य बद्ध्वा रतिं योगमार्गं,
भजेयं महावीर ! पाथोधिगम्भीर ! धीरानिशं
मुदित ! विभव ! सन्निधानेऽसमोहस्य सिद्धार्थ
-नामक्षमाभृत्कुमारापहेयस्य वाचा रतः ।
मुनिजननिकरश्चरित्रे पवित्रे परिक्षीणकर्मा,
स्फुरद्ज्ञानभाक् सिद्धिशर्माणि लेभेतरा-
मुदितविभवसन्निधानेऽसमोहस्य सिद्धार्थ !,
नाम क्षमाभृत् कुमारापहे यस्य वाऽऽचारतः ॥ १ ॥

नयकमलविकासने का सुरी विस्मयस्मेर,
नेत्राऽजनिप्रौढभामण्डलस्य क्षतध्वान्त ! हे,
न तव रविभया समानस्य रुच्याङ्गहाराहितेऽ-
पारिजातस्य भास्वन्महेलास्यभारोचिते ।

कनकरजतरत्नसालत्रये देशनां तन्वतो,
ध्वस्तसंसार तीर्थेशवार ! द्युसद्धोरणी-
नत ! वर ! विभयाऽसमानस्य रुच्याङ्गहारा,
हिते पारिजातस्य भास्वर ! महे लास्यभारोचिते ॥ २ ॥

वचनमुचितमर्हतः संश्रय श्रेयसे प्रीणयद्
भव्य ! भीमे दधद् ध्वस्ततापं भवाम्भोनिधौ
परमतरणहेतुलाभं गुरावार्यमानन्दिता
ऽपायशोभावतो भासमानस्य माराजितम् ।
दलितजगदसद्ग्रहं हेतुदृष्टान्तनिष्पिष्ट-
सन्देहसन्दोहमद्रोह ! निर्मोह ! निःशेषिता-
परमतरण ! हेऽतुलाभङ्गुरावार्यमानं दिता !,
पायशोभावतो भाऽसमानस्य माराजितम् ॥ ३ ॥

अहमहमिकया समाराद्धुमुत्कण्ठितायाः,
क्षणे वाङ्मयस्वामिनी शक्तिमह्नाय दद्यात्तरां
सकलकलशता रमाराजिता पापहाने,
कलाभा स्थिताऽसद्विपक्षे मराले रवार्यागमम् ।
दधतमिह सतां दिशन्ती सदैङ्कारविस्फार,
सारस्वतध्यानदृष्टा स्वयं मङ्गलं तन्वती
सकलकलशताऽरमाऽऽराजितापापहाऽने-,
कलाभास्थिता सद्विपक्षेऽमरालेरवार्याऽऽगमम् ॥ ४ ॥

## अथ प्रशस्तिः

यस्यासन् गुरवोऽत्र जीतविजयाः प्राज्ञा प्रकृष्टाशया
भ्राजन्ते सनया नयादिविजयाः प्राज्ञाश्च विद्याप्रदाः ।
प्रेम्णां यस्य च सद्म पद्मविजयो जातः सुधीः सोदरः
सोयं न्यायविशारदः स्म तनुते विज्ञः स्तुतीरर्हताम् ॥ १ ॥

कृत्वा स्तुतिस्रजमिमां, यदवापि शुभाशयान्मया कुशलम् ।
तेन मम जन्मबीजें, रागद्वेषौ विलीयेताम् ॥ २ ॥

सूर्याचन्द्रमसौ याव-दुदयेते नभस्तले ।
तावन्नन्दत्वयं ग्रन्थो, वाच्यमानो विचक्षणैः ॥ ३ ॥

# ॥ सिद्धसहस्त्रनामकोशः ॥

ऐन्द्री श्रीः प्रणिधानस्य फलं यस्यानुषङ्गिकम् ।
मुख्यं महोदयप्राप्तिस्तं सिद्धं प्रणिदध्महे ॥ १ ॥

तस्याष्टसहस्राख्यास्मरणं शरणं सताम् ।
मङ्गलानां च सर्वेषां परमं मङ्गलं स्मृतम् ॥ २ ॥

## प्रथमशतकप्रकाशः

अनादिशुद्धः[१] शुद्धात्मा[२] स्वयंज्योतिः[३] स्वयम्प्रभुः[४] ।
केवलः[५] केवली[६] ज्ञानी[७] केवलात्मा[८] कलोज्झितः[९] ॥ ३ ॥

सार्द्धसत्रिकलातीतो[१०]ऽन्यूनाधिक-कलानिधिः[११] ।
अनन्तदृग[१२] नन्तात्मा[१३]ऽनन्तप्राप्ति[१४] रनन्तजित्[१५] ॥ ४ ॥

परमेष्ठी[१६] परब्रह्म[१७] परमात्मा[१८] सनातनः[१९] ।
सदाशिवः[२०] परंज्योति[२१] र्ध्रुवः[२२] सिद्धो[२३] निरञ्जनः[२४] ॥ ५ ॥

अनन्तरूपो[२५]ऽनन्ताख्य[२६] स्तथारूप[२७] स्तथागतः[२८] ।
यथारूपो[२९] यथाजातो[३०] यथाख्यातो[३१] यथास्थितः[३२] ॥ ६ ॥

लोकाग्रमौलि[३३] र्लोकेशो[३४] लोकालोक-विलोककः[३५] ।
लोकेड्यो[३६] लोकपो[३७] लोकत्रातो[३८] लोकाग्रशेखरः[३९] ॥ ७ ॥

विश्वदृग्[४०] विश्वतश्चक्षु[४१] र्विश्वतः पाणि[४२] रात्मभूः[४३] ।
स्वयम्भू[४४] र्विश्वतोबाहु[४५] र्विश्वात्मा[४६] विश्वतोमुखः[४७] ॥ ८ ॥

विश्वकृद्[४८] विश्वरूपश्च[४९] विश्वव्यापी[५०] विधु[५१] र्विधिः[५२] ।
विश्वशीर्षो[५३] नमद्विश्वो[५४] विश्वाधारश्च[५५] विश्वसूः[५६] ॥ ९ ॥

विश्वम्भर[:][५७] शिवो[५८] विश्वावतारो[५९] विश्वदर्पणः[६०] ।
विश्वख्यातो[६१] जयो[६२] मृत्युञ्जयो[६३] मृत्युनिवारणः[६४] ॥ १० ॥

सर्वादिः[६५] सर्वगः[६६] सर्वजनीनः[६७] सर्वदर्शनः[६८] ।
सुश्रुतः[६९] सुस्थितः[७०] सुस्थः[७१] पुराणः[७२] प्राक्तनो[७३] विभुः[७४] ॥ ११ ॥

विधिशेषो[७५] विधेः सारः[७६] परो विधि-निषेधतः[७७] ।
प्रशान्तवाह्य[७८] निर्वाच्यौ[७९] विसभागपरिक्षयी[८०] ॥ १२ ॥

अपदो[८१] ऽनक्षरो[८२] ऽनिच्छो[८३] ह्यतद्व्यावृत्तिलक्षणः[८४] ।
ब्रह्मचर्यफलीभूतो[८५] ब्रह्मा[८६] ब्रह्मपदस्थितः[८७] ॥ १३ ॥

आत्मवान्[८८] वेदवान्[८९] विष्णु[९०] र्ब्रह्मवान्[९१] ब्रह्मसम्भवः[९२] ।
सूक्ष्मः[९३] परात्परो[९४] जेता[९५] जयी[९६] सर्वमलोज्झितः[९७] ॥ १४ ॥

उपासनानां फलद[९८] उपास्यत्वेन देशितः[९९] ।
सर्वाविप्रतिपन्नश्च[१००] कृषीष्ट कुशलानि नः ॥ १५ ॥

## द्वितीयशतकप्रकाशः

धर्मवि[१]द्धर्मकृ[२]द्धर्मी[३] धर्मात्मा[४] धर्मदेशकः[५] ।
सुधर्मा[६] धर्मदो[७] धर्मनायको[८] धर्मसारथिः[९] ॥ १ ॥

दशधर्मा[१०] ऽनन्तधर्मा[११] धर्मसारः[१२] स्वधर्मगः[१३] ।
परधर्मविनिर्मुक्तो[१४] धर्मप्रापी[१५] विधर्मभूत्[१६] ॥ २ ॥

धर्मचक्री[१७] महाधर्मा[१८] धर्ममूर्तिः[१९] सुधर्मदृग्[२०] ।
धर्माङ्गो[२१] धर्मसन्न्यासी[२२] धर्माधर्मविवर्जितः[२३] ॥ ३ ॥

धर्मोत्तरो[२४] धर्मकीर्ति[२५] र्धर्ममुद्[२६] धर्ममण्डलः[२७] ।
धर्मानोघा[२८] धर्ममौलि[२९] र्धर्माग्रो[३०] धर्मशासनः[३१] ॥ ४ ॥

धर्मक्षमी[३२] धर्ममृदु[३३] धर्मर्जु[३४] धर्मसंयमः[३५] ।
धर्मसत्यो[३६] धर्मतपा[३७] धर्मब्रह्मा[३८] शुचिस्ततः ॥ ५ ॥

धर्मत्यागी[४०] धर्ममुक्ति[४१] धर्मस्थो[४२] धर्मशाश्वतः[४३] ।
धर्मलभ्यो[४४] धर्मसेव्यो[४५] धर्मश्रद्धावशंवदः[४६] ॥ ६ ॥

धर्मधातुः[४७] क्षमाधातुः[४८] श्रद्धाधातु[४९] रधातुभाग्[५०] ।
श्रीपातश्च[५१] निपातश्च[५२] ह्रीपातः[५३] पातकक्षयी[५४] ॥ ७ ॥

श्रेष्ठः[५५] स्थविष्ठः[५६] स्थविरो[५७] ज्येष्ठः[५८] प्रेष्ठः[५९] पुरोहितः[६०] ।
गरिष्ठधी[६१] ररिष्टच्छिद्[६२] बहिष्ठो[६३] निष्ठ[६४] एव च ॥ ८ ॥

व्योममूर्ति[६५] रमूर्तिश्चा[६६] न्तरिक्षात्मा[६७] नभोमयः[६८] ।
गगनात्मा[६९] महाकाश[७०] श्चाम्बरात्मा[७१] निरम्बरः[७२] ॥ ९ ॥

सुयज्वा[७३] यज्ञपुरुषो[७४] यज्ञाङ्ग[७५] ममृतं[७६] हविः[७७] ।
धर्मयज्ञो[७८] महावीरो[७९] यजमानो[८०] नियाजभाग्[८१] ॥ १० ॥

मन्त्रमूर्ति[८२] र्मन्त्रबीजं[८३] मन्त्रन्यासश्च[८४] मन्त्रराट्[८५] ।
महामन्त्रो[८६] मन्त्रपति[८७] ध(र्ध)र्मस्थानं[८८] सुमन्त्रभूः[८९] ॥ ११ ॥

चिन्मन्त्रो[९०] मन्त्रसंस्थानो[९१] मन्त्रेड्यो[९२] मन्त्रपूजितः[९३] ।
मन्त्रमात्रः[९४] स्फुरन्मन्त्रो[९५] मंत्रदेवश्च[९६] मान्त्रिकः[९७] ॥ १२ ॥

पञ्चमङ्गलमन्त्रश्च[९८] सर्वमन्त्रावतारवान्[९९] ।
मन्त्रे प्रत्यक्षरूपो[१००] यस्तस्मै भगवते नमः ॥ १३ ॥

## तृतीयशतकप्रकाशः

जगन्नाथो[१] जगज्ज्येष्ठो[२] जगत्स्वामी[३] जगत्पिता[४] ।
जगन्नेता[५] जगद्भर्ता[६] जगद्बन्धु[७]र्जगद्गुरुः[८] ॥ १ ॥

जगत्त्राता[९] जगत्पाता[१०] जगद्रक्षो[११] जगत्सखः[१२] ।
जगदीशो[१३] जगत्स्रष्टा[१४] जगद्वन्द्यो[१५] जगद्धितः[१६] ॥ २ ॥

जगत्पति[१७] र्जगन्मान्यो[१८] जगच्छास्ता[१९] जगन्मुखम्[२०] ।
जगच्चक्षु[२१] र्जगन्मित्रं[२२] जगद्दीपो[२३] जगत्सुहृत्[२४] ॥ ३ ॥

जगत्पूज्यो[२५] जगद्ध्येयो[२६] जगद्वि[२७]ज्जगदर्यमा[२८] ।
जगन्माता[२९] जगद्भ्राता[३०] जगद्भानु[३१] र्जगन्मणिः[३२] ॥ ४ ॥

जगदर्च्यो[३३] जगच्चिन्त्यो[३४] जगत्काम्यो[३५] जगत्प्रियः[३६] ।
जगद्धेतु[३७] र्जगत्केतु[३८] र्जगत्सीमा[३९] जगन्निधिः[४०] ॥ ५ ॥

जगद्वैद्यो[४१] जगज्ज्योति[४२] र्जगत्पोषी[४३] जगद्वृषः[४४] ।
जगत्पूषा[४५] जगद्वुर्यो[४६] जगद्बीजं[४७] जगत्तरुः[४८] ॥ ६ ॥

जगत्सारो[४९] जगन्मूलं[५०] सिद्धार्थः[५१] सिद्धशासनः[५२] ।
सिद्धस्थानः[५३] सुसिद्धान्तः[५४] सिद्धगीः[५५] सिद्धधीः[५६] सुधीः[५७] ॥ ७ ॥

भवाब्ध्यगस्ति[५८] र्भवहृद्[५९] र्भवच्छि[६०]दपुनर्भवः[६१] ।
कालातीतो[६२] भवातीतो[६३] भयातीतः[६४] कलातिगः[६५] ॥ ८ ॥

गुणातीतो[६६] रजोऽतीतः[६७] कल्यातीतः[६८] कुलातिगः[६९] ।
वर्णातीतः[७०] पदातीतो[७१] मार्गातीतो[७२] ऽक्षरातिगः[७३] ॥ ९ ॥

वाक्यातीतः[७४] स्मयातीतो[७५] वाचोऽतीतो[७६] नयातिगः[७७] ।
वृत्त्यतीतः[७८] स्पृहातीतो[७९] न्यासातीतो[८०] जनातिगः[८१] ॥ १० ॥

छन्दोऽतीतो[८२] जनातीतो[८३] लोकातीतो[८४] लयातिगः[८५] ।
योगातीत[८६] स्तपोऽतीतो[८७] व्रतातीतो[८८] यमातिगः[८९] ॥ ११ ॥

ध्यानातीतो[९०] मनोऽतीत[९१] श्चिन्तातीत[९२] श्चयातिगः[९३] ।
लेपातीतो[९४] गदातीतो[९५] कामातीत[९६] स्तमोऽतिगः[९७] ॥ १२ ॥

वेदातीतो[९८] वयोऽतीतः[९९] सर्वातीतश्च[३००] यःप्रभुः ।
कर्मेन्धनानि दह्यन्ते तस्य ध्यानाग्निना क्षणात् ॥ १३ ॥

## चतुर्थशतकप्रकाशः

अमृतात्मा[१]ऽमृतोद्भूतो[२]ऽमृतस्रष्टा[३]ऽमृतोद्भवः[४] ।
अमृतौघो[५]ऽमृताधारो[६]ऽमृताङ्गो[७]ऽमृतसंस्थितिः[८] ॥ १ ॥

कृतज्ञः[९] कृतकृत्यश्च[१०] कृतधर्मा[११] कृतक्रतुः[१२] ।
कृतवेदः[१३] कृतात्मा च[१४] संस्कृतास्ति[१५] रसंस्कृतः[१६] ॥ २ ॥

भावः[१७] स्वभावो[१८] निर्वर्गो[१९] मुख्यवर्गो[२०]ऽपवर्गभाग्[२१] ।
सत्ता[२२] पदार्थः[२३] पूर्णार्थो[२४] लक्षणार्थ[२५] स्त्रिलक्षणः[२६] ॥ ३ ॥

पद्मेशः[२७] पद्मसम्भूतिः[२८] पद्मभूः[२९] पद्मविष्टरः[३०] ।
हृत्पद्मस्थो[३१] महापद्मः[३२] पद्मः[३३] पद्मासनोदयः[३४] ॥ ४ ॥

हिरण्यगर्भः[३५] श्रीगर्भो[३६] विरञ्चि[३७] र्द्रुहिणश्च[३८] कः[३९] ।
वेदगर्भः[४०] शतानन्दः[४१] पुराणज्ञः[४२] पुराणगः[४३] ॥ ५ ॥

विश्वरेता[४४] हंसगति[४५] र्महाहंसश्च[४६] हंसराट्[४७] ।
प्रजापतिः[४८] प्रजानाथो[४९] हिरण्येशो[५०] हिरण्मयः[५१] ॥ ६ ॥

हृषीकेशो[५२] नभःकेशः[५३] स्थास्नु[५४] र्जिष्णुः[५५] पितामहः[५६] ।
भिषग्वरो[५७]ऽगदङ्कारो[५८] वैद्यो[५९] ध्वस्तगदो[६०]ऽगदः[६१] ॥ ७ ॥

वरदः[६२] पारदः[६३] श्रीदः[६४] सिद्धिदः[६५] सर्वशर्मदः[६६] ।
वर्षीयान्[६७] वृषभो[६८] वर्षो[६९] वृषकेतु[७०] र्वृषध्वजः[७१] ॥ ८ ॥

महाबोधि[७२] र्वर्द्धमानो[७३] महर्द्धि[७४] र्वृद्धिलक्षणः[७५] ।
अहानि-वृद्धि[७६] स्तुल्यात्मा[७७] त्रिलिङ्गो[७८]ऽतिस्त्रिलिङ्गकः[७९] ॥ ९ ॥

निरक्षः[८०] कृतभूरक्षो[८१] रक्षोहन्ता[८२] स्वरक्षितः[८३] ।
आत्मेक्षणः[८४] क्षणमयः[८५] शुभंयुः[८६] पुष्कलेक्षणः[८७] ॥ १० ॥

त्रयीमय[८८]स्त्रयीकेतु[८९]र्धारावाही[९०] त्रयीधरः[९१] ।
त्रयीतेजोमय[९२] स्त्रेता[९३] दशपारमितेश्वरः[९४] ॥ ११ ॥

त्रयीतनु[९५]स्त्रयीगीतः[९६] पिटकत्रयदेशितः[९७] ।
त्रिस्थ[९८]स्त्रिकरणोन्मुक्त[९९]स्त्रिब्रह्मप्रकृतिः[४००] श्रिये ॥ १२ ॥

## पञ्चमशतकप्रकाशः

शक्तो[१] निरेजः[२] कूटस्थः[३] शीलेशः[४] शीलनायकः[५] ।
शैलेशः[६] प्राप्तशैलेशि[७]र्निश्चयी[८] व्यवहारमुक्[९] ॥ १ ॥

अनुपाधि[१०]रुपाधिच्छित्[११] सर्वोपाधिविशुद्धिमान्[१२] ।
अनाचार्यो[१३]ऽनुपाध्यायो[१४]ऽगुरु[१५]र्गुरुशिरोमणिः[१६] ॥ २ ॥

स्वयम्बुद्धो[१७] विबुद्धश्च[१८] सम्बुद्धो[१९] बुद्धजागरः[२०] ।
तुरीयावस्थित[२१]स्तुर्यः [२२]सिद्धजागरिकात्रयः[२३] ॥ ३ ॥

अशस्त्रः[२४] शस्त्रमुक्[२५] शस्त्रोज्झित[२६] शस्त्रविवर्जितः[२७] ।
अशस्त्री[२८] परमाशस्त्रो[२९]ऽशस्त्रभी[३०]रकुतोभयः[३१] ॥ ४ ॥

दयासिन्धु[३२]र्दयापालो[३३] दयानेता[३४] दयानिधिः[३५] ।
दयालुः[३६] स्वदयाचिह्नो[३७] दयाश्रेष्ठो[३८] दयोदयः[३९] ॥ ५ ॥

दयास्थायी[४०] दयास्थानं[४१] सर्वशुद्धदयामयः[४२] ।
दयापात्रं[४३] दयामात्रो[४४] दयाव्यासो[४५] दयोन्नतिः[४६] ॥ ६ ॥

आत्माराम[४७]श्चिदाराम[४८]श्चिद्रामो[४९] रामसत्तमः[५०] ।
श्रीरामः[५१] केवलारामो[५२] दयारामो[५३] विरामवान्[५४] ॥ ७ ॥

अजन्मरामो[५५]ऽति (ती) रामो[५६] महारामो[५७] मनोरमः[५८] ।
स्वतोरामः[५९] स्वयंरामः[६०] केवलो राम[६१] एव च ॥ ८ ॥

महेन्द्राऽर्च्यो[६२] महेन्द्रेड्यो[६३] महेन्द्रो[६४]ऽतीन्द्रियार्थदृक्[६५] ।
अनिन्द्रियो[६६]ऽहमिन्द्रार्च्यो[६७]ऽतीन्द्रो[६८]ऽतीन्द्रियदृक्[६९] स्वदृक्[७०] ॥ ९ ॥

भूतात्मा[७१] भूतभृद्[७२] भूतरक्षी[७३] भूताभयङ्करः[७४] ।
प्रभवो[७५] विभवो[७६] भूताधारो[७७] भूतानुपग्रहः[७८] ॥ १० ॥

अस्तप्राणो[७९] महाप्राणः[८०] प्राणदः[८१] प्राणितेश्वरः[८२] ।
प्राणेशः[८३] प्राणदयितः[८४] प्राणाग्र्यः[८५] प्राणवल्लभः[८६] ॥ ११ ॥

प्राणोत्तरः[८७] प्राणगति[८८]रप्राणः[८९] प्राणिनामिनः[९०] ।
अग्राह्यो[९१] गहनं[९२] गूह्यं[९३] प्रणवः[९४] प्रणवोत्सवः[९५] ॥ १२ ॥

प्राणायामप्रकटितः[९६] प्राणमन्त्रो[९७] जपञ्जपः[९८] ।
द्रष्टा[९९] कलङ्कलीभावः[५००] सिद्धः सिद्धिं ददातु नः ॥ १३ ॥

## षष्ठशतकप्रकाशः

महाशिवो[१] महाज्योति[२]र्महासिद्धो[३] महाध्रुवः[४] ।
*महादृष्टि[५]र्महाप्रासि[६]र्महारूपो[७] महायशाः[८]* ॥ १ ॥

महात्राता[९] महाचक्षु[१०]र्महाधारो[११] महाविधिः[१२] ।
*महाविभु[१३]र्महासारो[१४] महावेदो[१५] महागमः[१६]* ॥ २ ॥

महोपास्यो[१७] महाध्येयो[१८] महाव्यापी[१९] महामहः[२०] ।
महानाथो[२१] महाज्येष्ठो[२२] महास्वामी[२३] महासुहृत्[२४] ॥ ३ ॥

महास्रष्टा[२५] महावन्द्यो[२६] महामान्यो[२७] महामुनिः[२८] ।
महापूज्यो[२९] महाभ्राता[३०] महाकाम्यो[३१] महाप्रियः[३२] ॥ ४ ॥

महाहेतु[३३]र्महासीमा[३४] महावैद्यो[३५] महौषधः[३६] ।
महामार्गो[३७] महान्यासो[३८] महापूषा[३९] महाचलः[४०] ॥ ५ ॥

महामूर्ति[४१]र्महाचक्री[४२] महाराजो[४३] महानयः[४४] ।
महाकीर्ति[४५]र्महास्फुर्ति[४६]र्महासत्यो[४७] महातपाः[४८] ॥ ६ ॥

महामुक्ति[४९]र्महात्यागी[५०] महाब्रह्मा[५१] महाशुचिः[५२] ।
महाधातु[५३]र्महाप्रष्ठो[५४] महायज्वा[५५] महाहविः[५६] ॥ ७ ॥

महाव्योम[५७] महाबीजं[५८] महामात्रो[५९] महाधृतिः[६०] ।
महाकृतो[६१] महाभावो[६२] महावर्गो[६३] महाधरः[६४] ॥ ८ ॥

महासनो[६५] महाभुति[६६]र्महेशश्च[६७] महावृष:[६८] ।
महाशिष्टि[६९]र्महादेशो[७०] महाज्ञश्च[७१] महाव्रत:[७२] ॥ ९ ॥

महागति[७३]र्महास्थास्नु[७४]र्महावृद्धि[७५]र्महाक्षण:[७६] ।
महागुरु[७७]र्महाणुश्च[७८] महावेश्मा[७९] महावशी[८०] ॥ १० ॥

महाशक्रो[८१] महाशीलो[८२] महाचार्यो[८३] महागुण:[८४] ।
महादयो[८५] महापात्रो[८६] महाव्याप्ति[८७]र्महोन्नति:[८८] ॥ ११ ॥

महार्णवो[८९] महामेरु[९०]र्महाशाखो[९१] महाधन:[९२] ।
महावसु[९३]र्महावेदो[९४] महापोतो[९५] महागृहम्[९६] ॥ १२ ॥

महादित्यो[९७] महासोमो[९८] महाप्रज्ञाङ्कुर[९९]स्तथा ।
महातर्कावतारश्च[१००] श्रेयांसि वितनोतु न: ॥ १३ ॥

## सप्तमशतकप्रकाश:

विजयो[१] वैजयन्तश्च[२] जयन्त[३]श्चापराजित:[४] ।
सर्वार्थसिद्ध[५]स्तीर्थार्व:[६] स्वयम्भूरमणो[७] जय:[८] ॥ १ ॥

सदातन:[९] सदाज्ञान:[१०] सदासत्य:[११] सदाश्रय:[१२] ।
सदासुहृत्[१३] सदासौख्य:[१४] सदाविद्य:[१५] सदोदय:[१६] ॥ २ ॥

सदायोग:[१७] सदाभोग:[१८] सदातृप्त:[१९] सदानघ:[२०] ।
सदास्नात:[२१] सदालेप:[२२] सदोद्द्योत:[२३] सदास्थिति:[२४] ॥ ३ ॥

अतुल्यो[२५]ऽदृशो[२६]ऽकल्यो[२७]ऽसमानो[२८] सवया[२९] नग:[३०] ।
अगो[३१] नगाधिराजश्च[३२] स्थावरो[३३] जङ्गमाश्रय:[३४] ॥ ४ ॥

प्रक्षीणबन्ध:[३५] कामारि:[३६] प्रमाणपरिधि:[३७] प्रधी:[३८] ।
कृतानन्द:[३९] कृतामोद:[४०] कृतशर्मा[४१] कृतोदय:[४२] ॥ ५ ॥

कृतान्तसृट्[४३] कृतान्तच्छित्[४४] कृतान्तज्ञ:[४५] कृतान्तहृत्[४६] ।
समय:[४७] समयातीतो[४८] विषयो[४९] विषमास्त्रजित्[५०] ॥ ६ ॥

जितारि[५१]रजितो[५२] धर्ममेघो[५३]ऽमोघश्च[५४] शम्भवः[५५] ।
सुप्रतिष्ठो[५६] दृढरथो[५७] विश्वसेनो[५८] महारथः[५९] ॥ ७ ॥

चिन्तामणिः[६०] सुरमणिः[६१] कामकुम्भः[६२] सुरद्रुमः[६३] ।
प्ररोहो[६४] दक्षिणावर्तः[६५] कामधेनु[६६]रकश्मलः[६७] ॥ ८ ॥

चितार्द्धार्धप्रद[६८]श्चैत्य[६९] श्चिरच्छाय[७०]श्चिरस्थितिः[७१] ।
जैवातृको[७२]ऽनभिज्ञानो[७३] विस्पर्शः[७४] स्पर्शगोचरः[७५] ॥ ९ ॥

असम्मोहाप्य[७६] उन्नेयः[७७] पुरुहूतो[७८]ऽवतारमुक्[७९] ।
दशलाक्षणिको[८०] देशो[८१]ऽनुद्देशो[८२]ऽनुपचारभूः[८३] ॥ १० ॥

बन्धुरो[८४] रुचिर[८५]श्चारु[८६]र्बन्धू[८७] रुप्यश्च[८८] शोभनः[८९] ।
शतशाखः[९०] शतर्क्षश्च[९१] शततारः[९२] शताध्वगः[९३] ॥ ११ ॥

शतोपायः[९४] शताख्यानः[९५] शतकीर्तिः[९६] शताह्वयः[९७] ।
शतगृह्यः[९८] शतोद्गीथः[९९] शतवृत्तिः[१००] श्रियेऽस्तु नः ॥ १२ ॥

## अष्टमशतकप्रकाशः

धीशो[१] धियःपति[२]र्धीन्द्रो[३] धिषणः[४] शेमुषीधरः[५] ।
धीगणो[६] धीसमूहश्च[७] गीष्पतिश्च[८] गिराम्पतिः[९] ॥ १ ॥

वाचस्पति[१०]र्वचःस्रष्टा[११] बृहदात्मा[१२] बृहस्पतिः[१३] ।
बृहदारण्यको[द्]द्योती[१४] मनीषीशो[१५] मनीषितः[१६] ॥ २ ॥

नयोत्क्रान्तो[१७] नयोद्भेदी[१८] ज्ञानगर्भः[१९] प्रभास्वरः[२०] ।
रत्नगर्भो[२१] दयागर्भः[२२] पुण्यगर्भः[२३] स्वगर्भगः[२४] ॥ ३ ॥

लक्ष्मीशः[२५] कमलानाथो[२६] निर्मन्तु[२७]र्मन्तुमोचनः[२८] ।
आशामोचन[२९] उद्दाम[३०] आशाविश्रामभाजनम्[३१] ॥ ४ ॥

धर्मपूयो[३२] धर्मगणो[३३] धर्मनेमि[३४]रकर्मठः[३५] ।
धर्मचक्रायुधो[३६] धर्मघोषणो[३७] धर्मपोषणः[३८] ॥ ५ ॥

स्पृहामुक्तः[३९] स्पृहात्यागी[४०] स्पृहापर्शुः[४१] स्पृहोज्झितः[४२] ।
दूरस्थो[४३] दूरदृग्[४४] दूरपथ[४५]स्तथ्यः[४६] स्थितिप्रणीः[४७] ॥ ६ ॥

अध्यात्मगम्यो[४८]ऽध्यात्माङ्गो[४९]ऽध्यात्माप्यो[५०]ऽध्यात्मलोचनः[५१] ।
अध्यात्माधित्यको[५२]ऽध्यात्मकैलाशो[५३]ऽध्यात्मशासनः[५४] ॥ ७ ॥

अध्यात्मवासो[५५]ऽध्यात्मार्चो[५६]ऽध्यात्मार्को[५७]ऽध्यात्मभास्करः[५८] ।
अध्यात्मांशु[५९] र्घनाध्यात्मः[६०] स्वाध्यात्मो[६१]ऽध्यात्मसङ्ग्रहः[६२] ॥ ८ ॥

अध्यात्मकोटि[६३]रध्यात्मसारो[६४]ऽध्यात्मपरिग्रहः[६५] ।
अध्यात्मसृष्टि[६६] रध्यात्मपवित्रो[६७]ऽध्यात्मपारगः[६८] ॥ ९ ॥

अध्यात्मपूर्णो[६९]ऽध्यात्मेष्टो[७०]ऽध्यात्माढ्यो[७१]ऽध्यात्मसंश्रयः[७२] ।
अध्यात्मयज्ञो[७३]ऽध्यात्मेन्द्रो[७४]ऽध्यात्मेनो[७५]ऽध्यात्मवासितः[७६] ॥ १० ॥

अध्यात्मभाव्यो[७७]ऽध्यात्मेद्धो[७८]ऽध्यात्माध्वा[७९]ऽध्यात्मसङ्गतः[८०] ।
अध्यात्मरङ्गो[८१]ऽध्यात्मार्थो[८२]ऽध्यात्मांभो[८३]ऽध्यात्ममन्दिरम्[८४] ॥ ११ ॥

अध्यात्मपूतो[८५]ऽध्यात्मस्थो[८६]ऽध्यात्माज्ञो[८७]ऽध्यात्मसंवरः[८८] ।
अध्यात्मस्थो[८९]ऽध्यात्मधनो[९०]ऽध्यात्मज्ञो[९१]ऽध्यात्मविष्टरः[९२] ॥ १२ ॥

अध्यात्मपीठो[९३]ऽध्यात्मेलो[९४]ऽध्यात्मेतो[९५]ऽध्यात्मसन्ततः[९६] ।
प्राध्यात्मो[९७]ऽध्यात्मसन्तानो[९८]ऽध्यात्माख्यो[९९]ऽध्यात्मविन्[१००]मुदे॥ १३॥

## नवमशतकप्रकाशः

अभो[१]ऽनदो[२]ऽरवो[३]ऽनादो[४]स्वरो[५]ऽस्वानो[६]ऽस्वनो[७]ऽध्वनिः[८] ।
अवृद्धि[९]रगुणो[१०] बिन्दु[११]रविसर्गो[१२]ऽलुग[१३] क्रमः[१४] ॥ १ ॥

अहसो[१५]ऽमातृको[१६]ऽप्रत्याहारो[१७]ऽघोषो[१८]ऽनुपाहितः[१९] ।
अनामा[२०]ऽप्रातिपदिको[२१]ऽसमासो[२२]ऽविग्रहो[२३]ऽग्रहः[२४] ॥ २ ॥

अनाख्यातो[२५]ऽकृदन्त[२६] श्चातद्धितो[२७] नणु (?नाप्यु)णादिकः[२८] ।
अयोगो[२९]ऽरूढि[३०] रस्तोभो[३१]ऽच्छन्दा[३२]श्चाप्यनलङ्कृतिः[३३] ॥ ३ ॥

अपातो[३४]ऽलम्बनो[३५]ऽक्रान्ति[३६] रराशि[३७] रनहर्गणः[३८] ।
अनतो[३९]ऽनुन्नातो[४०]ऽलग्नो[४१]ऽनुच्चो[४२]ऽनीचो[४३]ऽदिगन्तरः[४४] ॥ ४ ॥

अनर्को[४५]ऽनाटको[४६]ऽनाट्यो[४७]ऽविभवो[४८]ऽतनुभावकः[४९] ।
स्थायी[५०] रसो[५१]ऽश्लथो[५२]ऽनाथो[५३]ऽकाव्यो[५४]ऽगीति[५५]रपिङ्गलः[५६]॥ ५ ॥

अनिघण्टु[५७]-रनध्यायो[५८]ऽसंहितो[५९]ऽवैद्यको[६०]ऽव्यथः[६१] ।
अग्रामो[६२]ऽमूर्च्छनो[६३]ऽवाद्यो[६४]ऽनेपथ्यो[६५]ऽनिङ्गितो[६६] ऽलयः[६७] ॥ ६ ॥

पश्यत्यात्मा[६८]ऽघनो[६९]ऽभाषो[७०] ह्यवैखरि[७१] रमध्यमः[७२] ।
अश्वेतो[७३]ऽपाटलो[७४]ऽश्यामो[७५]ऽनीलो[७६]ऽवभ्रु[७७]रपीतिमा[७८] ॥ ७ ॥

अतिक्तो[७९]ऽमधुरो[८०]ऽनम्लो[८१]ऽकषायो[८२]ऽलवणो[८३]ऽकटुः[८४] ।
असौगन्ध्यो[८५]ऽपदौर्गन्ध्यो[८६]ऽनुष्णो[८७]ऽशीतो[८८]ऽखरो[८९]ऽमृदुः[९०] ॥ ८ ॥

अस्निग्धो[९१]ऽगौरवो[९२]ऽलूक्षो[९३]ऽसंस्थानो[९४]ऽलघु[९५]रस्मयः[९६] ।
अवेदो[९७]वेदसङ्गीतः[९८] श्रीयुक्तः[९९] श्रीपतिः[१००] श्रिये ॥ ९ ॥

## दशमशतकप्रकाशः

आदिदेवो[१] युगादीशो[२] युगेशो[३] युगपो[४] युगः[५] ।
उपज्ञा[६] समयोपज्ञ[७]मप्रत्यूहो[८] महाबलः[९] ॥ १ ॥

शिवताति[१०]र्महाशान्ति[११]र्निर्वृतः[१२] संवृतो[१३]ऽवृतः[१४] ।
अरहा[१५] अरुहो[१६]ऽरोह[१७] आद्यध्येयः[१८] पदोत्तरः[१९] ॥ २ ॥

आत्मरक्षा[२०]ऽऽत्मकवच[२१] मात्मत्राता[२२]ऽऽत्मपञ्जरम्[२३] ।
अकुण्ठ[२४] स्त्र्यम्बकः[२५] सार्वः[२६] शर्वः[२७] सर्वेश्वरो[२८] मृडः[२९] ॥ ३ ॥

आद्येड्य[३०] आद्यचारित्र[३१] माद्यमन्त्र[३२] ऋगादिमः[३३] ।
आद्यवा[३४] गाद्यभू[३५] राद्यनेता[३६]ऽऽद्यर्षि[३७]र्वृषादिमः[३८] ॥ ४ ॥

आद्यमेघः[३९] प्रधानाद्यः[४०] क्ष्माद्योः[४१] नाद्यो[४२] निराक्रियः[४३] ।
नन्द्यो[४४] नादीनवो[४५] नन्द्यावर्तो[४६]ऽर्हः[४७] स्वस्तिको[४८]ऽस्तिकः[४९] ॥ ५ ॥

प्रोढो[५०]ऽनूढो[५१] मन्त्रशिखो[५२] दीप्तो[५३]ऽरिघ्नो[५४] निरन्तरः[५५] ।
भद्रो[५६]ऽनीदृ[५७]गनित्थंस्थो[५८]ऽयुतसिद्धः[५९] सुसंयुतः[६०] ॥ ६ ॥

अलोकस्पृग्[६१] लोकमध्यो[६२] लोकमान्यो[६३] विसंशयः[६४] ।
जागरूकः[६५] सदोन्निद्रो[६६] निस्तन्द्रो[६७] निःप्रमीलदृग्[६८] ॥ ७ ॥

अनिमेषो[६९] निमेषेन्द्रः[७०] प्रमाकर्ता[७१] प्रमाप्यकः[७२] ।
प्रमाणं च[७३] प्रमासम्प्रदानं[७४] शुद्धप्रमाश्रयः[७५] ॥ ८ ॥

प्रमापादानः[७६] सम्बन्धी प्रमायाः[७७] स्वप्रमोद्गतः[७८] ।
मार्गो[७९] मार्गप्रभु[८०]र्मार्गस्वामी[८१] मार्गविशोधकः[८२] ॥ ९ ॥

एकधी[८३]रेकपू[८४]रेकवेश्मै[८५]कस्थिति[८६]रेकभूः[८७] ।
एकोद्भव[८८]श्चैकमार्ग[८९] एकधामै[९०]कशासनः[९१] ॥ १० ॥

एकातपत्र[९२] एकाज्ञ[९३] एकाग्र[९४]श्चैकमन्दिरः[९५] ।
गभस्ति[९६] स्तरणि[९७] स्तारः[९८] सविता[९९] ध्वान्तनाशनः[१०००] ॥ ११ ॥

चतुष्कभा[१]गष्टगुणो[२] दीनपो[३] भक्तवत्सलः[४] ।
कृपालुः[५] स्फीतकरणो[६] धीरः[७] श्रीरमणः[८] श्रिये ॥ १२ ॥

## फलश्रुतिः

अष्टोत्तरं नामसहस्रमेतत् पठन्ति ये प्रातरपप्रमीलाः ।
ते स्वर्गलीलामनुभूय भूयः सिद्धालयं यान्ति न संशयोऽत्र ॥ १ ॥

## प्रशस्तिः

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशुं-
स्तत्त्वं किञ्चिदिदं यशोविजय इत्याख्याभृदाख्यातवान् ॥ २ ॥

# ॥ आर्षभीयचरित-महाकाव्यम् ॥

## -: प्रथमः सर्गः :-

श्रुतस्थितेर्यः कमलालयो यशः पुपोष विश्वे वृषभासनोचितः ।
तमःप्रमाथी पुरुषोत्तमः शुचिर्महेश्वरः पातु स नाभिनन्दनः ॥ १ ॥

स एव देवः किल भिन्ननामभिर्विविच्य लोकैस्समुपास्यते सदा ।
पृथक्पृथक्तस्य फलार्पणे पुनः सहायतामञ्चति वासनाभिदा ॥ २ ॥

तदागमाब्धेरुपजीव्य जीवनं परेऽपि गर्जन्ति घनाघना इव ।
तदीयवृष्टेरपि भूमिभेदतो विचित्रशस्योदयसम्पदीक्ष्यते ॥ ३ ॥

जगत्यशेषस्तदुपज्ञमंज्ञता निरासकृद्धर्मविधिः प्रवर्तते ।
न शार्वरध्वान्तहरं विना रवेरवेक्ष्यतेऽन्यस्य महोमहोदयम् ॥ ४ ॥

मरुत्प्रियो रुद्धमरुत्पथोऽपि स क्षमाधनोऽपि प्रथितोऽपरिग्रहः ।
घनाघनाशोऽपि जलाशयोज्झितो, न चिन्तनीयं चरितं महात्मनाम्॥ ५ ॥

अधः सुधाकुण्डगणं सुरापगां यदूर्ध्वमन्वेति च तिर्यगम्बुधीन् ।
वितृष्णभावोदितमप्यदो यशः, सतृष्णमत्यद्भुतमातनोति तत् ॥ ६ ॥

न जातु कोपात्कुटिलीकृते भ्रुवौ, शरासने नैव शिरो न्यधीयत ।
स्वशक्तिमोघीकृतशेषसाधनः, प्रताप एवास्य ततान दिग्जयम् ॥ ७ ॥

ग्रहेषु भास्वानिव कान्तिसम्पदा, सदाशयो युग्मिषु सर्वतोऽधिकः ।
प्रजाहितार्थं कृतसारसङ्ग्रहो, बभूव भूमान् भरते स आदिमः ॥ ८ ॥

सदा सुपर्वोल्लसितां घनाप्सरोविलासपूर्णाममरावतीमिव ।
जनैर्विनीतैः कृतसूनृताह्वयां, पुरीं विनीतामयमन्वशाद् विभुः ॥ ९ ॥

धनस्य पूर्तौ धनदः प्रदत्तदृक्, सदाऽस्य दास्य-स्थिर एव वासवः ।
दिशामभूवन्नधिपाश्च रक्षका न लक्षकार्येष्वपि ये प्रमद्वराः ॥ १० ॥

असङ्ख्यशक्तेस्त्रिजगद्विभोः कियत्, त्रिशक्तियुक्तत्वमुखेन वर्णनम् ।
गुणैरनन्तैः सहितस्य तस्य च, स्तुतिर्न षाड्गुण्यमुदीर्य पूर्यते॥ ११ ॥

अबाधयानेन तथा परस्परं, त्रिवर्गसेवा विधिवद् व्यधीयत।
यथाऽस्य सार्वत्रिकवैरवारिणः, स्वतोऽपवर्गोऽप्यनुकूलतां ययौ॥ १२॥

यथा यथा नीतिमतिं करोत्यसौ, भवत्यनीतिः पृथिवी तथा तथा।
द्वयोर्विरोधः परिणामतश्च नेत्यपूर्वमेतत्प्रभुराज्यकौशलम् ॥ १३॥

प्रसिद्धजीवाभयदातृतागुणात्, ततो न भेजे द्युसदां गुरुर्भयम्।
कुतोऽन्यथा याति तदीयवाग्मितागुणाभिभूतः स न कान्दिशीकताम्॥१४॥

स्वकीयगाम्भीर्यहृतः पयोनिधिः, समुच्छलन् वीचिकशान्तताडनम्।
अमुष्य सख्यं सृजतो मुखस्य किं, विधौः स्वसूनोर्न तनोति रोषणः॥१५॥

वदान्यभावादमुना विनिर्जितो, द्युसन्मणिः स्वर्गिमहीरुहैः समम्।
तथा व्यथामाप समुद्धृतां नतैर्यतो न दुःखं किल पञ्चभिः सह ॥१६॥

असङ्ख्यकालार्जितदातृतायशो, हृतं क्षणात्तेन वदान्यमौलिना।
न सङ्ख्ययैव व्यथयाऽपि पञ्चतामजीगणन् स्वामिति कल्पभूरुहाः

न वेदना मे जनटङ्कदारणादिति प्रभौ दातरि रोहणोऽहृषत्।
विभज्य दद्यादयमर्थिने न मामिति स्वतः स्वर्णगिरिस्त्वकम्पत ॥ १८॥

हरिः कणेहत्य निपीत-तद्वचः, सुधां तृणायापि न मन्यते बुधः।
अतः कथं तत्र सुधा सुधावता, रसेन साम्यं ननु सङ्गतं भवेत्॥ १९॥

व्रतं जिघृक्षु (क्षो)-र्भरतादिभूभुजां, कलाः पराः सादित-साधुचन्द्रमाः।
ददाति या मूर्ध्नि पदं भवस्य सा कला किलैकाभिमतास्य योगिनः॥२०॥

शते सुतानां चिरकालमुद्धृतो, विभज्य दत्तोऽप्यमुना क्षमाभरः।
व्रते ततो नापचकर्ष स क्षणं, महाद्भुतं प्रत्युत वृद्धिमासवान्॥ २१॥

कचच्छलाद् मुष्टिचतुष्टयाद्धवान्, विलुञ्चतु द्राक् चतुरः-क्रुधादिकान्।
न पञ्चमी मुष्टिरतिप्रयोजनेऽत्यरक्षदिन्द्रार्थनया नया सताम् ॥ २२॥

व्रतत्रपा मूर्ध्नि न केवलं निजा, महात्मभिर्भक्तकृपाऽपि धार्यते।
सुरोपरोधादिति रक्षितालका, जगाविदं मुष्टिसमस्यया विभुः ॥ २३॥

प्रभूत्तमाङ्गस्थितिपावना स्म मा, पतन्निमे भूरजसीति भावयन् ।
धृतान् स्ववस्त्रे निदधौ पयोम्बुधौ, शचीपतिस्तेन विलुञ्चितान् कचान्

असौ धृतध्यानसुखस्थिरासनो, जटावलीमण्डनमण्डितो बुधैः ।
अलक्ष्यताध्यात्मगुणैः फलेग्रहिर्लतान्वितः कोऽपि तपोमहीरुहः॥२५॥

अभूदसावुन्नतधर्ममेघभाग्, व्रतग्रहादादित एव किं विभुः ।
अटाट्यमानामिति मूर्ध्नि तज्जटामुदीक्ष्य साक्षादुदनायि योगिभिः॥२६॥

वृषाङ्कमेकं किल जाह्नवी श्रिता, श्रुतेति वार्त्ता सकलेऽपि मण्डले ।
वृषाङ्कमेनं किमु तज्जिगीषया, कलिन्दकन्याऽपि जटात्मनाऽभजत्

समाधिसारैः समताकरग्रहे, न देहगेहे धवलीकृते किमु ।
तदंसयोरुल्लसिता कचावलिः, परिस्फुरत्तोरणतामुपाययौ ॥ २८ ॥

व्रतोत्सवे कुन्तलसन्ततिर्विभोः, शिरःस्थिता कज्जलमञ्जुलप्रभा ।
स्वयं समुत्तीर्णनवोदधेः क्वचिद्विलग्नसेवाललता श्रियं दधौ ॥ २९ ॥

द्विषां दृशोरुग्रविषं शुभस्पृशां, शरीरिणामेणमदाञ्जनं घनम् ।
जटाऽस्य रेजे बहुधूमधोरणी, तपः कृशानोर्दुरितद्रुधूमरी ॥ ३० ॥

बभूव रत्नत्रययोगतो व्रते, प्रभुर्द्युरत्नाच्चतुरश्चतुर्गुणः ।
नृपः सहस्रैरिति युक्तमुत्तमैश्चतुर्गुणैरंशुभिरन्वगम्यत ॥ ३१ ॥

अमी हि कच्छप्रमुखाः सुखासिकामविस्मरन्तः प्रथमं प्रसादजाम् ।
अथापि नः स्तात् प्रभुतुल्यशीलतालताफलप्राप्तिरिति व्रतं ललुः॥३२॥

अमी चतुर्मुष्टिकलोचमीशितुः पितुः प्रजानामनुचक्रिरे सुखम् ।
परीषहाहेर्जठरैकजन्मनो, विनिग्रहे नो गरुडायितं पुनः ॥ ३३ ॥

रथाश्वकन्येभधनादिभिर्जनैर्न दीयमानैरुपयुक्तमीशितुः ।
सुरद्रुवद्दुर्लभदर्शनेऽत्र तैर्न च प्रतीता सुलभान्नपात्रता ॥ ३४ ॥

अनेन मे वार्षिकदानवर्षिणा, न वास्तु वस्तुं भुवि किञ्चिदर्पितम् ।
इतीव भिक्षोपननाम नाम न, प्रभुं श्रितं भिक्षुदृशां समत्सरा ॥ ३५ ॥

अहो परब्रह्मनिरुध्यमानसा, विनाशवृत्तिं स तदाऽन्वभूद् विभुः ।
इतीव कच्छप्रमुखास्ततः पृथग्, बभूवुरध्वैति सतीर्थ्यतां गताः॥ ३६॥

द्विधाऽप्यभक्तैः प्रभुसङ्गवञ्चितैर्बुभुक्षितैस्तैर्व्रतमेव भक्षितम् ।
जनावनं मुक्तिपथं विहाय ते, वनं भवाध्वानमिव प्रपेदिरे ॥ ३७॥

व्यचिन्तयंश्चेदमहो तनोर्घनोपवासवासीभिरजस्रतक्षणम् ।
यथा मुनीनां व्रतरक्षणं तथा, न दुष्करं चित्तनिरोधलक्षणम् ॥ ३८॥

विलीयते हन्त कदाचिदागता, परा विपत्तौष्टिक-शान्तिकादिभिः ।
सदापतत्क्षुद्विपदो निवारणं, न मूलमन्त्रादिकमस्ति किञ्चन ॥ ३९॥

गुणा विवेकप्रमुखाः कुकर्मणा, बलीयसौन्दर्यहुताशने हुताः ।
कुकीर्त्तिमूर्त्तीर्दधतेऽत्र भस्मसाद्धविष्णवः कस्य न सञ्चरिष्णवः ४०

सुवृत्तसङ्गीतमदान्धमानिनी, प्रणीतचेतोविकृतिक्षुदुद्भवाः ।
क्रमाद् बलाढ्यास्तदयं कलाभृतः, कलावृतौ दर्शयतीव दर्शताम् ४१

जगद्धितार्थं जलराशिसम्भवं, व्यधायि कण्ठे गरलं स्मरद्विषा ।
न कोऽपि देवः स कृपालुरस्ति यः, समुद्धरेत् क्षुद्विषमङ्गसङ्गतम् ४२

पुरं प्रविश्याक्षकपाटपाटनापुरस्सरं लुण्टितसारसम्पदः ।
करोति यः क्षुत्कटकस्य निग्रहं, तमन्नदेवं समुपास्महे वयम् ॥ ४३॥

ददाति यो नावसरेऽन्नमर्थिने, प्रदाह्य चिन्तासु परं प्ररोदयन् ।
स्वयं चितायां ज्वलतः स्वरोदकात्, स बद्धमुष्टिर्मृतकाद् विशिष्यते ४४

वनीपकानां भृतया यदाशया, यशः प्रसूते समयेऽन्नदायकः ।
समागतादेव गुणान्निदानतो भवेत्तदाशाभरणैकलोलुपम् ॥ ४५॥

भवेन्न तुङ्गानतमूर्धनामिनी, व्यथोदरव्यन्तरनिर्मिता यदि ।
किमर्थमर्थ्यन्त इमेऽतिभीषणाः, कृपाणतुल्याः कृपणास्तदा जनैः ४६

अपि प्रबुद्धैरुदरार्थमर्थिभिः, समं धनान्धैः क्रियते दुरोदरम् ।
न हार्यमाणं छलपाशपातनाद्, वृथा सुवर्णं निजवृत्तमीक्ष्यते ॥ ४७॥

कुठारिकामानकपाटपाटने, विलज्जता नाट्यनटीपटीयसी ।
विचित्रवंशस्थितिञ्चित्रलुम्पने, मषीसखीयं जठरोद्भवा व्यथा ॥ ४८ ॥

इमां जगद्भक्षणराक्षसीं क्षुधां, निरोद्धुमेको भगवान् प्रगल्भते ।
अलाभलाभार्जितदैन्यविस्मयव्यपेतचेताः स हि योगिपुङ्गवः ॥ ४९ ॥

यथा करिष्यत्ययमेष नःप्रभुस्तथा करिष्याम इति स्वनिश्चयम् ।
वयं तु हित्वा न परं जगद्गुरोः, स्वचेतसोऽपि प्रबलं त्रपामहे॥ ५० ॥

वसुव्ययाददतेऽप्यसुव्ययाद्, यदाश्रवस्थैर्ययशोमनीषिणः ।
तदेव चेदात्मकरागतं हृतं, तदा किमस्थाप्यत नो बुभुक्षया ॥ ५१ ॥

पुरा न पृष्टो नियमस्थितिं प्रभुर्व्रते तु पृष्टोऽपि स नाह किञ्चन ।
करोति किं लक्षणया न साम्प्रतं, गृहे गतानां भरतो व्रतोत्सवम्॥ ५२ ॥

ततो विनीतास्त्वटवीयमेव नः, कुटुम्बिनोऽमी तरवो नवोदयाः ।
मृगाश्च मित्राणि मृगारिदारितद्विपेन्द्रचर्माणि च वस्त्रसञ्चयाः॥ ५३ ॥

निकुञ्जगुञ्जन्मधुपालिलालितैर्द्विजस्वरैरस्त्विह तूरपूरणम् ।
प्रभातसम्पादितमङ्गलारवाः शृगाल-बालाश्च भवन्तु बन्दिनः॥ ५४ ॥

प्रदर्शयन्तामिह नृत्यपात्रतां, सुमोदिताः पल्लवसङ्गता लताः ।
कुतूहलाच्छैलतटीमुपेयुषां, मृधं च मत्तद्विरदा रदारदि ॥ ५५ ॥

सृजत्वसौ बालमरालकूजितैः, करक्वणत्कङ्कणनादसादरम् ।
स्ववीचिभिर्वीजितचारुचामरा, सुरापगा वारविलासिनीरसम् ॥ ५६ ॥

त्रिलोकभर्त्रापि हि या स्वयं धृता, जटैव निश्छत्रधिया धिनोतु सा ।
तदेकदा सत्त्वयशः शिरःस्थितं, कथं नु नैतां विशदीकरिष्यति॥ ५७ ॥

प्रयातु पाटीर[र]जोव्रजौचितीमिहाङ्गसंसर्गि सदैव भस्म नः ।
प्रदत्तसङ्कल्पसुखाय कल्पतां, निशीथतल्पाय शिला किलाश्मनः ॥५८॥

अमी इति स्वान्तसमीरचापलप्रयुक्तयोगप्रभुताहृतार्त्तयः ।
भवच्च कं योगमृतेऽपि योग्यतां, जिनावधानेन तपोभृतो दधुः॥ ५९ ॥

चिरान्निबद्धोरुजटैर्विनिर्मितप्रवालमूलाम्बुफलादिवृत्तिभिः ।
वियोगिभिस्तैरुपगङ्गमीदृशैः, स्थितं सरङ्गैरिव जङ्गमैर्द्रुमैः ॥ ६० ॥

विनाऽपि तैर्विश्वविभुस्तु केवलः, सुरद्रुमः शेषमहीरुहैरिव ।
विदिद्युते सौरभमुद्गिरन् यशस्त्रिलोककुक्षिम्भरिपुण्यपुष्पितः॥ ६१ ॥

ततान धूमायितमादिमस्तनौ, यदाकुलत्वात्त विभोः परीषहः ।
फलोदये ध्यापुरसालभूरुहस्तदा ययौ दोहदधूपधूमताम् ॥ ६२ ॥

तनुं कृशीकृत्य हृताणुसञ्चया, कया दिशा क्षुत्कृतमन्तुरीशितुः ।
यतस्तदा तैरणुभिः परिस्कृ(ष्कृ)तं, बभूव पुण्याङ्गममुष्य मेदुरम् ६३

शशाक नैव क्षुदमुष्य बाधितुं, दिगम्बराशासहकृत्वरी धियम् ।
इमां विबाधेत हि मोहवासना, प्रभोर्बबाधे प्रतिसङ्ख्ययैव सा ६४

छलादुरीर्थ(दीर्य)त्क्षुधमान्तरद्विषां, प्रति त्रिलोकीपतिमस्त्रमोचनम् ।
अधीरतापर्यवसायि नाभवन्, मनीषितंस्फूर्त्तिमदात्मकीर्त्तये ॥ ६५ ॥

प्रभोस्तितिक्षामुपवीक्ष्य तादृशीं, क्षुधाऽपि सम्यक्त्वमिवाध्यगम्यत ।
अरक्षि साक्षीकृतविश्वचक्षुषा क्षुधोऽनुबन्धः परतो न वत्सरात् ॥ ६६ ॥

अथ प्रभुः पारमहंस्यवासना-विशीर्णनिःशेषविकारसारधीः ।
भ्रमन्ननेकेषु कुलेष्वसम्भ्रमादनाप्तभैक्षप्रसरत्तपोबलः ॥ ६७ ॥

विशिष्टपात्रप्रतिलम्भतो नृणां, प्रमोदबाष्पैर्द्रुतलोचनं पुरा ।
गृहाद् विनिर्यन्नकृतप्रतिग्रहस्ततश्च शोकाश्रुभिरिष्टवञ्चनात् ॥ ६८ ॥

प्रतिग्रहेणानुगृहाण मेदिनीं, परोपकाराद् विमुखोऽत्र मा स्म भूः ।
जनस्य भक्त्या ललितालकच्छलादितीव कर्णान्तमुपेत्य शिक्षितः ॥६९॥

दिदृक्षुरीर्यासमितिच्छलाद् रसातले प्रविष्टानपि कर्मवैरिणः ।
तपोऽर्चिषा भानुरिवातिदुस्सहो, जगद् दृगासेचनः (तः) सुधांशुवत् ॥७०॥

दधत् परं सर्वसहिष्णुतागुणं, वसुन्धरातोऽपि वसुन्धरागुरुः ।
महानिलादप्रतिबन्धसन्धया, विशेषवान् नित्यवशीकृतानलः ॥ ७१ ॥

विशारदः शारदवारिदृसतानिवारिणीमाकलयन् प्रसन्नताम् ।
अनन्तपद्मः परिबिभ्रदुच्चकैरलेपतां पद्मदलातिशायिनीम् ॥ ७२ ॥

अभीष्टभूयः सुमनोरसो व्रजन्, पुरात् पुरं भृङ्ग इवाब्जमब्जतः ।
पुरन्दरद्रङ्गमदोग्रताहरं, पुरं गजैकोपपदं व्यभूषयन् ॥ ७३ ॥

स तत्र गत्वा रुचिरं गृहे, गृहे प्रदीयमानं द्रविणाद्यनाददत् ।
अकालकोलाहलसङ्कुलं नभो, न लाति ने[ते]ति जनैरकारयत् ७४

विभोः सः हेलोद्दलिताघपर्वतव्रजोच्छलत्पुण्यमहापयोनिधेः ।
प्रवृद्धवेलोर्जितगर्जितभ्रमं, ततान संक्षोभितपौरयादसः ॥ ७५ ॥

प्रवर्धमानं विनिरूद्धदिग्गणं, गुणं गुणित्वेन नभो बभार तम् ।
कथञ्चिदेवोपहितत्वमस्पृशन्, ममौ न स श्रोत्रशते तु देहिनाम्॥ ७६ ॥

यशोनिधिः सोमयशःसुतोऽथ तं, निशम्य कर्णेन स कर्णपुङ्गवः ।
किमेतदित्याहितसम्भ्रमो निजं, नभोलिहं सौधगवाक्षमागतः ॥ ७७ ॥

बुभुत्सुरेतस्य निदानमादितो, विनिक्षिपन्नक्षि विदिक्षु दिक्षु च ।
भ्रमन्तमन्तःकरणैः सहाङ्गिनां, सम्भाग्यवन्तं भगवन्तमैक्षत ॥ ७८ ॥

विना न हर्षाश्रुभिरक्षिवञ्चितं, मुखाम्बुजं नापि विकासमन्तरा ।
वपुर्विना नो पुलकावगुण्ठनं, कराद् ऋ(वृ)ते नाञ्जलिबन्धसन्धया ॥७९॥

पदोः प्रमादोऽभिगतौ न निर्ममे, न च त्वयि स्वादुगिरोऽपि निर्ममे ।
धृता स लक्ष्म्या न निजा न तत्यजे, न ते नमोऽकारि न दुष्कृतत्यजे ८०

अयं जनस्त्वां न च नोपतिष्ठते, स्वशक्तितो भानुमिवार्घपूजया ।
कथं तुदेन्नानुचितं च कण्टकैस्तथाप्ययं ते भृतकाननुग्रहः ॥ ८१ ॥

गृहाङ्गणं नो निजपादपङ्कजैस्त्वयाऽर्चयित्वा यदि नीतमर्च्यताम् ।
अशौचसम्भावनया प्रतिग्रहात्, तदा पुनस्तर्कमलम्भि चर्च्यताम् ८२

अथापि पश्याभिमुखं मुखेन्दुना, दिवापि विश्राणित-कौमुदीमहः ।
अनाद्यप्रज्ञेषु निवेदिताशयो, भृशं भवास्मासु कृपापयोनिधिः ॥ ८३ ॥

मनस्विनाऽज्ञो यदि बोध्यते जनो, निजाशयं न क्षतिमेति तावता ।
कृपालता प्रत्युत तस्य पीनता, फलद्वयेनैकपदेऽधिगच्छति ॥ ८४ ॥

गृहेषु सर्वोत्तममस्तु वस्तु नः, कृतार्थमंह्रिद्वयसेवनात् तव ।
गिरोत्तमर्णेन सुधां प्रदाय नस्त्वयाधमर्णत्वमपि व्युदस्यताम् ॥ ८५ ॥

इति ब्रुवाणैर्मनुजैरितस्ततो, वृतं विनीतैरभिनीतिभक्तिभिः ।
मतङ्गजां मत्तमिवाभिसान्त्वने, सगर्वगन्धर्वकलाविलासिभिः॥ ८६ ॥

निरीक्ष्य तं चेतसि स व्यचिन्तयत्, किमेष भास्वान् न स यत्प्रतप्तभाः।
निशाकरः किं न स यत्कलङ्कवान्, सुरप्रभुः किं न स भूरिरन्ध्रदृग्॥८७

स्मरः किमङ्गी न स भस्मयद्भवक्रुधग्निजं तत्किमयं सुरद्रुमः ।
न सोऽपि यस्माद् मितकामितप्रदः, प्रदत्तविश्वामितमुद्गरस्त्वयम् ॥८८॥

किमेष विष्णुर्न स यज्जनार्दनाभिधो हरः किं न स यन्महानटः ।
किमेष वेधा न हि सोऽपि यज्जगद्विनिर्मितौ व्याकुलधीः कुलालवत्

किमेष मेरुर्न यतोऽतिकोमलो, महाद्विपः किं न यतो मदोज्झितः ।
तदेष चिन्तामणिरस्तु वस्तु सन्न चिन्तया यद्रहितो ह्ययं मणिः॥ ९० ॥

बहिर्मह[:]किञ्चिदगोचरो गिरां, पटावृतस्येव महामणेरहो ।
अमुद्रितं स्फूर्जति मुद्रमास्य यत्, तदंशतः स्युः शतमंह्रि मालिनः ॥९१॥

विचार्यते स्वोपमिति स्थलं यथा, कथा समाये(ने)षु विशीर्यते तथा।
व्रजन्ति बन्धं विशरारुधर्मकाः, करे गृहीताः सिकताः कियच्चिरम् ॥९२॥

अमुष्य संशुद्धगुणाब्धिमक्षमो, विगाहितुं चित्तविचारणोडुपः ।
कलङ्कमुक्तं यदुशन्ति निष्कलं, तदेव धामेदमुदीतमादिमम् ॥ ९३ ॥

बहिः प्लवन्तामिह भूरिकल्पनाः, स्पृशन्ति ता नास्य गुणं मनागपि।
अनेकमायाजलचक्रचुम्बनाद्, रसो न गृह्येत हि तात्त्विकाम्बुनः॥ ९४ ॥

अलक्षिताभ्यन्तरलक्षणः प्रभुर्बहिर्गुणैरेष तु तैर्न नूयते ।
पुरप्रतोलिपरिखादिवर्णने, न वर्णितः स्यात् खलु तत्त्वतो नृपः॥ ९५ ॥

अदस्तुलाभृत्परदेवगर्हणाप्यनर्हणामञ्चति काव्यशिल्पिना ।
विचारकृद् व्याहतिमीक्षतेऽत्र किं, न सिद्ध्यसिद्ध्योः स्फुटनिग्रहस्थलाम्

तपोनिधिः सत्यविधिश्चिदर्यमा, चरित्रचूडामणिरेष शाश्वतः ।
इति प्रतीतिर्यदि योग्यतां व्रजेदमुत्र वित्रासितभावशात्रवे ॥ ९७ ॥

अमूदृशं रूपमनुत्तरं पुरा, मया दृगातिथ्यमनायि तायिनः ।
अमू समूढामृतपानलालसे, कुतोऽन्यथादृष्ट इवात्र धावतः ॥ ९८ ॥

अचिन्त्यशक्तिः कुरुते क्षणान्नवं, पुरातनं प्रेम दृगेव देवता ।
विनैव गोचक्रकृतां व्यवस्थितं[तिं] मनोरथं वाहयति स्वसम्मुखम् ॥९९॥

विलोकनादेव गरीयसां गुरोर्बभूव मे क्षीरसमुद्रमज्जनम् ।
अमुद्रमुद्व्यञ्जितसंस्तवस्मृतेरथास्तु पीयूषपयोधिमग्नता ॥ १०० ॥

अपोहमूहं च किलास्य तन्वतो, गतस्य सम्मोहमिति क्षणं हृदा ।
स्ववासनानुद्भवयामिनीव्यये, बभूव जातिस्मरणारुणोदयः ॥ १०१ ॥

स तेन पूर्वं जगदीशसंस्तवं, मुमुक्षुमार्गं च यथास्थितं विदन् ।
इदं हृदन्तर्निदधे नृपात्मभूर्विचित्रतत्कार्यचरित्रविस्मितः ॥ १०२ ॥

अवर्षि वर्षं विषमैः परीषहैरमोघधाराधरतुल्यकर्मणा ।
न बिन्दुरेकोऽप्यलगच्चयैरलं, समाधिसच्छत्रमिदं विभो ! स्तुमः १०३

न संविदानोऽपि परीषहद्विषां, चमूं जिगीषुर्विधिमाह भैक्षगम् ।
उदात्तशान्तत्वमिदं जगत्पतेः, समाधिहारेऽञ्चति नायकश्रियम् १०४

स्वयं तपोभिः प्रबलैः प्रतप्यते, तनोति तापापहृतिं च मादृशाम् ।
अयं गुणः किं जगृहे भवच्छिदा, सविद्युतः शान्तदवात् पयोमुचः ॥१०५॥

मदर्थसंरक्षितदानकौशलप्रजापरं कौशलमध्यजीगपत् ।
न संनिधौ वा व्यवधौ निजं जनं, विभुर्विभक्तव्यमपेक्ष्य वञ्चयेत् ॥१०६॥

अलक्षितस्वार्थगतिः प्रयत्नवानिहागतोऽसौ मम बोधिसिद्धये ।
रवीन्दुमेघोपमया महात्मनां, परोपकाराय विनिर्मितं जनुः ॥ १०७ ॥

अमी जनाः स्वामिसुखाय नेशते, यदन्नकाले द्रविणादिदायिनः ।
विवेकनेत्रावरणत्वमीयुषी, ततः क्वचिद्भद्रकलाऽपि दोषभाग् १०८

गुणान्वये भद्रकतातिशोभना, तमन्तरेणानुकरोत्यशोभना ।
सुधांशुयोगे रजनीं स्फुटेदयां, समुद्धतध्वान्तमयीं तदत्यये ॥ १०९ ॥

फलं विना यामधिकार्पणादपि, स्थले जलं स्वादु यथा न लेभिरे।
अमी समीहाविषयां सृजन्तु तां, सुपात्रदानैकविधेरभिज्ञताम्॥ ११० ॥

अलं परासङ्गतिचुम्बिचेतसा, कथं मयीदं घटतामिहागते ।
अभूयत स्वप्नमहीरुहैस्त्रिभिर्यदुद्गतां स्वप्नमहीरुहाङ्कुरैः ॥ १११ ॥

ध्रुवोपकार्येऽप्युपकारिता विभोः, प्रदर्शिता स्वप्नगणेन या मयि।
क्व भेददृष्टौ घटतां विपर्ययादभेदसृष्टावपि सा द्वयागतेः ॥ ११२ ॥

प्रभुप्रभावादथवा न दुर्घटं, किमप्यदो भक्त्युचितप्रदो हि सः ।
न नाम तद्दानकलास्वधीतिनो, मरुद्गवीकामघटामरद्रुमाः ॥ ११३ ॥

कपालनाशात्कलशक्षये यथा, पुरातनन्यायमताभिमानिनाम् ।
विभोरथ स्वाङ्गणभूषणे तथा, क्षणं विलम्बोऽपि न मे प्ररोचते ११४

असाविदं ध्यायति यावदात्मना, जगद्विभुस्तावदभूषयद् गृहम् ।
विनीतभृत्या नवमागतं घटैस्तदैव तत्रेक्षुरसं डुढौकिरे ॥ ११५ ॥

प्रदेयचित्तस्वमनोविशुद्धतां, तदा त्रिवेणीमिलनोपमां विदन् ।
प्रकर्षिहर्षाश्रुभरप्लुतेक्षणो, जगत्प्रभुं भूपतिसूनुरूचिवान् ॥ ११६ ॥

गृहाण भिक्षां गतदूषणामिमां, विमानवासिप्रणतांह्रिपङ्कजः ।
तवास्त्विदानीं प्रसरत्करप्रभाभरैरिदं कुङ्कुमपङ्किलं नभः ॥ ११७ ॥

इतीरिते भूमिभुजस्तनूभुवा, जगद्विभुर्दक्षिणहस्तमूचिवान् ।
त्वया यथा दानकलोपदर्शिता, प्रदर्शनीया ग्रहणेऽपि सा तथा॥ ११८

परोपकारार्थमधःस्थितिःकरान्न दातुरेतर्हि मनस्विगर्हिता ।
अधःस्थितैरेव फणाभृतां फणैर्वसुन्धरा भूरिधराधरा धृता ॥ ११९ ॥

विधाय वामं प्रति वाम्यवासनां, त्वया न हेयावसरौचिती निजा ।
रणे जयं ह्येष ददौ भवान् मुखं, चकार दानादुपशान्तनिःस्वताम् १२०

गुणग्रहात् प्रेम मिथः समुल्लसेन्न दोषदृष्टिस्तु सुखाय कस्यचित् ।
विवादभाजोः करभामृताशिनोर्न क्लृप्तयुक्तिः कलहं व्यपोहति ॥१२१॥

इमां स शिक्षामुपलब्धवान् गुरोः, करोऽथ सद्यः प्रससार दक्षिणः ।
पयः पयोदः सरसीव धारया, ववर्ष तत्रेक्षुरसं नृपात्मभूः ॥ १२२ ॥

क्रमोच्चभूर्दातृमनो गिरेरिव, स्फुटेव तत्पुण्यपटी गृहच्छ्या ।
शिखेव तत्कौशलवारिधेः पृथू, रराज धारैक्षुरसी विभोः करे॥ १२३ ॥

समुत्थितांह्रेः पुरुषोत्तमस्य खात्, सरित् पपातेत्युचितार्थवित्तदा ।
विभोः करोत्थेक्षुरसापगा ययौ, प्रवृद्धपूरेण किमूर्ध्वमम्बरम्॥ १२४ ॥

विभोः करस्थेक्षुरसं नभोलिहं, प्रवृद्धवेलोदधिशङ्कया विधुः ।
स्वतातबुद्धेरमिलिष्यदञ्जसा, तदैव नामंस्यत चेद् घटोद्भवम्॥ १२५ ॥

विधोः सुधायां मधुरो रसः कियानिति स्वमाधुर्यगुणेन गर्वितः ।
विभोः करस्थेक्षुरसः शिखामिषात्, कुतूहली किं गगनं स्म गाहते ॥१२६॥

मुदोचितं दास्यति यस्तपस्विने, क्रमप्रवर्धिष्णुफलं स लप्स्यते ।
इतीव तादृक् शिखया समन्वितः, प्रभोः करस्थेक्षुरसः स्म भाषते ॥१२७॥

जिनेश्वरस्तेन रसेन पारणं, जगद्विपद्वारणमाद्यमातनोत् ।
समुल्ललासास्य तनुस्ततः प्लुताः, पयोधरेणाभिनवेन भूरिव॥ १२८ ॥

अभूद् विभोः शान्तरसः प्रसृत्वरस्ततो रसाद्भक्तिरसस्तु दायिनः ।
तथा परेषां हृदि विस्मयाभिधो, रसो रसेनेति मृषा न लोकगीः॥ १२९ ॥

आघ्नन्तो द्राग् दुन्दुभीन् देवसङ्घाश्चेलोत्क्षेपं चापि गन्धाम्बुवर्षम् ।
श्रेयांसस्य व्यञ्जयामासुरुच्चैरातन्वाना वेश्मनि स्वीयहर्षम्॥ १३० ॥

उज्जागरप्रशमसागरनाथदत्त सम्यक् कचं द्रवति किं शुचिधिष्ण्यसृष्टिः ।
आनन्दमेदुरसुरैर्विहिता तदानीं, श्रेयांसमूर्ध्नि निपपात च पुष्पवृष्टिः ॥१३१॥

सार्धत्रयोदश-सुवर्ण-सुवर्णकोटी:, कोटीरहीररुचिरं जितदिग्गणास्ते।
श्रेयांसधाम्नि ववृषुः प्रभुभक्तिशैलक्रीडातटीप्रतिभटीकृतसन्निवेशाः

ऐक्षवं रसमिनाय ददानो, लब्धवान् यदसि काञ्चनसिद्धिम्।
तत्त्वमेष विबुधो विबुधत्वं, नाम कोशनिहितार्थकथं नः ॥ १३३ ॥

साधुदानविधिवेधसि जातैर्येन भूरियमशोभि यशोभिः।
तोषितेन विभुना परितुष्यैस्तुष्टुवुस्तमिति देवनिकायाः ॥ १३४ ॥

विश्वेश्वरोऽपि विहरंस्तदुपज्ञज्ञानधर्मज्ञलोककृतसंयमगात्रयात्रः।
दीक्षादिनाद्विगलिते शरदां सहस्रो, घातिक्षयाद् विमलकेवलमाससाद

भविककमलोल्लासं कुर्वन्निरस्ततमोभरः,
प्रसृमरदृशां मार्गामार्गप्रदर्शनतत्परः।
अकलिततपस्तेजोराशिर्दिनेश इवोदितो,
भुवनविजयस्फीतां भेजे ततः स यशःश्रियम् ॥ १३६ ॥

## द्वितीयः सर्गः

अथ साधुरिव स्वमानसं, भरतो भारतवर्षमन्वशात्।
विभुकेवलसम्भवक्षणोऽवनमच्चक्रबलाज्जितक्षितिः ॥ १ ॥

युधि योधयशःपयोव्रतोविलसत्कोशगृहाद् विनिर्गतः।
प्रविशँश्च पुरं परस्य यत्करवालोऽजनि योगसिद्धिमान् ॥ २ ॥

गजकुम्भभवास्रपायिनः परतेजोवडवाग्निशोषिणः।
अगमन् यदसेर्यथा भयं, जलराशेर्न तथारिभूभुजः ॥ ३ ॥

यदसिभ्रमतोऽतिमूर्च्छिताः, पवनोद्भ्रान्तलता[तां]वने द्विषाम्।
उपवीक्ष्य तरङ्गमङ्गना, जलधौ खड्गिविषाणमद्रिषु ॥ ४ ॥

भुवि जाग्रति चिन्तितार्पणाचतुरे यस्य करे ग्रहोदरे।
सुरभूमिरुहाः स्म शेरते, गतचिन्ताः सुरशैलकन्दरे ॥ ५ ॥

तरलान् युधि वारियाचकानपि कुर्वन्नहितान् सुधापिबान् ।
मनुजाधिपतिर्न चिन्तिताधिकदः कैर्मनुजैरचिन्ति यः ॥ ६ ॥

अभिधावति यस्य चातुरी, विनतायास्तनये महानये ।
अलभन्त न पन्नगाः पदं, भुवि पाटच्चरपारदारिकाः ॥ ७ ॥

करवालकरालताधरो, मुखमाधुर्यवशीकृतावनिः ।
द्विषतां सुहृदां च योऽभवद्, विषपीयूषपयोमहोदधिः ॥ ८ ॥

अभवत् तपनाशुसंज्वरक्षुच्च भयशोकविह्वला ।
यदरिप्रमदावियोगिनी, धृतपञ्चाग्नितपोव्रता वने ॥ ९ ॥

अहरन् रजतादि यद्द्विषां सदनेषु प्रकटं वनेचराः ।
न तु गौञ्जगणभ्रमान्महामणिवातायनमौक्तिकस्त्रजः ॥ १० ॥

असुहृत्प्रमदाश्रुवारिभिर्ववृधे यस्य यशोलतोचितम् ।
यददीप्यत तैर्महोऽनलः, प्रबलस्तत्तु चमत्क्रियास्पदम् ॥ ११ ॥

अधिकं स्म विदन्ति नारयो, ज्वलनं यत्प्रबलप्रतापतः ।
दववह्निघने ततो भिया, प्रविशेयुः कथमन्यथा वने ॥ १२ ॥

लघुतूलवदिन्दुमण्डलं, यशसो यस्य पुरः प्रतीयते ।
इति युक्तिमदम्बराङ्गणभ्रमणं तस्य मरुत्प्रचारतः ॥ १३ ॥

विधुरङ्गति पीनफेनतां, प्रचलद्वारिकणन्ति तारकाः ।
तरणिस्तरुणोऽपि यद्यशोजलधौ विद्रुमकन्दवृन्दति ॥ १४ ॥

गलितैर्निजदृग्गलन्तिकासलिलैस्तापवतो वियोगतः ।
यदरिव्रजसुभ्रुवामभूत्, कुचशम्भोः स्नपनं निरन्तरम् ॥ १५ ॥

यदिभैर्निजदानवारिणा, सतता सिक्तकरैः सुलक्षणैः ।
क्षितिभृन्महिमासहिष्णुभिर्विधृता किं न निजानुकारिता ॥ १६ ॥

अमिता वयमत्र सप्त ते, गगनार्द्धादिति संहृतक्रमैः ।
रविसप्तिजयादुदासितैस्तुरगैर्यस्य दिशो ललङ्घिरे ॥ १७ ॥

तरसा न महारथस्य किं, विजयन्ते स्म मनोरथान् रथाः ।
सुकृतैकमुखेक्षिणः फले, सुकृतेनैव पुरस्कृताः स्वयम् ॥ १८ ॥

युधि यस्य पदातयो भटा, व्यलसन् वर्मपयोदवेष्टिताः ।
कुलिशाक्षतशौर्यनिर्जरक्षितिभृज्जङ्गमशृङ्गसन्निभाः ॥ १९ ॥

मदनो निजरूपसम्पदा, विजितो येन यथावपत्रपाम् ।
भजते स्म स इत्यदृश्यतां, त्रपमानो[णो]ऽपि निजेन चेतसा ॥ २० ॥

अजनिष्ट महान् पराभवो, हठतश्छत्रममुञ्चतोऽप्यहो ।
युधि यद्घनबाणवर्षणे, नृपतेश्छत्रमुचस्तु नो भयम् ॥ २१ ॥

अयमुद्धतसेनया रयाज्जितषट्खण्डसमग्रमण्डलः ।
निजभाल-ललामरत्नतामनयच्चक्रिपदं महोर्जितम् ॥ २२ ॥

अथ तस्य रुचाभिमन्त्रितैर्बहुसिद्धौषधिमूलमिश्रितैः ।
कलसैर्जलसम्भृतैर्मृदा, सविकासैरिव मङ्गलाननैः ॥ २३ ॥

मुकुटांशुभिरूद्ध्वमुच्छ्रितैर्दिवमुत्कण्ठयितुं समुद्यतैः ।
बलकम्पितभूतलच्छलादपि संज्ञापितनागनागरैः ॥ २४ ॥

कनकाभरणप्रभाभरैर्विदधानैर्भुवमीक्षणोन्मुखीम् ।
अभिषेकविधिः प्रचक्रमे, निखिलैर्द्वादशवार्षिको नृपैः ॥ २५ ॥

गजवाजिरथैः पदातिभिः, समभूत् तन्नगरं तदाकुलम् ।
जगदादिमसर्गसम्मुखं, दरविस्तारिविधेरिवोदरम् ॥ २६ ॥

शयितं किमु शेषदिक्पुरैः, कृतकोलाहलशान्तिसर्वतः ।
लघु तत्र समागतैर्जनैर्जनसम्मर्दपरिश्रमोज्झितैः ॥ २७ ॥

ध्वजिनी बहुभूभृतां ध्वजैर्ननु मायेव गुणैरभिद्यत ।
न तु तेष्वविशेषमान्तरं, किमपि ज्योतिरगाद्विभिन्नताम् ॥ २८ ॥

अतिघट्टनतो महीभृतां बहुकोलाहलगर्जितोर्जितः ।
च्युतहारमणिव्रजैरभून्ननु रत्नाकर एव तत्पथः ॥ २९ ॥

तिलमात्रमपि स्थिता न भूः पृथिवीशेष्वभियत्सु सर्वतः ।
प्रभुतासिसुखानि सोऽन्वभूत्, प्रथमं यः प्रभुवीक्षणं व्यधात् ॥ ३० ॥

रतिहासविलासशालिभिर्बहुशो भूमिभुजां गतागतैः ।
अभवत् प्रतिनायकं भुवः कुलवध्वा न कटाक्षलक्षणा ॥ ३१ ॥

किमपश्यदमुद्रितेक्षणा, न तमिस्रापि विसंयुतार (?) रिः ।
निजमध्यदिशा गतागतैस्त्वरमाणोत्तरखण्डराजकम् ॥ ३२ ॥

निजवेश्मनि कोऽप्यवस्थितो, न च वृद्धो न शिशुर्युवाऽपि न ।
नृपवंशभवस्तदा मदालससम्राट् दृगुपासनोत्सुकः ॥ ३३ ॥

अधिगत्य तदाऽप्यनागतान्, प्रभुरष्टानवतिं सहोदरान् ।
प्रजिघाय स दूतमन्वमून्, पृथगेकैकममर्षणः क्षणात् ॥ ३४ ॥

अथ तान् प्रतिधूमधोरणीरकिरन्नाकुलताकरीर्गिरः ।
स्वमुखादिति दूतमन्त्रिणो, भरताकूतकृशानुकुण्डतः ॥ ३५ ॥

अभिषेकमहे महीश्वरा, भरतेशं कति नोपतस्थिरे ।
भवदुर्गविलङ्घनक्षणे, चरणं चारुतरा गुणा इव ॥ ३६ ॥

अनुपस्थितिरत्र वःपुनर्न हिमानीमहिमाम्बुजस्य किम् ।
फलशालिरसाललालिते, मधुराज्ये पिकपक्षिणामिव ॥ ३७ ॥

इयतैव निजावनिस्थितिः, सदसत्संशयगोचरीकृता ।
अधुनाऽपि भजध्वमाशु तं जनिमाजीवितसंस्थितिस्तथा ॥ ३८ ॥

अधिकेऽत्र न तेजसा बलं, किमपि स्फोरयितुं च युज्यते ।
शलभो लभते कियद्यशस्तरणौ क्लृप्तरणः क्रुधारुणः ॥ ३९ ॥

अनुजादनुजारितेजसो, यदि तस्याश्रयणाद् बहिर्मुखाः ।
परदुर्ग्रहदुर्गसंनिभं, व्रतमादत्त तदा मदापहम् ॥ ४० ॥

अथ पक्षयुगेऽपि वो रुचिर्न नयार्थद्वितये मुनेरिव ।
निजखड्गलतोपलाल्यतां, तदनेकान्तकथेव सङ्गरे ॥ ४१ ॥

यदि नर्तयितुं समुत्सुका, रणरङ्गेऽसिनटीं पटीयसीम्।
यदुपज्ञमदः कलाऽखिला, भरतस्तत्र स किं स्खलिष्यति ? ॥ ४२ ॥

अमुनाऽपि जयोद्भवं भवाध्यवसायेन यशस्तमेष्यति।
जलदाम्बुपयोनिधाविव, प्रपतत्तत्खलु पूर्णपूरकम् ॥ ४३ ॥

इदमस्त्वथ पक्षमेककं, त्रिषु सम्यग् विनिगन्तुमर्हथ।
प्रभवे खलु विज्ञपय्य यं, विमलं दौत्यफलं लभामहे ॥ ४४ ॥

इति तेषु वितीर्य वाचिकं, स्वविभोरुत्तरलाभकामिषु।
व्यसृजन् भरतानुजा गिरं, मुखपद्मान्मकरन्दसन्निभान् ॥ ४५ ॥

उचितं भरतेश्वरो नृपैर्भृतिपात्रैरभिषिच्यतेऽखिलैः
न तु भागभुजः स्वबन्धवः, क्षतिमेष्यन्त्यनुपस्थिता अपि ॥ ४६ ॥

निजबन्धुषु बन्धुसम्पदा, प्रमदो यस्तमुदन्तमन्ततः।
उदये हृदयेन विस्फुरत्कुमुदं वक्ष्यति कौमुदीपतेः ॥ ४७ ॥

उदरम्भरिरेव केवलं, परिभुङ्क्ते स्वयमर्जितां श्रियम्।
न कदाचन तां स्वबन्धुषु प्रियबन्धुस्त्वविभज्य रज्यति ॥ ४८ ॥

कृतमस्य निजार्जितश्रियः, प्रविभागैर्निजबन्धुसम्पदः।
वडवाग्निरिवाम्बुधेरपः पितृदत्ता अपि यो जिघत्सति ॥ ४९ ॥

स्वपरैकमतिर्विभर्त्ति चेद्, गुरुतृष्णागरलं निजे गले।
पितृवेश्मगतो महेश्वरः, कनकेनैव तदैष माद्यतु ॥ ५० ॥

न वयं तु भजामहे ह्यमुं, धृतिभाजः पितृदत्तसम्पदा।
नियतत्वविशेषदर्शिनो, न पतामः क्वचनापि संशये ॥ ५१ ॥

धृतिरेव हि नः परं प्रति, प्रतिबध्नाति बलप्रवर्त्तनम्।
बिभृयात्कतमस्तु तेजसा, ननु पञ्चाननसूनुरूनताम् ॥ ५२ ॥

अधिकं समुपासितश्च किं, भरतो ब्रूत फलं ददाति [नः]।
किमु रक्षति यातुधानतो, मरणान्निःशरणान् भयातुरान् ॥ ५३ ॥

स्वमतान् मनुजान् वितन्वतीं, पलितालीखटिकाक्षराङ्किताम् ।
किमु वा परिपातिनीं जरां, यमदूतीं स निवारयिष्यति ॥ ५४ ॥

यदि वा तरसा रसायनं, सकलातङ्कविनाशि दास्यति ।
रविधाम निशीव यद्बलाद्, गलितं यौवनमेति वार्धके ॥ ५५ ॥

अथवाऽश्लथवासनाशतप्रबलद्वन्द्वमपाकरिष्यति ।
वपुषि प्रसरेत् प्रियाप्रियप्रभवा विह्वलता न यद्वशात् ॥ ५६ ॥

यदि वा न दिवा न वा निशि, स्थिरतामेति यदन्तरिन्द्रियम् ।
प्रविधाप्य वशं तदेव नः, परमब्रह्मणि मज्जयिष्यति ॥ ५७ ॥

विदधाति खमेव पुष्पितं, यदि युष्मत्प्रभुरेभिरङ्कुरैः ।
कुरुतां क इवास्य सेवनां, तदही तुल्यनृभावभावितः ॥ ५८ ॥

चरणाश्रयणं तु तेन नश्चरणोच्चारकृतोपदिश्यताम् ।
अननुष्ठितधर्मदेशके, गुरुता गच्छति नामशेषताम् ॥ ५९ ॥

शयिताः स्वसुखे वयं मदादभिभूता भरतेन भोगिनः ।
अधुना तदतीव भीषणामसिदंष्ट्रामुपदर्शयामहे ॥ ६० ॥

अनुजा यदि याचिता रणं, भरतेन स्फुटमग्रजन्मना ।
तदमी वितरीतुमुत्सुका, न कृपाणः कृपणोऽत्र कोशभृत् ॥ ६१ ॥

विलसेद् बलवत्युपस्थिते, न कला हन्त कलागुरोरपि ।
द्विजनायकदर्शनं हरन्निह सिंहीतनयो निदर्शनम् ॥ ६२ ॥

उदितास्मदुपक्रमादितो, विमला पङ्ककलङ्कशङ्कया ।
समराम्बुनिधेर्जयेन्दिरा, न च बन्धुद्रुहमेनमेष्यति ॥ ६३ ॥

यशसा भरणं भृतस्य च, प्रथमेन व्यभिचारमञ्चति ।
असिसौष्ठवपक्षपाति तन्न तु कस्यापि गृहे नियन्त्रितम् ॥ ६४ ॥

अयमेतु वयं समुद्यताः, क्षुभिताम्भोधितरङ्गसन्निभाः ।
जनकानुमतिं विना परं, प्रणयामो न सगोत्रसङ्गरम् ॥ ६५ ॥

इति तानभिधाय सत्वरं, ययुरष्टापदमद्रिशेखरम्।
प्रभुपादरजोविभूषितं, मदभाजो नृपगन्धसिन्धुराः ॥ ६६ ॥

जलदैरपि यो गुरूकृतो, विपुलं शिक्षितुमुन्नतिक्रमम्।
समुपास्तिपरैः प्रकल्पितप्रसरन्निर्झरहारदक्षिणैः ॥ ६७ ॥

दधदातपवारणं घनं, विपुलं योऽजनि मध्यभागतः।
शिखरेषु च तीव्रमातपं, विधुरिच्छामतिवृत्य वृद्धिमान् ॥ ६८ ॥

कुसुमस्मितयालसद्द्वयस्तरुणालिङ्गितया कया स्फुटम्।
भ्रमरोचितशोभया न यद्वनराज्यानुकृतां पणाङ्गना ॥ ६९ ॥

स्फटिकोरुशिलानुबिम्बितं, स्वमवेक्ष्य प्रतिपन्थिशङ्कया।
रदघातपरिश्रमं मदात्, कुरुते यत्र सुरेन्द्रकुञ्जरः ॥ ७० ॥

रतिकेलिरहस्यसाक्षिणी, हृदयग्राहिणि किन्नरीगणैः।
स्फटिकाश्मदरीपरीक्षिता, बुबुधे यत्र सखीव निर्मला ॥ ७१ ॥

(क ?)शबरीधृतसारसौरभं, सरसि स्नातमतिस्खलद्गतिम्।
पवमानमुपेत्य यत्र का, धृतमत्तप्रियधीर्न पिप्रिये ॥ ७२ ॥

स्वरपूरणया प्रतिध्वनैः, स्फुरितैर्यत्र शिखण्डिताण्डवैः।
मुदितः कृतकण्डघोलनं, मधुरं गायति किन्नरीगणः ॥ ७३ ॥

घनगर्जितजप्रतिध्वनेर्विबुधा यं घनमेव जानते।
सुकृतात् क्षितितर्पणोद्भवादवदातस्थिरतामुपागतम् ॥ ७४ ॥

उपनीय विकल्प्यदृश्ययोर्नियतारोपवशादभिन्नताम्।
व्यवहारकरः स्वलक्षणे, भजते यः सुगतप्रमाणताम् ॥ ७५ ॥

खचरीषु समागतास्वहो, कुरुते किं यदधित्यकाऽपि न।
उपगृह्य हृदा सखीविधिं, स्ववनीपुष्पफलोपचारतः ॥ ७६ ॥

स्वकुलोपकृताधमर्णतां, नियतं योऽपनिनीषुरुन्नतः।
वनगुच्छजलाशयच्छलाज्जलधिं कुम्भभुवो विनिह्नुते ॥ ७७ ॥

सकला स्वजलाशयोदकच्छलतो येन हृता दिवः सुधा ।
तदघक्षतये मरुत्पथेऽनुशयानेन कृता विधुप्रपा ॥ ७८ ॥

प्रथमानरसप्रवाहिनी, कठिनानामपि हृद्विभेदिनी ।
समतामयते विनिर्गता, कविवक्त्राच्च यतः सरस्वती ॥ ७९ ॥

विवदन्त इवान्तराकृतद्विजराजोत्तमस(ख्य)भ्यशोभिताः ।
शिखरेषु समच्छविच्छ्या, निशि यत्रौषधयश्च तारकाः ॥ ८० ॥

गुणवान् रहसि प्रकाशयेत् स्वगुणं न ध्वनयेत्तु डिण्डिमम् ।
इति यत्र रहस्यवेदिभिर्निशि दीपायितमौषधिव्रजैः ॥ ८१ ॥

दमनादमनागनाहतध्वनिपूर्णामृतपायिनो हृदः ।
शिखराणि तपोगिरेर्लयं मुनयो यच्छिखरेषु तन्वते ॥ ८२ ॥

अमलायतदृष्ट्यशच्युतैः फलमूलैर्विहितस्ववृत्तयः ।
दधते चकिता यदाश्रिता मुनयः केऽपि मृगाश्च तुल्यताम् ॥ ८३ ॥

स्मरति स्वतनुच्छविं न यच्छिरसीन्दुर्मणिचक्रचुम्बितः ।
कुपिताद्रिसुतांह्रिताडनप्रसृतालक्तकशम्भुभालजाम् ॥ ८४ ॥

सकलौषधिसारसम्भृतं नगराजत्वधिया वृषध्वजः ।
यमपावयदादिमः प्रभुः स्वयमङ्गीकृतसर्वमङ्गलः ॥ ८५ ॥

वहति क्षितिभृत्सु राजतां विहितस्वर्णकिरीटविभ्रमम् ।
भरताभिभवं व्यजिज्ञपम् भगवन्तं प्रणिपत्य तत्र ते ॥ ८६ ॥

भगवानपि तन्मनोगिरिं ज्वलितं प्रेक्ष्य कषायवह्निना ।
नवमेघ इव प्रचक्रमे परिनिर्वापयितुं वचोऽमृतैः ॥ ८७ ॥

किमियं विमनस्कतोदिता बलवत् सा भवतां श्रियः कृते ।
न कृतेऽपि नियन्त्रणाशते कुटिलेयं स्ववशाऽवतिष्ठते ॥ ८८ ॥

चलतां लहरीभ्य एव या वडवाग्नेः परितापकारिताम् ।
अधिसागरमध्यगीष्ट तां श्रियमिष्टां गणयेत् कथं बुधः ॥ ८९ ॥

विषवत् कमला विषस्वसा परितापाय भवेन्न संशयः ।
शिरसा द्युनदीमुवाह यद् गिरिशोऽशेत हरिश्च वारिधौ ॥ ९० ॥

सुकृतं स्वपतेश्छिनत्त्यहो कमला स्वाश्रितवृक्षमूलवत् ।
भवितास्मि कथं निराश्रयेत्यपि नो वेद जडाशयोद्भवा ॥ ९१ ॥

भवतीह सगोत्रजो यतः कलहः क्षोणिभुजां शुनामिव ।
प्रतिवान्तमिव प्रशान्तहृद् विरसं राज्यमदः क ईहते ॥ ९२ ॥

हृदये मलिनेक्ष्यते कला ननु राज्ञोऽकरुणाकलङ्किता ।
बहिरेव तु सा प्रगल्भते हरहारस्मितकुन्दहारिणी ॥ ९३ ॥

गुरुवारिदवाक्यबिन्दवो नृपतेश्छत्रभृतो जगन्ति न ।
चलितेव हि चामरानिलात् सुमतिस्तिष्ठति नान्तिके क्षणम् ॥ ९४ ॥

करवाल इव स्थितिः कृता हृदि निस्त्रिंशतयाऽवनीपतेः ।
द्वयमेकगुणं न तत्कृपाङ्कुरमुद्यन्तमपि च्छिनत्ति किम् ॥ ९५ ॥

अतितुच्छनृपत्वशर्मणे कुलवैरादिह यो यशःक्षयः ।
भवतां बत भस्मनः कृते तदिदं चन्दनदाहसाहसम् ॥ ९६ ॥

बलिनो यदि योद्धुमुद्यता रणकण्डूलभुजा भुजाभुजि ।
सहजेन न मोहवैरिणा तदहो सम्प्रति योद्धुमर्हथ ॥ ९७ ॥

स हि चित्तमहाटवीपतिः प्रगुणीकृत्य कषाय-यामिकान् ।
अपि चक्रिपुरन्दरादिकान् निजबन्दीकुरुते निरन्तरम् ॥ ९८ ॥

तनयोऽस्य च रागकेसरी सहजद्वेषगजेन्द्रसङ्गतः ।
कुरुते स्ववशंवदान् बलात् प्रशमश्रेणिशिरःस्थितानपि ॥ ९९ ॥

तदवारितपारिपन्थिकैर्विषयैः स्वार्थनितान्तजागरैः ।
ममतागहनात् समुत्थितैर्मुषितो मुक्तिपथैर्न को जनः ॥ १०० ॥

कुपितं समुदीक्ष्य तत्कृताश्रवसेनान्यमनन्यसन्निभम् ।
चरणस्खलनैव जायते व्रतभाजामपि धीरमानिनाम् ॥ १०१ ॥

पतितं युधि पञ्चसायकं तददतिश्रेष्ठभटं सहेत कः ।
त्रिभिरेव जगत्त्रयीं जयन् विफलां वेत्ति शरद्वयीं हि यः ॥ १०२ ॥

कुटिला हसितेन फेनिला सलिलावर्त्तविवर्त्तनाभिभृत् ।
अमुना विहिताङ्गनानदी नरके पातयति प्रमादिनः ॥ १०३ ॥

ददती स्वगणे परभ्रमं स्वमतिं स्वैरिषु चात्मवैरिषु ।
अमुनैव विनिर्मिता सतामपि माया नयने विलुम्पति ॥ १०४ ॥

जनसंवननाय कामिनीकनकेत्यक्षरषट्कबीजया ।
अपराजितयाऽस्य विद्यया स्फुरितं कुत्र न पाठसिद्धया ॥ १०५ ॥

विनिपात्य गुरुत्वगह्वरे सुखतृष्णां करिणीं प्रदर्शयन् ।
विपरीतकथासृणिक्षतैर्दमयत्त्येष विवेककुञ्जरम् ॥ १०६ ॥

तुरगानुरगारिजिज्जवान् प्रबलानस्य विकल्पसंज्ञकान् ।
गगनेऽप्यपरिस्खलद्गतीन् समरे प्रेक्ष्य न कः प्रकम्पते ॥ १०७ ॥

अजितेन जितं किमप्यहो विजितेऽस्मिन् भुवनत्रयं जिनम् ।
इति तद्विजयाय संयमक्षितिपालः स्ववशो विधीयताम् ॥ १०८ ॥

चतुरङ्गचमूवृतः स हि प्रभवेन्मोहजयाय नापरः ।
कठिनः शरभं विनाऽस्तु कः शठकण्ठीरवदर्पलोठने ॥ १०९ ॥

रदनानिव शक्रदन्तिनचतुरस्तस्य गुणान् क्षमादिकान् ।
दधते किमु कान्दिशीकतां न समुद्वीक्ष्य कषाययामिकाः ॥ ११० ॥

तनयावनयावतंसितौ जयति द्वावपि मोहभूपतेः ।
तनुजोऽस्य शमोऽनुपाधिको गरुडः पन्नगवृश्चिकाविव ॥ १११ ॥

दमनामभटैः पदे पदे कृतसौराज्यमहेऽस्य मण्डले ।
विषयाः क्व हरन्तु ते धनं यदपायानि धृतानि गुप्तिषु ॥ ११२ ॥

अतिदुःसहतामसंवृते कलयत्वाश्रवभूभृदोजसा ।
मुखमेव ददाति सम्मुखे न तु सेनाधिकृतेऽस्य संवरे ॥ ११३ ॥

मदनो वदनोरुकालिमा भवति ब्रह्मभटेऽस्य जाग्रति ।
न हि पञ्चशरेण जीयते समरेऽसौ नवगुप्तिशक्तिभृत् ॥ ११४ ॥

भवसिन्धुमपि स्वसेवकान् गतपारं स सुखेन तारयेत् ।
सुदती कियती तदग्रतः कृशमध्या शुचिगोत्रया नदी ॥ ११५ ॥

घटयत्यमुना कृतापटुं हृदि दृग् दृश्यपृथक्त्वधारणा ।
निहतं परशक्तिमायया न विशल्येव किमाशु लक्ष्मणम् ॥ ११६ ॥

विदधाति कुविद्यया यया विवशं मोहनृपो जगज्जनम् ।
प्रतिहन्ति नञैव तामसौ प्रियबीजान्तरयुक्तिलाघवः ॥ ११७ ॥

समुपैति विवेकवारणश्छलयाशेऽपि परेण पाप्मिनः ।
स्वयमेव तदीयमण्डलं सहसा संस्मृतबोधजन्मभूः ॥ ११८ ॥

सुविकल्पतुरङ्गमाः सुखं कुविकल्पानसुहृत्तुरङ्गमान् ।
दलयन्ति किलास्य दुर्मदान् मृगनागानिव भद्रदन्तिनः ॥ ११९ ॥

इति मोहनृपस्मयक्षयक्षममाश्रित्य चरित्रभूपतिम् ।
कृततद्विजया भजन्तु भोः सुखमध्यात्मपुरप्रभुत्वजम् ॥ १२० ॥

लभते यदमर्त्यनायको मणिसिंहासनमाश्रितो दिवि ।
अपि शर्म वने तृणस्थितो मुनिरध्यात्मरतिस्ततोऽधिकम् ॥ १२१ ॥

मुनये वितरन्ति यां मुदं सहजाध्यात्मरसस्य विप्रुषः ।
लहरी न चरीकरीति तामपि पीयूषसमुद्रसम्भवा ॥ १२२ ॥

धनिनामभिमानमात्रजं सुखमध्यात्मविदां तु तात्त्विकम् ।
अनयोरियदन्तरं पुनर्भवपल्ली शबरैर्न लक्ष्यते ॥ १२३ ॥

जननी धृतिरुद्यमः पिता भगिनी सत्यरतिः सदा हिता ।
सहजः सविधे च बन्धवः स्थिरता तुष्टि-कृपा-क्षमादयः ॥ १२४ ॥

मुदिता जननी स्वसा सुतो व्रतरङ्गः समता च गेहिनी ।
अनतिक्रमवृत्तिता स्नुषा भववैरस्य विभावना सुता ॥ १२५ ॥

भगिनीपतिरार्हतागमो रुचिरौ तत्तनयौ यशोवृषौ ।
अपि यस्य समाधिरात्मजारमणस्तत्तनया तटस्थता ॥ १२६ ॥

गुणसंस्तव एव मातुलः सुतपुत्राः सुनया महारथाः ।
उचिता नियतिः पितृष्वसा गुणसन्दर्भितनामदायिनी ॥ १२७ ॥

ऋजुसूत्रविचारचञ्चुरः समयस्तातसहोदरः परः ।
सुविशुद्धपथानुसारिता प्रथिता तद्गृहिणी गृहं श्रियः ॥ १२८ ॥

मणिचारिमभाजि-वारणा, स्थितिवातायनलम्बितैः पदैः ।
विधिपक्षवलक्षकुट्टिमे सुतपः स्तम्भनिवृत्तिभित्तिके ॥ १२९ ॥

शिखरस्थितनिश्चयेक्षणा विलसत्काञ्चनकुम्भभूषिते ।
स्थितिरद्भुतयोगमन्दिरे जडतातापविकारवर्जिते ॥ १३० ॥

सुकुटुम्बगृहस्थता स्थितिर्मुनिराजस्य हि तस्य तात्त्विकी ।
अपरे तु भवाटवीमृगा गृहभाजो भ्रमणे रताः सदा ॥ १३१ ॥

सुखिनो विषयज्वरातुरा न हि चक्रित्रिदशाधिपा अपि ।
उपशान्तमदस्मरज्वरो मुनिरेको भुवनत्रये सुखी ॥ १३२ ॥

अब्धिर्वारिगणैरिवानल इव ज्वालाकरालस्तृणै-
र्नीचः सज्जनदूषणैरिव कणैः कालः कलानामिव ।
आकाशं भगणैरिव प्रहरणैः शौर्यं भटानामिव,
स्वान्ते संयमवर्जितेन विषयाकाङ्क्षा नृणां पूर्यते ॥ १३३ ॥

वर्धिष्णुत्रिदशर्द्धिगौरवगतिस्पर्धिष्णुमुक्ताफल-
श्रेणीशालिनि यद्विमानतिलके सर्वार्थसिद्धाह्वये ।
भुक्तं शर्म तदाशु विस्मृतमहो युष्माभिरानीयतां,
वत्साः सम्प्रति संस्मृतेर्विषयतामाश्चर्यचिन्तामणिः ॥ १३४ ॥

या दिव्यैर्न सुखैर्न्यषेधि विषयाकाङ्क्षा समुत्सर्पिणी,
भोगैर्यास्यति तानवं कथमहो सा मानवीयैरिमैः ।

पारावारतडागकूपतटिनीतोयैर्न या शोषिता,
तामङ्गारकृतस्तृणं क्व दलयेद्दर्भाग्रजाग्रत्पयः ॥ १३५ ॥

तानत्युन्नतगर्वपर्वतभिदादम्भोलिभिर्भाषितै-
रित्थं विश्वविभुर्विबोध्य निखिलानग्राहयत् संयमम् ।
दिग्दन्तावलदं तदेव तटिनीमन्दारहारप्रभां,
शौण्डीर्येण ततो यशःश्रियमिमे विश्वाद्भुतां लेभिरे ॥ १३६ ॥

## तृतीयः सर्गः

उदीक्ष्य तादात्विकमेतदेषां, चारित्रमाश्चर्यरसेऽवधूतैः ।
शिरोभिरुत्सारितदौत्यभारैर्व्यचिन्ति चित्ते भरतस्य दूतैः ॥ १ ।

अहो महासाहसमेतदेषां, लोकोत्तरं श्रीभरतानुजानाम् ।
ये सेव्यतामेव ययुः प्रपन्नस्वतातमार्गा न तु सेवकत्वम् ॥ २ ॥

येषां प्रवृत्तौ न रसो रणार्थमन्वग्रजन्मानमकीर्त्तिभीत्या ।
निवर्तमानोऽपि बभूव मोघो भावारिघातं प्रतिपर्यवस्यन् ॥ ३ ॥

अमूदृशाः केऽपि कठोरवीर्याः कण्ठीरवाः शुश्रुविरे न कर्णे ।
अष्टापदे ये पदमाशु दत्त्वा प्रतापमायुर्दिनरत्नजैत्रम् ॥ ४ ॥

न क्रोधवह्नेर्यदमी रसेन्द्रा विचक्रिरे तातनिदेशवश्याः ।
नष्टापदष्टापदसिद्धियोग्यास्तेनैव युक्तं सहसा बभूवुः ॥ ५ ॥

युक्तं त्रिलोकोपकृताममीषां क्रोधोऽपि बोधोन्मुखतां जगाम ।
उद्योतकृत्पाटलिमाऽहिमाशोः प्रभातजातः किमुतालुलोके ॥ ६ ॥

आदाय तातानुमतिप्रतीक्षा संस्तम्भनीमौषधिमग्निशक्तेः ।
स्वात्मैव नामीभिरकार्षि गोत्रक्लेशानलानान्तु सहोदरोऽपि ॥ ७ ॥

स्वान्ते चिराद् दत्तपदः कथञ्चिद् विसंवदन्नेकफले स्वभावात् ।
अलम्भि न भ्रातरि किं प्रबुद्धैः क्रोधः खलस्नेहसमत्वमेभिः ॥ ८ ॥

अष्टापदाद्रावधिरुह्य योगश्रेणीं शिवाभ्यर्णमुपेयिवांसः ।
मूर्धानमेते नियतं सुमेरोरप्युन्नतं बिभ्रति भूभृदर्च्याः ॥ ९ ॥

तीक्ष्णाग्रभाजा भरतोक्तिसूच्या, वेधेन सञ्जातगुणप्रवेशैः ।
एभिस्त्रिलोकीविभुवंशजातैः सम्भूय मुक्ताभिरलम्भि शोभा ॥ १० ॥

भाग्यं दृशोर्दौत्यमिषादमीषामस्माकमाकस्मिकमाप पाकम् ।
आकण्ठमग्नेर्यदमू सुधायां बभुवतुर्वृत्तविलोकनेन ॥ ११ ॥

सन्तापिताः स्वामिवचोऽनलोष्णमेते यदस्माभिरुदीरयद्भिः।
संशोधयामस्तमिमं तु मन्तुमकृत्त्रिमैतद्गुणसंस्तवौघैः ॥ १२ ॥

न वेत्ति वक्तुं खलु नीचजिह्वा ब्रूते न सम्यग्गुणिनां गुणं या ।
तत्प्रत्यवायोपनताच्च साध्यमुत्पातवातान्मुखरत्वमस्याः ॥ १३ ॥

गुणग्रहेणैव विचिन्त्य वाचामाचारपूताः फलवज्जनित्वम् ।
भवन्ति सन्तः किल सिद्धशुद्धसारस्वताः केचन तत्प्रपञ्चे ॥ १४ ॥

अल्पो हि जल्पोऽन्यगुणे गुणित्वं सन्देहतल्पोपगतं तनोति ।
भूयो गुणानामुचितं तदेषामानन्दिबन्दिव्रतधारणं नः ॥ १५ ॥

इदं विमृश्य द्रुतमेत्य दूताः पुरीं विनीतां भरतं प्रणम्य ।
बभाषिरे चित्रकरं चरित्रं तेषामशेषाद्भुतभाग्यभाजाम् ॥ १६ ॥

नत्यर्थनायामनतिप्रतिज्ञा, रणेऽर्थिते ये चरणं प्रपन्नाः ।
वर्णाधिकं सर्वमकार्षुरुक्तं, वर्णाधिकादेव तवानुजास्ते ॥ १७ ॥

एतैरिदानीं पितुरात्तदीक्षैस्त्यक्तः समग्रोऽपि रमाधिकारः ।
सम्प्राप्तरत्नैरिव रोहणाद्रेर्निःस्वैः स्वमूर्धार्पितकाष्ठभारः ॥ १८ ॥

तैस्त्यक्तसङ्गैर्धृतयोगरङ्गैः कृतप्रसङ्गैः स्वगुणाधिकारे ।
विमुक्तशुक्लेतरपक्षचन्द्रनिस्तन्द्रतागर्वहरैर्बभूवे ॥ १९ ॥

सम्भावितं युद्धरसं ह्यमीभिः संहृत्य शान्तं हृदि दर्शयद्भिः ।
लब्ध्वा पुरःस्फूर्त्तिकमर्थमन्यं काव्ये कवीन्द्रैरिव मोहिताः स्मः॥ २० ॥

प्राचीनमार्गे स्वरसे न यातै रम्यावदातैर्गतपङ्कजातैः ।
तुङ्गैस्तरङ्गैरिव जाह्नवीयैस्तवानुजैस्त्वं सकुलोऽसि पूतः ॥ २१ ॥

मिथ्यात्ववैताढ्यगुहां तमिस्राग्रन्थिं प्रयत्नादुद्भिद्य सद्यः ।
प्रियाप्रियोन्मग्ननिमग्ननीरनदीद्वये निर्मितसेतुबन्धाः ॥ २२ ॥

उत्पातवृष्टौ प्रसभं कृतायां भावाहितायातकिरातदेवैः ।
रत्ने क्रियाज्ञानपवित्रचर्मच्छत्रे वितत्य श्रितसत्यसन्धाः ॥ २३ ॥

अन्तःप्रकाशायततातपत्रदण्डे स्वमध्यात्तमणिं नियोज्य ।
वेश्मापि रत्नद्वयमध्यगानां विस्मारयन्तो गुणनागराणाम् ॥ २४ ॥

उच्चैः प्रभाते परिपाकभाग्भिः सायं च वैराग्यगृहाधिपेन ।
सम्पूर्यमाणैर्दिनकृत्यशस्यैर्निर्वाहयन्तः शुचिलोकवृत्तम् ॥ २५ ॥

जित्वा क्षणेनोत्तरखण्डनिष्ठान् म्लेच्छानशेषानपि मोहमुख्यान् ।
शत्रुर्न नः कोऽपि जगत्त्रयेऽस्तीत्यन्तर्लिखित्वर्षभकूटशैले ॥ २६ ॥

लब्ध्वा निधानानि नवापि तत्त्वान्यासोत्तमाज्ञासुरसिन्धुदेशे ।
जयन्ति सर्वे वशिताऽखिलाशाः सहोदरास्ते त्वमिव त्वदीयाः॥ २७ ॥

तव प्रभुत्वे प्रविशन्त्विदानीं बाह्यानि राज्यानि नरेन्द्र तेषाम् ।
चन्द्रोडुतेजांसि रवेरिवाशु राशौ दिनादावुदये समे ते ॥ २८ ॥

श्रुत्वैतदार्त्तोऽनुजविप्रयोगात् तद्राज्यलाभाच्च मुदं दधानः ।
सङ्कीर्णरूपो भरतेश्वरोऽभूच्छायातपाभ्यामिव भाद्रघस्रः ॥ २९ ॥

स जग्रसे तानि ततोऽनुजानां राज्यानि लीलाजितराजराजः ।
आजन्मभोगप्रदमस्तकर्म न च्छत्रमन्यं सहते धरित्र्याम् ॥ ३० ॥

तथापि चक्रं न कुतोऽपि हेतोर्विवेश तस्यायुधवेश्म चक्रम् ।
दृष्टव्यलीकं धृतनीतिसारमहो रहो धाम यथा सुमित्रम् ॥ ३१ ॥

पूर्णप्रयत्ने विहितेऽपि चक्रे बहिश्चरेऽपायनिपातशङ्की ।
अलब्धसिद्धिर्महतीं तदानीं योगीव चिन्तां विततान चक्री ॥ ३२ ॥

न रञ्जितौ कैश्चरणौ मदीयौ स्वकीयकोटीरमणिप्रभाभिः ।
कैर्वा नरेन्द्रैर्विहिता न मौलौ पुष्पस्रजाज्ञा मम सद्वितीया ॥ ३३ ॥

किं नाम रत्नं रुचिरं धरित्र्यां मदीयकोशे न शयालु जातम् ।
काः सम्पदः पद्ममिवालिमाला न मामहम्पूर्विकया समीयुः॥ ३४ ॥

न के मदोत्क्षिप्तकराः करीन्द्रा गर्जन्ति मे तर्जितहस्तिमालाः ।
अमूल्यतां बिभ्रति बिभ्रतः के न वाजिनो देवमणिं विगाले ॥ ३५ ॥

एकातपत्रीकृतसर्वभूमेरित्येवमत्यद्भुतसम्पदोऽपि ।
न वश्यतां यन्मम चक्रमेति दुनोति तच्छल्यमिवोग्रमन्तः ॥ ३६ ॥

कृतौ स्फुटं लाघवमीक्षमाणैर्या नेष्यते न्यायबुधैरिदानीम् ।
न शाब्दिकानामिव कर्त्तरीयं मयि क्षमाऽऽख्यातपदप्रवृत्तिः ॥ ३७ ॥

स्थानेन यावत्स्थितिमेति चक्रं स्थानस्थितं स्यान्न मनोऽपि तावत् ।
द्वयोस्तदुच्छृङ्खलयोः खलोक्तिनियन्त्रणायां मम कोऽप्युपायः॥ ३८ ॥

संशोधिते चक्रिपदस्य हेतौ द्राक् कण्टकोद्धारविधिप्रयोगात् ।
वादीव चक्रं विमुखीभविष्णु कं दोषमुत्पश्यति मेऽवशिष्टम् ॥ ३९ ॥

संशेरते चेन्मम योग्यतायां चक्रामराश्चक्रिपदस्य शश्वत् ।
तद्दर्शयन्ते किममी प्रमीला-लीलाकृतः सङ्गररङ्गनाट्यम् ॥ ४० ॥

इत्यादिचिन्तातटिनीनिमग्नं भूपालभालस्थलरत्नमेनम् ।
समुद्दिधीर्षुः प्रकटीचकार मन्त्री गिरं नावमिवानवद्याम् ॥ ४१ ॥

अवैमि राजेन्द्र ! चरैस्तवाज्ञां न मन्यते बाहुबली बलीयान् ।
भ्राता कनीयानधुनाऽपि चण्डदोर्दण्डवित्रासितविश्ववीरः ॥ ४२ ॥

पृथ्व्यां प्रसिद्धाः कठिना गिरीन्द्रास्तद्वारि तेभ्यः कठिनं च वज्रम् ।
तच्चूर्णने जाग्रदखर्वगर्वा ततोऽपि कामं कठिनास्य मुष्टिः ॥ ४३ ॥

अवैति शत्रुक्षितिपान् समग्रान् युक्तं मृगानेव स राजसिंहः ।
मुखे तृणं ग्राहयिता रणे तानरण्यवासं भयकम्प्रतां च ॥ ४४ ॥

स्वैरं भनक्त्यप्रतिरुद्धदर्पो महाबलोऽसावसुहृद्द्रुमौघान् ।
संक्षोभयत्येव मनःसमुद्रं महीयसामप्युपजातकोपः ॥ ४५ ॥

अमुष्य सच्चामरधारिणीव प्रदर्शयन्ती शुचिपक्षपातम् ।
कदापि सेवाक्षणरङ्गभङ्गभीत्येव नीतिर्न जहाति पार्श्वम् ॥ ४६ ॥

अस्याननं लोचनलक्ष्मयुग्मं चन्द्रो द्विपक्षी विशदं यशश्च ।
भालं विशालं च तदर्धमत्र द्वासप्ततिस्तेन कला घटन्ते ॥ ४७ ॥

सूत्रार्थभिन्ना नवतत्त्वविद्याश्चतुर्दशान्याश्च मयि स्फुरन्ति ।
उदन्तमन्तःस्थितदन्तरेखा दम्भादिदं सूचयतीदमास्यम् ॥ ४८ ॥

अमानतद्दानजलप्रवाहे खलेत्यलं तस्य यशोमरालः ।
प्रत्यर्थिभूपालयशःप्रशस्तमुक्तागणग्रासवितीर्णकालः ॥ ४९ ॥

भवत्यहीन्द्राननवाडवाग्निर्दिग्दन्तिदन्ताक्रमणात् त्रिलोक्याम् ।
सतीव्रतं तीव्रतरं तदीयकीर्त्तेः परस्पर्शनिषेधशुद्ध्या ॥ ५० ॥

रविर्निशायां जलधौ निपत्य करोति मन्त्रं वडवानलेन ।
तेजोऽस्य जेतुं न दिने तु किञ्चित् स्मरत्यसौ छिद्रघटाभबुद्धिः॥ ५१

मित्रं तदास्यस्य रवेश्च पद्मं मिथो महामत्सरवारणाय ।
ददाति किं गुञ्जदलिच्छलेन तदोजसस्तस्य च सन्धिजल्पम्॥ ५२ ॥

गुणास्तदीयाः शरदिन्दुशुभ्राश्चेतो जनानामिह रञ्जयन्ति ।
सा चातुरी काचन धातुरीहामन्वेतु नो वस्तुगतिं तु जातु ॥ ५३ ॥

उद्वासयन्त्यन्यगुणांश्चिरस्थान् मनो जनानां प्रसभं हरन्ति ।
तुदन्ति रोमोद्गमकण्टकैस्तानुच्छृङ्खलाः केऽपि गुणास्तदीयाः॥५४॥

तद्रूपसौन्दर्यनिरूपणेन कन्दर्पदर्पस्तनुतामुपैति ।
स्पर्द्धानुबन्धं हृदयेन धत्तो नूनं विनेयाविव चाश्विनेयौ ॥ ५५ ॥

प्रत्यक्षतां गच्छति विश्ववृत्तं वातायनैस्तस्य महाशयस्य ।
दिग्देशकालव्यवधानवन्ध्यं धर्मप्रभावैरिव योगभाजः ॥ ५६ ॥

एष्यद्विनिर्यद्बहुदिक् क्व चारुनिःशेषलेखोल्लिखितर्द्धिवृद्धिः ।
सहस्रनेत्रैः सचरैर्भविष्णुः स्पर्द्धां विधत्ते सहवासवेन ॥ ५७ ॥

तदीयकोशे विलसत्यपूर्वा लब्धिः किलाक्षीणमहानसीया ।
दत्ता परस्मै यदनन्तलक्ष्मीः स्वयं च भुक्ताऽपि न निष्ठिता स्यात् ॥५८॥

अन्तःपुरं तस्य रतेर्न कायव्यूहश्रियं किं श्रयतेऽत्युदारम् ।
विश्वत्रयोत्कृष्टविनोदशालिसमानशीलस्मररङ्गलीलम् ॥ ५९ ॥

वाक्कौशलाद् वा पतिमीहते स प्रोद्दामधीर्जेतुमिहानु तं यत् ।
लक्ष्मच्छलोद्ग्राहनिगीर्णवर्णमालम्बितं पत्रमिवेदमिन्दुः ॥ ६० ॥

सुधीभिरक्षुद्रविमुद्रितार्थविस्तारिसारस्वतसारकोशैः ।
सकर्णकर्णामृतयानतृप्तिः सञ्जायते तस्य महासभायाम् ॥ ६१ ॥

कविर्बुधश्चाभ्युदयं लभेते सदा यदभ्यर्णगतिं श्रयन्तौ ।
स कोऽपि भास्वान् गणकैरदृष्टस्वभावधामा बहलीशनामा ॥ ६२ ॥

अपारिजातोऽपि स पारिजातः सम्पूरयन्नर्थिगणे हितानि ।
अमन्दरागोऽपि च मन्दरागः स्थैर्येण किं भक्तजनैर्न दृष्टः ॥ ६३ ॥

अमान्तमन्तःकरणेऽस्य शौर्यरसं किमादाय कृता विधात्रा ।
सुत्रामजैत्राद्भुतगात्रवीर्याः सहस्रशस्तस्य जयन्ति पुत्राः ॥ ६४ ॥

एकोऽपि तेषां यदि युद्धरङ्गच्छेको रणेऽभ्यापतति प्रकोपात् ।
भेकोपमानाः क्षितिपास्तदानीं पलायनस्यैव कलां स्मरन्ति ॥ ६५ ॥

चित्रं न यच्छत्ययमर्थिनेऽर्थं कराग्रजाग्रच्छतकोटिपद्मः ।
यत्त्यक्तकोशो द्विषतां ददाति खड्गेऽस्य दिव्यश्रियमद्भुतं तत्॥ ६६ ॥

तस्य प्रतापानलधूम एव चकास्ति साक्षादसितः कृपाणः ।
विपक्षभूभृन्मशकव्रजोऽस्मान्नो चेत् पलायेत कथं विषण्णः ॥ ६७ ॥

अश्वव्रजोत्खातधरारजोभिर्नग्नो युधि प्रौढनिशान्धकारे ।
खड्गोऽस्य जैत्रं जपतीव मन्त्रं कृत्वाऽरितेजःकणवीरहोमम् ॥ ६८ ॥

स्वीयच्छविच्छन्नविपक्षलक्षप्रतापकीर्त्यर्कविधुप्रकाशम् ।
धाराधरं प्रेक्ष्य तदीयखड्गं पलायिताः केऽत्र न राजहंसाः ॥ ६९ ॥

आनन्दनश्चन्दनवत्प्रजानां कृतान्तवद्भीतिकरो रिपूणाम् ।
व्यामोहनो मान्त्रिकवच्छठानां स राजते राजकुलावतंसः ॥ ७० ॥

अस्मिन् दृढीभूतजनानुरागे विवृद्धकोशे प्रसृतप्रतापे ।
बलोर्जिते कः कुरुते जयाशां प्राच्यं यशः संशयितं चिकीर्षुः॥ ७१ ॥

त्वया त्वमुष्मिन्नजिते न शक्यस्त्रातुं निजश्चक्रिपदप्रवादः ।
नभस्यलुप्त्वा ग्रहमात्रदीप्तिं ग्रहाधिपख्यातिमुपैति नार्कः ॥ ७२ ॥

कियज्जितं जाग्रति तत्र शत्रौ क्षेत्रं त्वयेदं भरताभिधानम् ।
ग्रन्थावभिन्ने सति मोहनीयकर्मेव मोक्षार्थमुपस्थितेन ॥ ७३ ॥

समग्रशास्त्रेऽपि कृतप्रवेशा मोमुह्यते ब्रह्मणि दृग्यथोच्चैः ।
तथा तवास्मिन् जगदेकसारे प्रणीतषट्खण्डजयाऽपि सेना ॥ ७४ ॥

चक्रं सहस्रेण सुरैरवेति वृत्तान्तमेनं द्विसहस्रनेत्रम् ।
प्रतिश्रुतं सर्वजये प्रवेशं कथं करोत्यायुधवेश्मनीदम् ॥ ७५ ॥

न वक्रभावस्तदिहास्ति कश्चिच्चक्रस्य भूशक्रसमागमाय ।
तवानुजस्यैव तु सत्त्वयास्मिन्नारोप्यते विभ्रमशक्तिभाजा ॥ ७६ ॥

तदस्य पूर्वं प्रहितेन वक्त्रच्छायैव दूतेन विलोकनीया ।
*ॐकारमग्रेसरयत्यतश्चेदाज्ञा श्रुतौ तन्महतीष्टसिद्धिः* ॥ ७७ ॥

प्रमादसुप्तो यदि नागतोऽसौ तद् द्रागमुं जागरयिष्यतीयम् ।
त्वद्धामभानोरुदयाभिधात्री दूतीयवाणी कृकुवाकुकाकुः ॥ ७८ ॥

अन्येष्विव त्वय्यपि दोर्मदं स प्रदर्शयिष्यन्नथ नागतश्चेत् ।
त्वद्दूतवाचः श्रवणात्तदानीं मानी प्रतिज्ञास्यति सम्परायम् ॥ ७९ ॥

स त्वामगत्वा शरणं रणं चेत् करोति तत्सर्वबलेन दण्ड्यः ।
स्वीयोऽपि विद्धो विषकण्टकेन कथं क्रमस्यावयवः सुरक्ष्यः॥ ८० ॥

क्षमाभृतः शत्रुषु सक्षमा ये ते मुक्तिकामा न तु भुक्तिकामाः ।
तेन त्वयाज्ञामवमन्यमाने नास्मिन्नुपेक्षाऽवरजे विधेया ॥ ८१ ॥

इमां समुद्दीपितनीतिसारामुदीर्य वाचं विरराम मन्त्री ।
दवार्दितः शैल इवाब्दसिक्तः क्रुद्धोऽवबुद्धो निजगाद चक्री ॥ ८२ ॥

जागर्त्ति नाज्ञां मम मन्यतेऽसावित्येष चित्ते मम मन्युहेतुः ।
ज्येष्ठः कनिष्ठाविनयासहिष्णुरित्येष तं हन्ति कुकीर्त्तिकेतुः ॥ ८३ ॥

एकत्र भीत्यै नृपधर्मभङ्गो हठे शठानामविलोठ्यमाने ।
अन्यत्र सौभ्रात्रहतिः पपात तत्सङ्कटं 'व्याघ्रतटीयमेतत्' ॥ ८४ ॥

ललुः पुराष्टाव (?) तिश्चरित्रं स्थातुं न दत्तेऽनुजमप्यमुं यत् ।
सम्पश्यति भ्रातृगृहं न वक्रक्रूरग्रहः किं मम चक्रदम्भात् ॥ ८५ ॥

लोभान्न शोभां सहतेऽनुजानां स्वैरं च वैरं कुरुते कुलेऽसौ ।
इत्युच्छलन्तीमपवादधारामुपक्रमेऽस्मिन् मम को रुणद्धि ॥ ८६ ॥

एकेन चक्रेण रथं यथार्कः सौभ्रात्रमेकेन तथाऽनुजेन ।
येनाहमद्याध्वनि वाहयामि ते पातयन्नाशु कथं पतामि ॥ ८७ ॥

शक्रं चिकीर्षुर्ननु चक्रबन्धुर्गोत्रच्छिदे मां तरलीकरोति ।
इयत्प्रभुत्वादहमस्मि तुष्टो बिभेमि तस्या इति किं न वेत्ति ॥ ८८ ॥

स्वयं न गोत्रे प्रभविष्णु चक्रं प्रवर्त्तयत्याशु तदाहवे माम् ।
अनीतिकृत्येन विरोधबोधः किमीतिमध्ये पठितस्य तस्य ॥ ८९ ॥

जगज्जयात्यन्तहितस्य यद्वा चक्रस्य दोषो न मया विचिन्त्यः ।
समग्रसाद्गुण्यविधौ विधातुर्वैमुख्यमेवेदमुदीरणीयम् ॥ ९० ॥

भ्रातृव्रजप्रव्रजनोत्थतापो नैकः प्रशान्तो हृदये मदीये ।
पराभवेऽमुष्य पुनर्द्वितीयः सोढुं क्व शक्यो विषमज्वराभः ॥ ९१ ॥

आशीविषीयैर्विजिता किलाशा ममानुजास्ते जगतोऽपि वन्द्याः ।
पतन्नमूदृग्व्यसनेष्विदानीमहं तु हन्तास्मि हतस्तयैव ॥ ९२ ॥

दुःखैकखानिं दुरितद्रुवल्लीमशेषदोषव्रजजन्मभूमिम् ।
आशां निराशीकुरुते जनो यः सुखी स एवेह न कश्चिदन्यः ॥ ९३ ॥

जीर्णे न जीर्णा न कृशे कृशा या नैसर्गिकी सा न जने धनाशा ।
उत्पातजातिः परमुल्बणैषा तस्यां च सत्यां सुखिता कुतस्त्या ॥ ९४ ॥

यां स्नेहपीयूषघनेऽप्यकस्मादङ्गारधारां प्रकटीकरोति ।
आशाभिधाना किल सा दवाग्निज्वाला न लोकावगतस्वभावा ॥ ९५ ॥

विधाय वक्षो बलिभिः सहारं सपुष्पमालं पलितैः शिरश्च ।
पुंसामतृप्ता धृतिमेष्यतीयं प्रदाय किं मण्डनमन्यदाशा ॥ ९६ ॥

आलम्ब्य लोका व्यसनार्णवे यां पतन्ति हित्वा च तमुत्तरन्ति ।
आश्चर्यमेषा विपरीतरीतिराशातरी किं न चरीकरीति ॥ ९७ ॥

न यत्र चन्द्रार्कमरीचिवीचिः प्रयाति नो वा पवनः प्रचण्डः ।
हित्वा विचारं पुरुषस्य तत्राप्याशापिशाची कुरुते प्रचारम् ॥ ९८ ॥

अस्या वशीभूय कथं न भूयस्त्रपेऽकृपो भ्रातृवधाय धावन् ।
कथं च कुर्यामभिषेकनीरानिर्धौतचक्राननपङ्कमार्ष्टिम् ॥ ९९ ॥

इत्युद्धतद्वैतविचारदोलालोलायमाने भरतस्य चित्ते ।
उदाहरन्न्यायविवेकशुद्धमद्वैतपक्षं सचिवो निजेष्टम् ॥ १०० ॥

राज्ञामसुभ्योऽप्यधिकं हि तेजोयुक्तस्ततस्तच्छिदिमन्युरेव ।
निजः परो वा स विनीयमानो नीत्या निषेधान्न यशो निहन्ति ॥ १०१ ॥

अल्पो हि सह्योऽविनयोऽनुजस्य गृहोचितोऽस्मादितरस्त्वसह्यः ।
उद्गृह्णति ह्यध्ययने च वादे भिन्ना गुरोर्व्याहृतयो न शिष्ये ॥ १०२ ॥

ज्येष्ठस्य नाज्ञां दलयेत्कनीयानिति क्षितौ नीतिरनादिरूढा ।
लुम्पन्नसौ तां यदि नो कुकीर्त्तेर्बिभेति तत्का भवतस्ततो भीः ॥ १०३ ॥

सौभ्रात्रभङ्गस्त्वगतिः स्वनीतिप्रतीतिसिद्धावनुषङ्गजन्मा ।
व्ययो धनायेव धनार्जनायां भवन्ननुद्देश्यतया न दोषः ॥ १०४ ॥

स्फुटीकरोत्येव च राजनीतिर्द्वयोस्तुलेयं लघुतागुरुत्वे ।
तथापि दिग्मोहसमः समत्वभ्रमो भवन् केन निवारणीयः ॥ १०५ ॥

न दोषमात्रेण च राजनीतिस्त्वया महाराज ! मनस्युपेक्ष्या ।
दृष्टं श्रुतं वा भुवने विना किं दोषोद्भवं स्फूर्जति राजतेजः ॥ १०६ ॥

चक्रेण सौभ्रात्रममुञ्चतस्ते परेण तत्सुस्थितमस्तु भावा ।
शेते सुखं यज्जनितप्रतापकीर्त्येककोणे निखिलत्रिलोकी ॥ १०७ ॥

हित्वाऽनुतापद्रवतां तदन्तः कठोरतां चक्रवदाद्रियस्व ।
धृतिर्न बाढं हृदि संशयानं न राज्यलीला तु शयानमेति ॥ १०८ ॥

सुदुःसहं किंचन नास्ति राज्ञामाज्ञाविलोपादपरं हि दुःखम् ।
तद्दातरि भ्रातरि सौहृदं चेज्जातिस्तदा काऽरिपदाभिधेया ॥ १०९ ॥

नम्रे मृदुत्वं च शठे हठित्वं भृत्ये प्रसादश्च नरेन्द्रचिह्नम् ।
न केवलं चामरधारणं तु मौलौ धृतं तत्पशुनाऽपि पश्चात् ॥ ११० ॥

नम्रस्य देयोन्नतिरित्युदात्तं नत्वोन्नमच्चामरमाह राज्ञे ।
अत्युन्नतो यः स तु नामनीय इत्यस्य वक्ति व्यतिरेकभङ्गी ॥ १११ ॥

आशानिराशीकरणादिसूक्तं पीयूषसिक्तं स्वदते यतीनाम् ।
नीत्यूर्जितं शौवरसं ददाति पृथ्वीपतीनां तु शुभायतीनाम् ॥ ११२ ॥

प्रभुत्वमन्त्रौ प्रवितत्य पक्षावुत्साहमाशाविनतातनूजम् ।
राज्ञोऽरिनागा विनिरीक्ष्य दूराद्भ्रमन्तमन्तः सभया भवन्ति ॥ ११३ ॥

स किंनृपो यस्य भवेन्न चित्ते परोन्नतिध्वंसविधौ सदाशा ।
अत्युन्नताम्भोदघटाऽसहिष्णोर्लघुः स वायोरपि किं न लोके॥ ११४ ॥

स्नात्वा जयाशा परकुम्भिकुम्भकीलालजालैस्तव शुद्धिमेति ।
नान्यैर्जलौघैरिति मा मुहस्त्वं निजद्रुहः स्नेहमहेन्द्रजालैः ॥ ११५ ॥

सिद्धा जिगीषा निखिला तवेश क्लेशः कियान् भ्रातृजये विधेये ।
स्वं पौरुषं स्फोरय मुञ्च दैन्यं न शत्रुजिष्णु क्व तवास्ति सैन्यम् ॥११६॥

दूतं ततो भूपुरुहूत हूतिकलाकुहूतन्द्रितभूपचन्द्रम् ।
निस्तन्द्रधीः प्रेषय पुण्यपूतं कार्यं तदाकूतमवेत्य कुर्याः ॥ ११७ ॥

इति सचिववचोभिर्बाढमुच्चाटितायां,
कलितविविधतन्त्रैः स्निग्धतायां सपत्न्याम् ।
अनुजमनु धनुर्ज्यारोपकोपं वितेने,
भरतहृदि पदं द्रागाददाना जिगीषा ॥ ११८ ॥

सकलभरतभर्त्तुर्मानसं सूर्यरत्नं सचिवतरणिवाक्याभीशुयोगेन वह्निम् ।
यमुदगिरदमर्षं तेन दग्धं तदानीं चिरपरिचयजातं सोदरस्नेहखण्डम् ॥११९॥

गुणकमलहिमानी स्नेहपानीयपङ्को,
व्यसनविपुलखानी राजसीराजधानी ।
अहह विषयतृष्णा सर्वतोऽप्युग्रवीर्या,
यदजनि जिननाथज्येष्ठपुत्रोऽनुजारिः ॥ १२० ॥

विधुविशदयशःश्रीः स्वामिभक्तं सुवृत्तं,
नयनिपुणमदम्भं निर्भयं सत्यवाचम् ।
द्रुतमनुबहलीशं प्रेषयामास राजा,
विजितपवनवेगं सोऽथ दूतं सुवेगम् ॥ १२१ ॥

## चतुर्थः सर्गः

ऐन्द्रस्तोमनतायाग्रेप्रत्यूहव्यूहनाशिने ।
नमः श्री पार्श्वनाथाय, श्री शङ्खेश्वरमौलये ॥

प्रस्थितं प्रभुगिरागतपक्षं, वेगतः शकुनमेव सुवेगम् ।
भाविभावगतिवीक्षणदक्षा, तं न्यवारयदथाऽशकुनाली ॥ १ ॥

तस्य दैवमतिसौहृदपात्रे वैरिदौत्यवहनादिव संद्यः ।
शंसितुं विपदि यत्परिणामं स्पन्दते स्म नयनं पथि वामम् ॥ २ ॥

आदितः स्ववशमप्यवशः सन्नब्जयोनिरचनानुचरत्वात् ।
गन्धसिन्धुरमवेक्षितुकामः स क्रमेलकममेलयदक्ष्णा ॥ ३ ॥

चाषमीक्षितुमनाः स शुभार्थी वायसं कटु रटन्तमपश्यत् ।
रोहणेऽपि मणिमाशु जिघृक्षुः काचखण्डमिव भाग्यविहीनः ॥ ४ ॥

पापकेतुततपुच्छमिवोग्रं जङ्गमं भयतरोरिव पादम् ।
अर्गलामिव समीहितसिद्धेर्दन्दशूकमयमैक्षत मार्गे ॥ ५ ॥

सन्ततं दहनमण्डलमध्यात् तस्य रोगवियुजो रविनाडी ।
तापकारणमिमं व्यवसायं सर्वतोऽपि हि विवक्षुरुवाह ॥ ६ ॥

व्यात्तमास्यमिव विघ्नमृगारेः कुप्रवृत्तितटिनीतटगस्य ।
रिक्तकुम्भमयमैक्षत सद्यो मस्तके विधवया धृतमुच्चैः ॥ ७ ॥

भूरिबन्धवृतमावृतिहीनं प्रार्थनाविषयमप्युपनभ्रम् ।
काष्ठभारमकरोदयमक्ष्णोः कष्टभारमतिथिं किमु मूर्त्तम् ॥ ८ ॥

मित्रवन्नवदवानलमुक्तज्वालजालजटिलं प्रतियान्तम् ।
मङ्क्षु तं क्षुतमपि प्रतिषेध्य प्रस्थितेरसकृदाप न दोषम् ॥ ९ ॥

शिक्षिताश्ववरसारथियुक्तोऽप्यस्खलत्पथि रथश्च तदीयः ।
निश्चितामनुहरन्निव चेष्टां तन्मनोरथपरिस्खलनस्य ॥ १० ॥

चस्कले रसनयाऽस्य तदानीं जल्पकल्पकतयापि किलोक्तौ ।
लक्षयक्षनततक्षशिलेशक्लेशवारकपराहतयेव ॥ ११ ॥

वारितोऽपि पथि सादिसमूहैस्तस्य वामदिशि दक्षिणहस्तात् ।
सारमेयतरुणः परिसर्पन् सारमेयगतमेवमवादीत् ॥ १२ ॥

वाममेव हरिणा हरिणाशुप्रेरिताः परिययुः पथि तस्य ।
स्वीयजातिमृगभिद्गृहवाम्यं दर्शयन्त इव स्वोत्प्लुतिदम्भात् ॥ १३ ॥

पापयोरपथदर्शनदोषान्नेत्रयोः प्रविकिरन् बहुधूलीम् ।
तं न्यवर्त्तयदिव प्रतिकूलो मारुतोऽप्यधिकृतव्यवसायात् ॥ १४ ॥

अग्रतः कटु रराट निविष्टः शुष्ककण्टकितरौ करटोऽस्य ।
लक्षयन् स्फुटममङ्गलबाणाघर्षिशाणघनघर्घरघोषम् ॥ १५ ॥

स्थाष्णु[स्नु]रस्य पथि दक्षिणहस्ते रासभोऽपि विरसं रसति स्म ।
सत्वरोद्भवदुपद्रवनाट्येऽदत्तभोजनमृदङ्गसमानः ॥ १६ ॥

तादृशैरशकुनैरपि जानन्नात्यजत् प्रचलनव्यवसायम् ।
नाधिकं प्रभुनिदेशविलम्बात् स स्म वेद बलवन्तमपायम् ॥ १७ ॥

त्यक्तसौवविषयावधिरेष प्राप बाहुबलिमण्डलमिद्धम् ।
शर्मणाऽतिशयिना परिपूर्णं द्रागमहोदयमिवोत्तमसाधुः ॥ १८ ॥

तत्र तेन वनमैक्ष्यत यस्मिन् यत्र चारुतरुराजिविराजि ।
सा च काचिदपि नैव शुकैर्या न स्तुतर्षभयशोभिरशोभि ॥ १९ ॥

घोषितर्षभगुणा उपरिस्था यद्वनीतरुषु तद्वदधःस्थाः ।
सारिकाः स किल गोपगणानां दारिकाश्च परिवीक्ष्य जहर्ष ॥ २० ॥

यद्वनद्रुमगणे सुरवृक्षैर्निर्गतैः क्वचन कालनियोगात् ।
साक्षिभूतमुखरभ्रमरौघे न्यस्तमेव सरसं हृदि मेने ॥ २१ ॥

भृङ्गसङ्गतलताकरताली दानरङ्गरसिका शशिशुभ्रैः ।
तेन यत्र कुसुमै सुरवाटी हासकृन्न कलिता नवनाली ॥ २२ ॥

यत्र वृक्षतलसुप्तमगुप्तस्वर्णभूषणगणं पथिकौघम् ।
निश्चिकाय परिवीक्ष्य स गोमुद्धामकाममभिराममगुप्तम् ॥ २३ ॥

यत्र तेन ददृशे कणहन्तृव्यन्तरव्रजपलायनलीला ।
क्षेत्रपालपरिदर्शितमन्युत्रासितोत्प्लुतविसङ्गमदम्भात् ॥ २४ ॥

तस्य यत्र गगनोपगताग्रा ग्रामधामनिचिताः कणपुञ्जाः ।
पर्वता इव करालकुकालव्यालमूर्ध्नि पतिताः प्रतिभाताः ॥ २५ ॥

क्षेत्रमैक्षत स यत्र पवित्रं मण्डितं बहुभिरैक्षवदण्डैः ।
उच्छ्रितैः प्रतिपदं धृतगर्वग्रन्थिभिर्नवसुधारसजैत्रैः ॥ २६ ॥

वेधसः स्फुटमबुद्ध स यत्र स्वर्णरत्नरजताकरदर्शी ।
मेरुरोहणहराचलकोटी सर्गयोग्यदललाभसुभिक्षम् ॥ २७ ॥

यत्र भर्त्तरि स रागमगुप्तं सुभ्रुवः स्म न भुवः किमवैति ।
सर्वतः प्रकटरत्नखनीभ्यः पाटलांशुपटलैः प्रसरद्भिः ॥ २८ ॥

किं तरक्षुहरिचित्रकचक्रं मङ्क्षु दृप्तमपि यत्र जनेन ।
वीक्ष्य बाहुबलिपौरुषगानात् खञ्जितं च मदकारि न तेन ॥ २९ ॥

यत्र गर्जितपराः स्वविषाणोत्खातसिन्धुतटपातितगर्त्ताः ।
चक्रिरे परिणताभ्रमुकान्तस्पर्द्धिनोऽस्य वृषभा हृदि मोदम् ॥ ३० ॥

कूपकुक्षिमुपभिद्य घटीभिर्जीवनान्यपि हठेन हरन्तः ।
तस्य चित्तमहरन्नरघट्टा यत्र पूत्कृतिकृतः शठभट्टाः ॥ ३१ ॥

दुष्ट दूत इति यत्र विलोलैः षट्पदैर्भ्रुकुटिभङ्गकरालम् ।
पल्वलैर्मुकुलितामलपद्मछद्मलोचनशतैः स निरैक्षि ॥ ३२ ॥

त्यक्तगोवधघटोद्भवभीतक्षीरसागरपयः कलशोध्न्यः ।
किं विभज्य जगृहुर्जनगव्यो वीक्ष्य ता इति स यत्र शशङ्के ॥ ३३ ॥

धान्यमैक्षि कृषिकैः सकृदुप्तं लूनमप्यसकृदुद्गतरोहम् ।
तेन यत्र पृथुधीभिरधीताध्यापितं मनसि शास्त्रमिवोच्चैः ॥ ३४ ॥

छायया कवलिताध्वसु यस्मिन् भूयसी क्षितिरुहामतिकान्ता ।
सञ्चरद्रथमणिद्युतिदम्भात् तेन सौररुगचिन्त्यत वान्ता ॥ ३५ ॥

ग्रामराजिषु कृतान्तरमानस्ताम्रचूडतरुणोड्डयनेन ।
सन्तुतोष न तु यत्र स सीम्नां क्षेत्रपङ्क्तिभिरनन्तरवेदी ॥ ३६ ॥

स प्रपाः पथि विनिर्मितगङ्गापत्रपाः परिपपौ जलपूर्णाः ।
यत्र च प्रतिपदं कणहट्टान् लोचनेन जनदैन्यघरट्टान् ॥ ३७ ॥

यत्र काम्यवरणाय पुरेषु स्थूललक्षपटहे ध्वनति द्राग् ।
स व्यचिन्तयदगादिषु लीनां दीनतां प्रति रवे न रुदित्वा ॥ ३८ ॥

यत्र वल्गनपरैर्विदधद्भिः शास्त्रविद्भिरितरेतरमूहम् ।
सोऽन्वमन्यत गिरो भगवत्याः कौतुकाय गजयुद्धमुदीतम् ॥ ३९ ॥

यत्र शाब्दिकमठेषु गुरूणामुल्लिलेख्व स कराभिनयेन ।
तर्जनाममरशिष्यसमूहव्याकुलैकगुरुकद्युसभायाः ॥ ४० ॥

अङ्कसङ्कलनया खटिकानां खण्डनं कलयतां गणकानाम् ।
यत्र तेन भगणोद्भवलोपव्यग्रधातृसमता प्रतिपेदे ॥ ४१ ॥

कापिलीयमिव बुद्ध्यविलेपाद्गौणभोगमखिलेषु पुरेषु ।
तत्र सौवकरणैः स परार्थैरात्मसिद्धिपरमैक्षत लोकम् ॥ ४२ ॥

पूर्णतावदगजध्वजतर्का यत्र वैभवमहालयविद्याः ।
स व्यलोकयदलौकिकपद्मावाप्तविभ्रमरसा नगरेषु ॥ ४३ ॥

वासरान्त्र तिमिरेण विभक्तं ग्रामकर्बटपुरादिषु नक्तम् ।
यत्र तेन ददृशे हसितेषु स्फाटिकार्हतगृहांशुसमूहैः ॥ ४४ ॥

तं स्म सस्मयवशा इव चैत्यस्तम्भलग्नवपुषः सुखयन्ति ।
पुत्रिकाः कलितलक्षकटाक्षा यत्र सेर्ष्यमितरेतरपश्याः ॥ ४५ ॥

इन्द्रनीलमणिकुट्टिमहेमस्तम्भशालिजिनराजगृहेषु ।
यत्र सोऽर्णवविलोलनलोलस्वर्णशैलशतविभ्रममूहे ॥ ४६ ॥

यज्जिनेन्द्रगृहदण्डनिविष्टे लाम्बनालिभृति पार्वणचन्द्रे ।
विस्मयाकुलमनास्ततनालव्योमपङ्कजधिया स बभूव ॥ ४७ ॥

तत्र कस्त्वमिति पृच्छति लोके शंसिते भरतदूत इतीमम् ।
मौलमर्थमनवेत्य निनिन्दुः कल्पितान्यविषयाः पथि वध्वः ॥ ४८ ॥

बुध्यते न भरतः किमु नेतेत्याक्षिपन्तममुमुत्करतालम् ।
ता जगुर्न परमेनमवेमः कञ्चुकीयरचनैकविशेषात् ॥ ४९ ॥

पूजितो जयति स क्षितिपालैः सार्वभौम इति जल्पति तस्मिन् ।
तज्जना जगुरसौ न सुनन्दानन्दनात् किल परोऽस्ति पृथिव्याम्॥ ५० ॥

स ह्यनन्तबल इत्यभिजल्पत्यत्र तत्र जगदुः कृषिकाराः ।
अन्तमेति ननु तद्बलमस्मद्देशपेशलहलैर्निपतद्भिः ॥ ५१ ॥

उत्थितैः क्षितितृणादिखनद्भिर्दात्रपाणिभिरभण्यत वाणी ।
तद्भटायुधयशःशितदात्रश्रेणिरेव पिबति प्रसभं नः ॥ ५२ ॥

तं प्रतिप्रबलगर्वभृतैर्वाक् तत्र मङ्क्षुरथकृद्भिरभाणि ।
ईश्महे विभुबले तव दातुं छिन्नकाष्ठनिचयैरपि कष्टम् ॥ ५३ ॥

पर्शुपाणिभिरपि स्वमुखेन्दोः कीलितः सकलया किल वाचा ।
किं न नः करशयालुकुठारास्त्वत्प्रभोर्बलगदप्रतिकाराः ॥ ५४ ॥

गा इव त्वदधिपस्य भटान् द्राग् चण्डदण्डहतिभिर्वशयामः ।
आदिशेत् सपदि बाहुबली चेद् गोदुहोऽपि गिरमाहुरितीमाम् ॥ ५५ ॥

एवमेष विनिरीक्ष्य सुनन्दानन्दनान्यनृपनाम्न्यसहिष्णून् ।
तज्जनान् व्यचरदाहितमुद्रो वाचि साचिवदनस्फुटलज्जः ॥ ५६ ॥

पालितांसुबहुलङ्घितभूमिर्भूमिपालविधुना क्रमतोऽसौ ।
नेत्रयोर्व्यधित तक्षशिलां तां चन्द्रिकां कुवलये कृतहर्षाम् ॥ ५७ ॥

चित्रिते रतिमनाप्य रथाङ्गेयद्गृहोच्चशिखरस्थितिभाजि ।
विह्वला त्रिदशसिन्धुरथाङ्गी न स्म विश्वसिति[...]रथाङ्गे ॥ ५८ ॥

रत्नराशिषु हृतेषु ययोच्चैर्नन्वभूज्जलनिधिर्जलशेषः ।
यां रुरोध किमु तद्ग्रहणार्थं तेन नैष परिखाऽपरवेषः ॥ ५९ ॥

सान्द्रविद्रुमघनो घुसृणौघैः फेनिलः प्रसृतचन्द्रपरागैः ।
आश्रितो मृगमदैर्मलिनाभ्रैरध्वनत् पटुवदापणवार्द्धिः ॥ ६० ॥

सम्पुटीकृतनभोऽन्तरिता द्योस्तिष्ठति स्म विजितेव ययोच्चैः ।
पृष्ठतस्तदभिधावनभीत्या रन्ध्रदत्तचलतारकनेत्रा ॥ ६१ ॥

यत्र नीलशितिशुभ्रमणोनामंशुभिर्नृपगृहोल्लसितानाम् ।
स त्रिवेणिपयसि प्रतिवेलं मज्जति स्म मिलति द्विजराजः ॥ ६२ ॥

यद्गृहोन्नतगवाक्षसलीलं भामिनीवदनलक्ष्ममुदीक्ष्य ।
यातु शत्रुगणसङ्कटमग्नो भीतभीत इव शीतमरीचिः ॥ ६३ ॥

विस्तृतस्फटिकवेश्मविभायां पूर्णिमातिथिरुपेत्य न यस्याम् ।
कामिनीवदनपूर्णविधोः स्म प्रेमबन्धपरवत्यपयाति ॥ ६४ ॥

उन्मिषत्पुरदरास्य कुलीने मज्जिता ननु पुरन्दरयुक्ता ।
इन्दुबिन्दुविषयच्युतकार्तं किं द्यौर्ययेदमुदभाणि मदेन ॥ ६५ ॥

याऽपरोक्षपदसम्भववृत्तिव्याप्यताविदम्लितभ्रममूला ।
ब्रह्मवत्सकलसारचरित्रा शुद्धबुद्धिभिरभूत् स्पृहणीया ॥ ६६ ॥

अपूर्णमिदं महाकाव्यम् । इतोऽग्रे न लभ्यते पाठः ।

# ॥ विजयोल्लास-महाकाव्यम् ॥

## -: प्रथमः सर्गः :-

ऐङ्कारसारस्मृतिसम्प्रवृत्तै-र्वृत्तैः सुवृत्तैः पटुगीतकीर्तिः ।
मदन्तरायव्ययसावधानः, श्रियेऽस्तु शङ्खेश्वरपार्श्वनाथः ॥ १ ॥

ऐन्द्रं प्रकाशं कुरुतां ममोद्यन्महारयादेव सरस्वतीयम् ।
सदा हितानां तनुते हितं या, पुंसां पवित्रा सकलाधिकारम् ॥ २ ॥

ऐङ्कारमाराधयतां जनानां, येषां प्रसादः परमोपकारी ।
तेषां गुरूणां चरणारविन्दरजः परां सम्पदमातनोतु ॥ ३ ॥

न्यूनाधिकाभ्यां शशिभानुमद्भ्यां याभ्यामुभाभ्यां किल कुण्डलाभ्याम् ।
शोभानुरूपेत्यपरं जगत्यै, योग्यं महः कुण्डलमर्पयन्तम् ॥ ४ ॥

सुधांशुनाम्नैव मुधा जनोऽयं, कलङ्किनं कञ्चन बह्वमंस्त ।
इतीव मत्वा तमपह्नुवानैर्द्यां द्योतयन्तं विशदैर्यशोभिः ॥ ५ ॥

निदर्शनत्वं बहुरूपभाजामनङ्गसङ्गं कथमङ्गतीति ।
रूपप्रकर्षप्रथितं जनानां, भाग्येन भूमीमनुकम्पयन्तम् ॥ ६ ॥

लावण्यलक्ष्मीपरिभोगलुभ्यत्पुलोमजानेत्रचकोरपेयाः ।
मादृग्जनध्यानसमुद्रवृद्धिक्षमा दधानं वदनेन्दुभासः ॥ ७ ॥

तारामिषात्सन्ततगण्यमानै, रेखाभिराभिः खटिकामयीभिः ।
पूर्णं गुणौघैरधुनापि धात्रा, लाभादविभ्रान्तवतैव सीम्नः ॥ ८ ॥

कुकाल-पातालतलावमज्जद् वसुन्धरोद्धारधुराधुरीणम् ।
सूरीश्वरश्रीविजयादिदेवपट्टैकपूर्वाचलभानुमन्तम् ॥ ९ ॥

नाम्नैव धाम्नामनुरूपरूपं, सङ्क्रान्तमन्तर्गुणमावहन्तम् ।
सूरीश्वरं श्रीविजयादिसिंहं, स्तोतुं प्रवर्ते विजयाभिकाङ्क्षी ॥ १० ॥

भूपो भुनक्ति स्म विशालधामाऽयं मारुदेविर्मरुदेवनामा ।
तस्यैव नाम्ना प्रथितः पृथिव्यां, सद्धर्मकर्मव्यसनी स नीवृत् ॥ ११ ॥

यं वीक्ष्य साक्षान्नवदुर्गमुच्चैर्निवेदतो मैष मयि व्यराङ्क्षीत् ।
इतीव शम्भोर्भयतो भवानी, नव्यार्थकं तं नवशब्दमाह ॥ १२ ॥

दुर्गैरुदग्रैर्नवभिः परीतं निपीय यं किन्नरगीयमानम् ।
एकेन दुर्गेण सुमेरुणेन्द्रः स्वर्गेऽपि गर्वोद्धुरतां जहातु ॥ १३ ॥

फलं ददुर्यां समरावबुद्धयुध्यद्भटच्छिन्ननिजद्विपास्त्रैः ।
सम्पूजिता यत्र नवापि दुर्गाः, सिन्दूरपूरैः परपार्थिवानाम् ॥ १४ ॥

अधःकृतामेव दिशं स्वलक्ष्म्या, स्वयं विजेतुं पुनरप्युदास्ते ।
इत्युच्छ्रितैर्यो नवदुर्गहस्तैर्दिशो नवाह्वाय जिगीषतीव ॥ १५ ॥

नीतिर्नवीनेयमनीतिभावमपि स्फुटं यं व्यतिवृत्य वृत्ता ।
इदं न कस्य प्रणिगद्यमानं, विपश्चितश्चेतसि विस्मयाय ॥ १६ ॥

स्तुतिः क्षपाणामपि यत्र युक्त्या, पान्थप्रमोदात् पथि दूरदीर्घे ।
निलीय मेरौ वसतां तु निन्दा, कल्पद्रुमाणामुदरम्भरीणाम् ॥ १७ ॥

यो यत्र दोषः प्रतिभाति कश्चिन्निदर्शनत्वं किल निर्जलानाम् ।
सरस्वतीशालिजनाननेभ्यः स्तुत्येव विस्रस्तु गुणं तमेव ॥ १८ ॥

पचेलिमं पक्षिगणाः समन्तात्, क्षणं कणं ये निपुणं चणन्ति ।
यत्क्षेत्रसंरक्षकगोलवृष्टिकोलाहलात्ते पुनरुत्प्लवन्ते ॥ १९ ॥

चौर्यं परस्वेषु न नाम कामं, सौराज्यभाजि क्वचनापि यत्र ।
यद्धैर्यचौर्यात् सुदृशां निलीनश्चित्ते भियाऽनङ्गभटोऽपि सूक्ष्मे ॥२०॥

यद्यत्र भास्वान् प्रबलप्रतापो, जागर्ति मण्डोवरपार्श्वदेवः ।
उल्लस्यते तत्सुमनोभिरेभिस्तमोनिरासात्तपगच्छभाग्भिः ॥ २१ ॥

यद्भूर्भुवःस्वः प्रभुताभृताऽपि, स्वयं निवासाद् भृशमन्वकम्पि ।
स्वर्गेण यस्यास्तु कथं तदेकविभक्तिसारूप्यमुचैकशेषः ॥ २२ ॥

विधेर्विधेयेष्वरुचिप्रयुक्तं, वैषम्यमालोक्य बहुष्ववश्यम् ।
धर्मस्य सृष्टिं तपगच्छराजसाम्राज्यहेतोर्यमनुस्मरामः ॥ २३ ॥

फलार्थिनः श्रीफलवर्द्धिचैत्यं, यत्र श्रयन्तः फलसेविनो यत् ।
जना नवत्वं प्रथयन्ति यस्य, च्छायाभरभ्राजितया तदुच्चैः ॥ २४ ॥

मात्राधिकस्यापि कृतौ गुणश्चेद्, वर्णाधिकस्याधिकतोचितैव ।
धातुर्विधातुर्जगतोऽपि यत्र, मान्धातुरेवेत्यधिकः प्रयत्नः ॥ २५ ॥

आभ्यन्तरं यन्मणिवेश्मवृन्दज्योतिर्मयं ब्रह्म विदन्ति सन्तः ।
ततो विना वास्तविकस्वरूपं स्वर्जायते यस्य विवर्त एव ॥ २६ ॥

युद्धे च लक्ष्मीः किल येन वप्रवर्मावृताङ्गेन विलुण्टिता द्योः ।
इतीव यत्पूर्भयभङ्गलिङ्गं, शक्राख्यया ख्यातिमुपैति तस्याः ॥ २७ ॥

यच्चैत्यवातायनमौक्तिकेषु, स्वकान्तिविद्योतितदिङ् मुखेषु ।
इन्दिन्दिरौघाः परितो भ्रमन्तो, जपासुमभ्रान्तिभृतः पतन्ति ॥ २८ ॥

यत्रानिशं स्फाटिकजैनसद्मप्रभाप्रभावप्रहतान्धकारे ।
मृगीदृशामेव कुचेषु शेते, कस्तूरिका नाम कुहूर्निलीय ॥ २९ ॥

सदालिषु प्रीतिभरं दिशन्तो, दानेन संसर्पिकराभिरामाः ।
स्फुरद्गतिप्रीणितविश्वचित्ता, यत्र श्रिताः कुम्भिसमत्वमिभ्याः॥३०॥

यत्रापणश्रेणिषु शुभ्रभासो, मुक्ताफलानां प्रकराः स्फुरन्ति ।
श्रियः परीभोग (वशे) न जाताः, स्वेदोदलेशा इव तद्विभूनाम्॥ ३१ ॥

निजश्रियं येन हृतामवेत्य, दुखादियं द्योःकिमु मूर्च्छितैव ।
येनोपचीर्णा जिनवेश्मकेतुचेलाञ्चलं प्रेरितशीतवातैः ॥ ३२ ॥

यस्मिन् सभास्तारसभासमक्षं प्रासाददण्डोपरि चन्द्रबिम्बम् ।
जिगीषया द्यां प्रति दीर्घवंशविन्यस्तपत्रश्रियमादधाति ॥ ३३ ॥

यद्वेश्मनां च त्रिदिवौकसां च, द्वयोर्विवादो ववृते चिराय ।
अथानयोर्भङ्गजयौ तु भाव्यौ, विमानताख्या ध्वजधारणाभ्याम्॥ ३४ ॥

फणाभिरुच्चैः कपिशीर्षदम्भैर्यत्पाति शेषः किल वप्रवेशः ।
भोगावली विभ्रमतो नितान्तं, भोगीन्द्रलीलानिभृताद्भुतश्रि ॥ ३५ ॥

आलस्यभङ्गे सुरतान्ततान्तनारीकुचप्रच्युतदाममुक्ताः ।
विभान्ति यत्राभ्युदयाय नूनं, पुष्पेषुपूजाविधये विमुक्ताः ॥ ३६

श्रेणीभवत्सन्ततभूरिलोकसङ्घट्टतो यत्र चतुष्पथेषु ।
मुखेन्दुकान्त्या पुनरात्मजन्मकुचच्युतं दाम न वेद मुग्धा ॥ ३७

क्रान्तो वणिग्भिः सुमनोभिरेभिर्दध्वान यो दुन्दुभिनादधीरम् ।
राज्ञे श्रियं यत्र स एव सूते, चतुष्पथोऽब्धिः पुरुषोत्तमाय ॥ ३८

औचित्यभाजो द्रुपदात्मजावत्स्वस्वैरिणीभावकलङ्कमार्जी ।
भुवोऽनुरागः प्रतिभर्तृ यत्र, विभाति कश्मीरजपण्यवीथी ॥ ३९ ।

पीनीभविष्णोः पणितुः पुरस्तान्यस्तेन्द्रनीलद्युतिसङ्गतोऽपि ।
यत्रापणेष्वेणमदस्य मन्ये, मालिन्यमेवास्तु न गौरवाय ॥ ४० ।

सदाच्युतश्रीसहितस्य कामं, कर्पूरपूरोज्ज्वलफेनराशेः ।
सज्जीवनस्येह यदापणस्य, रत्नाकरत्वं भजमानमेव ॥ ४१ ।

यदापणन्यस्तसमस्तवस्तु-विक्रीयमाणं वणिजाऽ वलोक्य ।
वृथा कथासु प्रथिता कुलश्रीर्न कुत्रिका कैरपि बह्वमानि ॥ ४२ ।

यत्रेन्दुकान्तालयधोरणीभिर्जैवातृकज्योतिरुपासिताभिः ।
उच्चैस्तराभिर्भवभावभाग्भिः, सनिर्ज्झरामीयत शैलमाला ॥ ४३ ॥

वप्रेसु यस्मिन् विषमेषु वैरिजयाय पीनव्यवसायभाजः ।
शशाङ्कमौलेर्वलयायितोद्यद्भुजङ्गभूषा परिखा विभाति ॥ ४४ ॥

लङ्कामिवावेत्य पयोधिरेष, निषेवते यत्परिखैकवेषः ।
इदं तु चित्रं परवाहिनीनां, कदापि दत्ते न किल प्रवेशम् ॥ ४५ ॥

यद्वप्रपालीपरिखा विशेषादध्यक्षसंवित्त्रिपुटी किलैषा ।
युक्तं तदेतत्परतो ग्रहस्य, मीमांसकारुच्यपथा कथाऽपि ॥ ४६ ॥

यत्रोल्लसत्स्फाटिकसद्मकान्ति-दुग्धोदधिश्चन्द्रमसोऽर्भकस्य ।
पङ्कं रजःक्रीडनकं किमङ्कं, निःशेषमङ्गात् परिमार्ष्टि भूयः ॥ ४७ ॥

उन्मज्जदाविर्भवदात्मदोषो, यद्बिम्बचुम्बी परिखाजलेषु ।
मुधा यदाभाहरणापवादजिहासया दीव्यति दिव्यलोकः ॥ ४८ ॥

बभूव भूवल्लभतानिदानैर्गुणैर्गरिष्ठः सुकृतैकनिष्ठः ।
तत्रैव मान्धातृपुरीपरार्ध्ये, श्रीमान् महेभ्योऽनघमल्लनामा ॥ ४९ ॥

गुणैर्निजैर्दिग्जय-सूचनार्थममुष्य गौरीस्तनतुङ्गशैले ।
कस्तूरिकापत्रलतावितानैः, कीर्तिप्रशस्तिं व्यलिखद्विधाता ॥ ५० ॥

एतद्गुणैश्चन्द्रमरीचिगौरैर्यशःपटं यं कवयो वयन्ति ।
तेनावृताङ्गी भवतादिदानीं, सुद्यौर्मृगाक्षी मलिनाम्बरत्वक् ॥ ५१ ॥

अनेन सम्पूरयता जनानामाशां यशो यद्विशदं प्रसूतम् ।
अपूपुरत् कां न भृशं तदाशां, गुणो हि हेतोर्निजकार्यगामी ॥ ५२ ॥

श्वभ्रे बलिः प्रैष्यत विष्णुनेति, प्राचां न वाचामनुमोदना नः ।
ह्रियैव तद्दानगुणैर्जितः सन्नधो जगामेति तु नव्यतर्कः ॥ ५३ ॥

वनीपकानामिदमीयदाननीरस्रवन्त्या परिवाहितो यः ।
और्वानलस्य च्छलतः किलाब्धौ, दारिद्र्यवह्निर्ज्वलति स्फुटोऽयम् ॥५४॥

अपारिजातोऽपि वनीपकानामपूपुरत् कामितमर्थमेषः ।
सपारिजातस्तु विलज्जयातो, लीनालिनीलाननतां प्रपन्नः ॥ ५५ ॥

गुणेन दानस्य तुलामयासीद्-वृथाऽस्य किं कामगवी पशुः सा ।
एतद्विशेषश्रवणेन शश्वन्नोचेर्द्धियोत्तानमुखी कथं वा ॥ ५६ ॥

अहो भवस्यैव महान् व्ययोऽभूत्, सुपात्रपोषाद्विभवव्ययेन ।
भावे पुनस्तस्य विवर्धमाने, वरीवृधीति स्म विभाव एव ॥ ५७ ॥

ततः कृतार्था विबुधा अपीमे, कल्पद्रुमस्यापि न याचितारः ।
तदात्तदातृत्वगुणस्य तस्य, कष्टत्वमात्रं किल संविदानाः ॥ ५८ ॥

वेगप्रकर्षादतिलङ्घ्य विश्वं, पदं प्रसर्तुं न ददे पुरो यत् ।
मन्तोस्ततस्तद्वचसाऽपि तेने, सप्ताम्बुधीनामपि कण्ठरोधः ॥ ५९ ॥

प्रकामवन्ध्याचल-साधुसेवाहेवाकिभावादवदातकीर्त्तेः ।
अनेकपस्यास्य न कस्य शस्यानिर्गलं दानजलप्रवृत्तिः ॥ ६० ॥

श्रीदः श्रिया निर्जित एव तेन, महेश्वरश्चेश्वरतागुणेन ।
अतस्तयोस्तज्जयकाङ्क्षिणोः किं, मिथः सुहृद्भावरसार्द्रमन्तः॥ ६१ ॥

पुरन्दरो गोत्रभिदेव देवः, श्रीदोऽपि नाम्ना स कुबेर एव ।
ताभ्यामनेनेव तु निष्कलङ्कं, लब्ध्वापि लक्ष्मीश्चिरमन्वशीलि॥ ६२ ॥

अस्थैर्यमौज्झच्चिरमस्य लक्ष्मीरेतद्गुणौघैर्घनयन्त्रितेव ।
दान्ता महद्भिर्नहि नाम काममुच्छृङ्खलाश्चापलमाचरन्ति ॥ ६३ ॥

विमानलक्ष्मीपरिभोगतोऽस्य, समानता चेन्न पुरन्दरस्य ।
तदेतदौपम्यकथाप्रथायामभेद एवास्तु परं निदानम् ॥ ६४ ॥

विद्याभिरेतस्य जितोऽधितस्थौ, पुनः कविर्यल्लघुलेखशालाम् ।
ततस्तदीयाध्ययनार्थपूर्वाभ्यासाय ताराः खटिकात्वमीयुः ॥ ६५ ॥

दयैव तेनान्तरधारि जीवे, यतो भयं भेजुषि भूरिधाम्ना ।
तदीयविद्याविभवस्य नाभूत् कला तु षोडश्यपि जातु काव्ये ॥ ६६ ॥

विद्या गुरोरेव हठाद् गृहीताश्चतुर्दशाऽप्यस्य मुखे विलेसुः ।
अतो लघूभूत इवैष चित्रं, व्योमाङ्गणे स प्रतिबम्भ्रमीति ॥ ६७ ॥

अनाश्रितेऽस्मिन्न महत्त्वभाजां, वाचामहम्पूर्विकयेति बुद्ध्या ।
एनं श्रिताभ्यां सुदृढं किमाभ्यां, श्रीभारतीभ्यां मुमुचे विरोधः॥ ६८ ॥

प्रकम्प्यमानो जगदे स्वयं यो, मेरुर्नमेरुर्जगदीश्वरेण ।
धीरस्तु तेनास्तु कथं सुवर्णाचलस्य मुख्यस्य तुलाऽप्यमुष्य ॥ ६९ ॥

मुख्यो महेन्द्रो व्यलसत्किलायं, शक्रः पुनस्तत्प्रतिबिम्बमात्रम् ।
इदं विशिष्यापरिचीय तत्त्वं, विपर्ययभ्रान्तिरहो जनानाम् ॥ ७० ॥

इतः समुद्रादुदपद्यतोच्चैर्यशः शशी यत्किल निष्कलङ्कः ।
सरस्वतीशालिनि तत्र जाते, निष्कम्पभावस्य विजृम्भितं तत्॥ ७१ ॥

स्वरूपलक्ष्म्यैव हि भस्मभूयमनेन नेतुं सुशकः स कामः ।
अतोऽस्य मन्ये भवमन्युवह्निदाहप्रयासः किल फल्गुरेव ॥ ७२ ॥

द्रष्टुं किमासीन्मघवाऽस्य रूपं, विस्फारितस्फारसहस्रनेत्रः ।
गातुं गुणानेव किमेतदीयान्, सहस्रजिह्वोऽपि सहस्रजिह्वः ॥ ७३ ॥

सतीव्रतोच्छेदभियानुदीतरोमाञ्चराजिः कथमद्य गौरी ।
श्रुत्वा सचिन्तोऽस्य न कीर्तिकान्ती, प्रमोदमङ्गैर्विवरीतुमीशः॥ ७४ ॥

कस्तूरिकापङ्किलसूर्यचन्द्रतुङ्गस्तनी किं रिपुदुर्यशोभिः ।
अशोभि नैतस्य यशोभरैर्द्यौः, कर्पूरपूरेण करम्बिताङ्गी ॥ ७५ ॥

यद्भास्वताऽनेन तमः समस्तं, निरस्यते स्मानुदिनोदितेन ।
कथं न तेनास्तु सतां सुवर्त्मगतेर्निदानं विजयप्रकाशः ॥ ७६ ॥

सन्त्यज्य जाड्यं बहु चापलञ्च, यच्छैशवं तेन न बह्वमानि ।
इतीव तद्यौवनसीम्नि भक्ते रोमोद्गमो रोषवशाज्जगाम ॥ ७७ ॥

व्यशीशिषद्रूपमथास्य लास्यं, वयः स्मयस्मेरतरस्मरस्य ।
बाल्यात्परं नाम तथा यथोच्चैर्भानुप्रभा सौरभमम्बुजस्य ॥ ७८ ॥

अचूचुरच्चामरभासमस्य, केशोच्चयश्चामरभासमस्य ।
वने निवासं चमरी च लेभे, विपर्ययं किन्न गतिश्च लेभे ॥ ७९ ॥

भवं समासेव्य किलैतदास्यसायुज्यभाजं द्विजराजमापुः ।
तदानुचर्योचितकर्मयोगाद्, द्विजा अपीमे ननु किन्न मुक्ताः ॥ ८० ॥

पुरो मुखस्यास्य वृथैव भूतमसौ कलङ्कीति यदावधत्ते ।
धत्ते तदा नाम विधौ स वेधा, सन्तक्षणीं दारुणराहुदंष्ट्राम् ॥ ८१ ॥

जेतुं जगद्यस्य दृशैव शक्यं, मुखस्य तस्यास्तु न किं विशेषः ।
इदं जडात्मा सहसाऽविचिन्त्य, वृथा विधुः स्पर्धति दुर्विनीतः॥ ८२ ॥

स्वकान्तिमित्रस्य स एव शश्वत्सङ्क्रम्यमाणां गुणसङ्क्रमेण ।
सुवर्णशैलस्य गतां शिलासु, विशालतां नो वपुषाऽपुषत्किम् ?॥ ८३ ॥

अस्य द्विषद्गोत्रविखण्डनेन, भेजे भुजाभ्यां पविना जयश्रीः ।
तेनैव दर्पश्चिरमेतयोः किं, विस्तारयुग्मांसलतां ततान ॥ ८४ ॥

स मांसलांसद्वितये करीन्द्रः, स केसरी चाजनि मध्यदेशे ।
अहो तमासाद्य कुतोऽपि हेतोर्विरोधिनोरप्यगलद्विरोधः ॥ ८५ ॥

निर्वेदतः किं तपसे सिषेवे, वनं न रक्तोत्पलपल्लवाभ्याम् ।
तदीयपादद्वयनिर्जिताभ्यां, प्रतिक्षणात्क्षीणविपल्लवाभ्याम् ॥ ८६ ॥

सीमा किमस्मिन्निजकौशलस्य, सम्भूय भूयः स्मरयौवनाभ्याम् ।
समापि लावण्यविधाविधानात्, कुतोऽन्यथा हीदृशरूपसृष्टिः ॥ ८७ ॥

गलन्निमेषञ्च निरन्तरञ्च, तद्दर्शनादर्शनतृप्त्यतृप्ती ।
स्वर्जन्मनः काभिरहो सुरीभिर्निन्दास्तुती कारयतः स्म नोच्चैः॥ ८८ ॥

कथन्न चक्षुःश्रवसां वधूनां, शुश्रूषया चास्य दिदृक्षया च ।
सम्पूर्यतामेकतरोपयोगव्यग्रासमग्राक्षमिथः प्रवृत्त्या ॥ ८९ ॥

क्व योग्यताऽस्मासु किलास्य योगे, कृतार्थता वा नयनोपभोगे ।
इत्थं न काभिर्मनुजाङ्गनाभिर्विसिस्मिये वा हृदि सिस्मिये वा॥ ९० ॥

तन्त्रात् प्रयोगात् किल किन्नरीणां, सङ्गीततानाहिततद्गुणानाम् ।
प्रियैः शशाङ्के रसपेशलिम्ना, न मूर्च्छनाग्रामजमूर्च्छनेति ॥ ९१ ॥

सर्वाङ्गशैत्यप्रणयि प्रकामं, गन्धर्वगानं मधुरा सुधेति ।
पुलोमजालोमनि शस्यहृष्यत् शक्राय तं किन्न विनह्नुते स्म ॥ ९२ ॥

उद्वेलमुत्सर्पति यौवनाब्धौ, प्रद्युम्नराजाभ्युदयेन तस्य ।
मानैर्मनोभिर्ननु मानिनीनां, मज्जद्भिरुत्प्लुत्य गतिं न तेने ॥ ९३ ॥

जगन्ति जेताऽपि मनस्विनीनां, चेतश्चलं लक्ष्यमवेक्ष्य-कामः ।
अमोघशक्तिं किल तं युवानमासाद्यमाद्यत्तममानसोऽभूत् ॥ ९४ ॥

तं युवानमनुवीक्ष्य पुरन्ध्री, दुःखमज्जितमनावृति-कृत्ये ।
आशयाऽपि कृशयौवनिकाऽभूत्, तां विहाय किल नायकदेवीम्॥९५॥

अथ कथमपि योग्यतावमर्शव्यतिकर-संशयपारगस्य धातुः ।
मनसि पदमियं भृशं कृशाङ्गी समधृत नायकदेव्यपीह कार्ये ॥ ९६ ॥

इमां कथञ्चित्परमाणुमध्यां, मनो विधेर्यत्परमाणु दध्रे ।
तत्कल्पनीयः किल कोऽपि तस्यां, संयोगयोग्यप्रतियोगिभावः॥ ९७ ॥

श्रियमिव हरिणा हरेण गौरीं, सुरपतिनेव पुलोमजां प्रगल्भः ।
अथ महति महे महेभ्यपुत्रीं, ध्रुवममुना सहतां स संयुयोज ॥ ९८ ॥

विहितसदृशयोगख्यातकीर्तिर्विरञ्चिः,
किमपि कपिसरूपं चापलं चापलप्य ।
शुचिरजनि स योग्यायोग्ययोगप्रयुक्तं,
निजमखिलकलङ्कं मार्जयन्नार्जवेन ॥ ९९ ॥

उद्गतेन तमसोऽवधीरणाद्, यौवनोदय-समृद्धिशेवधिः ।
विश्वविश्वजननेत्रकौमुदी, सा व्यराजत कलावताऽमुना ॥ १०० ॥

भानोः प्रभेव सविधं परिशीलयन्ती,
तस्य प्रकाशवदना पुरुषार्थभाजः ।
सा दिद्युते प्रतिदिनं समुदित्वरश्री-
र्विश्वत्रयीमृगदृशां विजयावदाता ॥ १०१ ॥

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रौढिं प्रौढिमधाम्नि जीतविजय-प्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजय-प्राज्ञोत्तमानां कृतौ,
शिष्यस्यादिमसर्ग एष विजयोल्लासे रसोल्लासभूः ॥ १०२ ॥

## द्वितीयः सर्गः

युवनेत्रविलासि यौवनं, शुचिवंशोचितशीलशालिता ।
चिरमेतदभूदिहोभयं, सुधियः कस्य न विस्मयावहम् ॥ १ ॥

अतनोरनुमीयते कृतिर्न तु सामान्यविधेर्विधेरियम् ।
न विशेषविधिर्विधीयते, किमु सामान्यविधिं विधूय वा ॥ २ ॥

पुरुषोत्तममेनमाश्रितां, शुचि-श्रृङ्गारसुधार्णवोद्भवाम् ।
नयने विनिवेशितामिमां, न विदुः के भुवि काञ्चनश्रियम् ॥ ३ ॥

अनया विजिताः सुराङ्गना, भृशदुःखादिव रूपसम्पदा ।
अनिमीलितनेत्रसम्पुटा, नियतं निश्यपि नैव शेरते ॥ ४ ॥

परिणामसहायनामभाक्, तरुणी (सा) तरुरेव निश्चिता ।
जडतां दधती ह्रियार्पितां, ननु रम्भाऽपि तदीक्षणार्जिताम् ॥ ५ ॥

प्रथिता किल सा तिलोत्तमा, कथमस्याः पुरतस्तिलोत्तमा ।
अनया हि समानताऽप्यहो, स्वविशिष्टां मुमुचेऽनुवीक्ष्य यत् ॥ ६ ॥

रतिरेतु रतिं न कर्हिचित्, कथमस्यास्त्वियता विजिष्णुता ।
उचितं कलयामि तज्जिता, रतिरेवान्तरिता तदेव नु ॥ ७ ॥

भयतो महतस्तया जिता, दयिताद्धाङ्गसयुग्भवान्यभूत् ।
द्विजराजकरावमर्शनैः, सतताश्वासनभाजनीकृता ॥ ८ ॥

य इमां भुवनातिशायिनीमकरोदेष करो हि दक्षिणः ।
इतरास्तु करोति यः पुनर्ननु वामः स विधेर्विलक्षणः ॥ ९ ॥

चिकुरैः सह सख्यमातनोद्, ध्रुवमस्याः सुकृताय चामरम् ।
पदवी न दवीयसी कथं, नृपमान्या पशुजन्मनोऽन्यथा ॥ १० ॥

सकला कचपाशचुम्बिनी, न कलापेऽनु कलापिनः कला ।
सकलाकलिताद्धचन्द्रको, मुखचन्द्रोपरि सञ्चरः परः ॥ ११ ॥

अवधाय विधेर्विधेयतामिह चण्डीशजयार्थमात्मनः ।
कुसुमानि शरान्न्यधत्त तत्कबरीमण्डलसन्निधौ स्मरः ॥ १२ ॥

अनया मदनो भवं जयन्, स्वजिघांसुं कृतवैरशोधनः ।
तदयं जयसूचनाय तत्कबरीं सत्कुसुमैरपूजयत् ॥ १३ ॥

इदमाननराजराज्यतः, कचरूपं स निबध्यते तमः ।
तदमुख्यविमुक्तियुक्तिमानथ मल्लः करदानमर्हतु ॥ १४ ॥

चिकुरालिमयीं नु तामसीं, पथि सीमन्तमये स्थितः स्मरः ।
जनमोहकृते समस्मरत्, कृतसिन्दूरसमर्चनाविधिः ॥ १५ ॥

कविभिः क्रियतां विशालतद्विलसद्भालविभानिभालनात् ।
रजनीकरकष्टमष्टमीरजनीमण्डनखण्डनं तपः ॥ १६ ॥

मदनस्य चतुर्भुजात्मनो, धनुरीशः स मुधा द्विधाऽकरोत् ।
जनयन् स हि तत्तु तद्भ्रुवौ, युगपत् तौ निजघान दम्पती ॥ १७ ॥

त्रिजगज्जयसावधानताप्रधनौद्धत्यविलम्बितत्यजः ।
मदनस्य धनुर्हि तद्भ्रुवौ, नियतं न श्रवणान्तिकत्यजौ ॥ १८ ॥

इदमीयदृशौ हि पक्ष्मले, मदनोन्मादविघूर्णिते इव ।
रवि-बोधित-चारुकेसर-प्रथिताम्भोज-विडम्बिडम्बरे ॥ १९ ॥

श्रुतिगामितदीयनेत्रयोर्न बुधो विप्रतिपद्यते स्मरः ।
वदनास्थितरङ्कुसङ्ग्रहान्ननु राज्ञोऽपि कलङ्कितोचिता ॥ २० ॥

इदमीयदृशा बलस्य तच्छ्रवणान्दोलनलोललीलया ।
नियतं सहचारिणो मधोर्मधुमित्रस्य हि तद्विजृम्भितम् ॥ २१ ॥

श्रयतां शशिनस्तदाननासहनं तद्वदनश्रिया जितः ।
अधुना तु धुनातु नातुरो, हरिणः पङ्क्तयार्जितायशः ॥ २२ ॥

भजते हरिणो द्विजाधिपं, न तु देवञ्च विधिं सरोरुहम् ।
इदमीयदृशा हृतश्रियोर्नहि निर्भीकतयानयोः स्थितिः ॥ २३ ॥

मृगखञ्जनपङ्कजान्यहो, वनमेतानि सुखं विषेहिरे ।
स्फुरदायततद्दृशोः पुरो, न पुनः स्थातुमिमैरसह्यत ॥ २४ ॥

कुसुमानि शराः स्मरस्य ते, हरकोपाग्निहुतास्तथोचितम् ।
इयमेव जगज्जयाय यन्निशितान् दृष्टिशरान् व्यतीतरत् ॥ २५ ॥

विजितं किल पङ्कजं तया, चकिते प्रत्युत तद्विलोचने ।
तदिहात्र विदाञ्चकार को, न बुधः स्यादभिदामिदं तयोः ॥ २६ ॥

मदनस्य तदीयनासिकाततवंशोपरि भालपट्टके ।
त्रिजगज्जनमोहदायिनः, सततं नृत्यविधिर्व्यजृम्भत ॥ २७ ॥

अमृतस्य विधोस्तदाननीभवतः साधु पदं किलाधरौ ।
उदजीव्यत तौ विधापयद्भवनेत्राग्नि हुतोऽपि मन्मथः ॥ २८ ॥

उचितं मदनाय तत्प्रियाधरबिम्बीफलढौकनं मधोः ।
कुसुमप्रसरच्छरव्यये हरगौर्यौ फलतो जिघांसते ॥ २९ ॥

सुषमासु परीक्षणक्षणे, विधिना कल्पिततोलनाविधौ ।
अधरे किल तत्र गौरवं, न तु बालोद्गतविक्रमे श्रिया ॥ ३० ॥

इदमीयमनातपाशया, हरकोपानलहेतितापवान् ।
अधरं समशिश्रियत् स्मरः, स बहुव्रीहिंधियेव विक्रमम् ॥ ३१ ॥

उचितः किल विद्रुमेऽधरे, प्रथितोऽस्याः स्मरतापनातपः ।
ननु चित्रमितः समेधते, न तु शृङ्गाररसः प्रशुष्यति ॥ ३२ ॥

नितमामिदमीयपाटलाधरबिम्बेन शुचिस्मितस्पृशा ।
अपि कोकनदं व्यडम्बि तत्, कलितं बालमराललीलया ॥ ३३ ॥

स्मितविस्मितकेतकीदलै-रिदमीयाधरबिम्बचुम्बिभिः ।
मदनस्य जगज्जिगीषतोऽप्युचिता पुष्पफलोपनम्रता ॥ ३४ ॥

कथमेतदिदं शुभाधरामृतनिस्यन्दविलास्यपि स्मितम् ।
युवभिर्निजनेत्रपद्मिनी दलपीतं हृदयान्यमूमुहत् ॥ ३५ ॥

वयसा शिशुतोत्तरेण यत्तदधिष्ठातृकनिष्ठया स्थितम् ।
मदनः सदनोदयाय तत्स्मितदुग्धैस्तदसिच्यतोचितम् ॥ ३६ ॥

शुचितत्स्मितनिर्झरापगासलिलस्नानविलासिनो द्विजाः ।
द्विजराजतहास्यसङ्गतो विषमुक्ताः शुचयो विरेजिरे ॥ ३७ ॥

व्यलसन् दशनास्तदानने, द्व्यधिकास्त्रिंशदहो महोज्ज्वलाः ।
शशिनो द्विगुणां श्रियं निजां, किमु संसूचयितुं धृताः कलाः ॥ ३८ ॥

किमु तद्वदनस्य नो विधौ, पुरतोऽयुज्यत भस्मगोलता ।
गलनालबिलात् किलाचिरात्, तमसां रूक्षतयाऽशितोज्झिते ॥ ३९ ॥

द्रुहिणेन तदास्यसृष्टये, हृतसर्वस्वतया सुधाम्बुधौ ।
उदभूदिह पङ्कसङ्करः, शशिनि श्यामललाञ्छनच्छलात् ॥ ४० ॥

अदसीयमुखं विधित्सुना, विधुतःसारमकर्षि वेधसा ।
लघुभूत इवेति सोऽन्वहं, भ्रमति व्योम्नि चिराय तूलवत् ॥ ४१ ॥

द्विजराजकलङ्किनो जयादकलङ्केन तदाननेन ते ।
उचितैव न खेदवेदना, स्थितिरेषा हि पुरातनी श्रुता ॥ ४२ ॥

विधुरङ्कमृजाकृतेऽन्वहं, किमु तक्ष्णोति तनूमहो निजाम् ।
न तदाननतुल्यताऽस्य ही, भवितादर्शनमेवमास्यतः ॥ ४३ ॥

इदमीयमुखं हि वस्तुतो, द्विजराजो विधुरेष चेतरः ।
तदमुष्य हठेन तच्छ्रियं, हरतः स्तैन्यकृतं हि नायशः ॥ ४४ ॥

य इहाश्रययोः परस्परामसमावेशनिदेशपेशलः ।
व्यगलत् स कलिस्तदाननं, विधुमासाद्य सरस्वतीश्रियोः ॥ ४५ ॥

सकलोऽपि स पाप एव तद्वदनस्पर्धनलोलुपो विधुः ।
इति साधु विमृश्यते बुधैर्वितथानुग्रहविद् व्यवस्थितिः ॥ ४६ ॥

स विधिः शुचिपूर्वपक्षताभ्रमतः पूरयति स्म किं विधुम् ।
किमयं न समाप्स्यति स्वयं, स्मृतसिद्धान्ततदाननाद् गलन् ॥ ४७ ॥

मदनस्य तनोस्तदा श्रियं, भवभालाग्निहुतेः फलं विदन् ।
इदमास्यपदाय चन्द्रमा, रविवह्नावजुहोत् तनूं निजाम् ॥ ४८ ॥

इदमास्यमवेक्ष्य वेधसा, शशभृद्यत्र विलुप्यते क्रुधा ।
शुचि पक्षमुपैति तं न हाऽशुचिमन्यञ्च विशेषदर्शनः ॥ ४९ ॥

नलिनं मलिनं किलालिना, रजनीशोऽपि कलङ्कपङ्किलः ।
इदमीयमुखे निषेदुषी, सुषमाऽऽस्ते कथमेतयोस्ततः ॥ ५० ॥

इदमास्यतुलाभिलाषितातम एव द्विजराजि लाञ्छनम् ।
भवमौलिसुरापगाजलैर्निरयाद्यज्जलधेस्तु कर्दमः ॥ ५१ ॥

अतिकान्तमिदं मुखं सृजन्, किमु दृग्दोषमृजाकृते विधिः ।
बलियोग्यकरम्भपिण्डकं, विधुरूपं स वियत्युदक्षिपत् ॥ ५२ ॥

विधुमेव सुरापगाम्बुजं, चितमन्तर्धृतलाञ्छनालि सत् ।
इदमाननचन्द्रतर्ज्जितं, कलयामः किल हीनकान्तिकम् ॥ ५३ ॥

पुरतो न तदाननस्य किं, विधुरिङ्गाल इवावलोक्यते ।
उचितं त्विदमन्यथा कुतो, मितकान्तिस्तमसस्तमश्नतः ॥ ५४ ॥

इदमीयमुखाम्बुजोल्लसत्, सुषमाडम्बरपश्यतोहरः ।
विधिना विधुरेष ही कुहूमुखदंष्ट्रामयचक्रचूर्णितः ॥ ५५ ॥

किमगोचरितः कुहूनिशि, प्रयतो मन्त्रमसावपीपठत् ।
यदवाप तदाननोपमां, विधुरुच्चैरिह तत्प्रसादतः ॥ ५६ ॥

त्रिजगद्रुचिरातिशायि तद्, विधुनावापि तदाननं पदम् ।
सुकृताय तमोमदाङ्कुरक्रकचच्छिन्नतनुर्ममार यत् ॥ ५७ ॥

शुचितद्वदनात्तवैभवो, द्विजराजोऽपि स हीनवैभवः ।
उचितां ननु कान्तिभिक्षुकः किमटन् माधुकरीमचीचरत् ॥ ५८ ॥

धुरि कान्तिमतां तदाननं, विदितं क्वानुकरोतु चन्द्रमाः ।
मिहिरादिह जातदीधितिः, स कुहूपर्वणि भैक्षदायिनः ॥ ५९ ॥

इदमाननपुष्टये विधिः, कणशं कान्तिमयं पचेलिमम् ।
स लुलाव विधुं पृथक्कृतप्रपतच्छीर्णकणोरुतारकम् ॥ ६० ॥

इदमाननकान्तिचौर्यतस्त्रपमाणेव जनापवादतः ।
जननीव विधुं सुरेन्द्रदिग्, रविभित्त्यैव जनाय निह्नुते ॥ ६१ ॥

द्विजराज इवैतदाननात्, सुषमाद्वैतरुचोऽध्यगीषत ।
उचितं विधुपङ्कजादयस्त्रिजगल्लोचनशोकमार्जिनः ॥ ६२ ॥

इदमाननकारिणं करं, विधुना प्रोञ्छति यत्स्म पद्मभूः ।
इति तत्र रुचीरपप्रथत्, सविशेषोऽपि तदंशशेषजः ॥ ६३ ॥

नयनाम्बुरुहे तदाननाच्चकिते सुप्रथिते ततोऽपि किम् ।
विधुता विधुता पुरातनी, यदनेनेह कलङ्कपङ्किला ॥ ६४ ॥

अधरे विधुना सुधारसः, श्वसिते सौरभमम्बुजन्मना ।
निजसारहितं तदानने, किमु सख्यप्रथनाय नाहितम् ॥ ६५ ॥

– अपूर्णमिदं महाकाव्यम्

# ॥ श्रीविजयप्रभसूरिस्वाध्यायः ॥

श्रीविजयदेवसूरीशपट्टाम्बरे, जयति विजयप्रभसूरिरर्कः ।
येन वैशिष्ट्यसिद्धिप्रसङ्गादिना, 'निजगृहे योग-समवाय-तर्कः॥ १ ॥

ज्ञानमकं भवद् विश्वकृत् केवलं, दृष्टबाधा तु कर्तरि समाना ।
इति जगत्कर्तृलोकोत्तरे सङ्गते, सङ्गता यस्य धीः सावधाना २

ये किलोपोहशक्तिं सुगतसूनवो, नातिशक्तिं च मीमांसका ये ।
संगिरन्ते गिरं ते यदीयां नयद्वैतपूतां प्रसह्य श्रयन्ते ॥ ३ ॥

कारणं प्रकृतिरङ्गीकृता कापिलैः, क्वापि नैवाऽऽत्मनः काऽपि शक्तिः
बन्धमोक्षव्यवस्था तदा दुर्घटेत्यत्र जागर्ति यत्प्रौढशक्तिः ॥ ४ ॥

शाद्विकाः स्फोटसंसाधने तत्परा, ब्रह्मसिद्धौ च वेदान्तनिष्ठाः ।
सम्मति-प्रोक्तसङ्ग्रहरहस्यान्तरे, यस्य वाचा जितास्ते निविष्टाः ५

ध्रौव्यमुत्पत्तिविध्वंसकिर्मीरितं, द्रव्यपर्यायपरिणतिविशुद्धम् ।
विस्रसायोगसङ्घात-भेदाहितं, स्वसमयस्थापितं येन बुद्धम् ॥ ६ ॥

इति नुतः श्रीविजयप्रभो भक्तितस्तर्कयुक्त्या मया गच्छनेता ।
श्रीयशोविजयसम्पत्करः कृतधियामस्तु विघ्नापहः शत्रुजेता ॥ ७ ॥

## ॥ श्रीविजयप्रभसूरिक्षामणकविज्ञप्तिः ॥

स्वस्ति श्रियां चारुकुमुद्वतीनां, विधुः समुल्लासविधौ जिनेन्द्रः ।
श्रीअश्वसेनक्षितिपालवंशस्वर्गाचलस्वर्गतरुः श्रिये वः ॥ १।१ ॥

स्वस्ति श्रियं यच्छतु भक्तिभाजामुद्दामकामद्रुम-सामयोनिः ।
धर्मद्रुमारामनवाम्बुवाहः, सुत्रामसेव्यः प्रभुपार्श्वदेवः ॥ १।२ ॥

स्वस्ति श्रियामाश्रयमाश्रयामः, स्वनाममन्त्रोद्धतभक्तकष्टम् ।
सुस्पष्टनिष्टङ्कितविष्टपान्तविवर्तिभावं जिनमाश्वसेनिम् ॥ १।३ ॥

स्वस्ति श्रियां गेहमुदारदेहं, मरुन्महेलाभिरखण्डितेहम् ।
अपासितस्नेहमहेयभावं, पार्श्वं महेशं व्रतिनां श्रयेऽहम् ॥ १।४ ॥

स्वस्ति श्रिये स प्रभुपार्श्वनाथः, कृतप्रसर्पद्दुरितप्रमाथः ।
यन्नाममन्त्रस्मरणप्रभावात्, प्रयान्ति सद्यो विलयं भयानि॥ १।५ ॥

प्रसीदतु प्रत्नसमीहितार्थः, पार्श्वः सतां ध्वस्तसमस्तपापः ।
नीरन्ध्रधाराधरनीरधाराविधौतविन्ध्याचलचारुकान्तिः ॥ १।६ ॥

गभस्तिवद् ध्वस्ततमःप्रतानः, कल्पद्रुवत् कामितदानदक्षः ।
अमुद्रगाम्भीर्यनिधानमुद्रः, समुद्रवत्पार्श्वजिनोऽवताद् वः॥ १।७ ॥

विद्येव मुद्राऽजनि यस्य चित्रा, मुद्रेव कान्तिः परमा पवित्रा ।
दिग्व्यापिनी कान्तिरिवोरुकीर्ति, पार्श्वो जगत् सोऽवतु पुण्यमूर्तिः १।८

सेवां मुखस्याब्जधिया विधातुं, समागतं हंसयुवद्वयं किमु ।
यस्यालसच्चामर-युग्ममुच्चैः, पार्श्वः स वः पुण्यनिधिः पुनातु १।

स्तवीमि तं पार्श्वजिनं यदीय-पादाग्रजाग्रन्नखरत्नदीपम् ।
स्थातुं रजन्यामपि नावकाशं, तमःसमूहो लभते कदापि १।१० ॥

पिपर्ति स्फूर्तिमन्मूर्तिः कामं वामासुतः सताम् ।
प्रययुः स्वर्द्रुमा दूरे यद्वदान्यत्वनिर्जिताः ॥ १११ ॥

धीरा ! धीराजमानं तं श्रयध्वं पार्श्वमीश्वरम् ।
कुरुते यत्प्रतापस्य नूनं नीराजनां रविः ॥ ११२ ॥

पार्श्वो जयति यत्कीर्त्तेरुच्छिष्टमिव चन्द्रमाः ।
अत एव पतङ्गस्याऽऽपततो याति भक्ष्यताम् ॥ ११३ ॥

पार्श्वो जयति गाम्भीर्यं गृहीतं येन वारिधेः ।
ततः शिष्टानि रत्नानि भीतोऽसौ किमधो दधौ ॥ ११४ ॥

श्रिये पार्श्वः स वो यस्य क्षमाभृत्त्वगुणोऽखिलः ।
लक्ष्मव्याजादतः शेषस्तल्लाभाय यमाश्रितः ॥ ११५ ॥

मनः सरोवरेऽस्माकं पार्श्वो नीलोत्पलायताम् ।
यद्धैर्य-सख्यतो मेरुरुच्चैर्मूर्धानमादधे ॥ ११६ ॥

मच्चित्तनन्दने पार्श्वः कल्पद्रुरिव नन्दतु ।
हतं सप्तजगद्ध्वान्तं यदीयैः सप्तभिः फणैः ॥ ११७ ॥

वन्दारु-सुरकोटीररत्नांशु-स्नपितक्रमः ।
नेदीयसीं जगद्वेदी कुर्यात् पार्श्वः शिवश्रियम् ॥ ११८ ॥

यः करोत्येव पापानां कलावपि बलात्ययम् ।
महानन्दाय तं श्रीमत्पार्श्वं वन्दामहे वयम् ॥ ११९ ॥

तमीदृशोदारपवित्रचित्र-चरित्रसन्त्रासितशत्रुवर्गम् ।
अनर्गलस्वर्गसुखापवर्ग-निसर्गसंसर्ग-समर्थमग्र्यम् ॥ १२० ॥

सुरद्रुचिन्तामणिकामकुम्भस्वर्धेनुवर्गादधिकप्रभावम् ।
समुल्लसल्लब्धिसमृद्धिपूर्णं, सदा चिदानन्दमयस्वभावम् ॥ १२१ ॥

जगद्दृगाप्यायककान्तिकान्तं, संसेवितोपान्त्यममर्त्यवृन्दैः ।
श्रीअश्वसेनान्वयपद्महंसं, श्रीपार्श्वनाथं प्रणिपत्य मूर्ध्ना॥ १२२ ॥

चिरकालगुरूपान्ते परिशिक्षितलक्षणः ।
उच्चैर्घोषादिवाम्भोधिर्लक्ष्यते घर्घरस्वरः ॥ २१२३ ॥

प्रसह्य जगृहुर्देवा रत्नान्यब्धेरसौ ततः ।
तद्भिक्षां याचते यत्र विततोर्मिकरः किमु ॥ २१२४ ॥

दृष्ट्वा क्षुभ्यति यत्राब्धिर्घटप्रतिभटस्तनीः ।
शङ्कमान इव स्वस्य घटोद्भवपराभवम् ॥ २१२५ ॥

नार्यो हारेषु रत्नानि दधते चाधरे सुधाम् ।
यद्गताः स्वपदं सिन्धुः किमित्यावेष्ट्य तिष्ठति ॥ २१२६ ॥

अब्धिसङ्गतया शुभ्रभासा स्फटिकवेश्मनाम् ।
सदैव लक्ष्यते यत्र गङ्गासागरसङ्गमः ॥ २१२७ ॥

अप्येकमिन्दुमुद्वीक्ष्य स्यादब्धेरुत्तरङ्गता ।
नारीमुखेन्दुकोटीभिर्यत्र सा वचनाऽतिगा ॥ २१२८ ॥

नानेन महता सार्द्धं स्पर्धा युक्तेति चिन्तयन् ।
यस्मै किमब्धिरागत्य ददौ दुहितरं निजाम् ॥ २१२९ ॥

यत्र भान्ति गरीयांसः प्रासादाः पर्वता इव ।
शृङ्गाग्रसञ्चरन्मेघघटाघटितविस्मयाः ॥ २१३० ॥

चैत्यस्फटिकभित्तीनां शुभ्रैः प्रसृमरैः करैः ।
वर्द्धमानेक्ष्यते यत्र तिथिष्वेकैव पूर्णिमा ॥ २१३१ ॥

दृष्ट्वा स्वर्णघटान् यत्र चैत्यचूलावलम्बिनः ।
मन्यन्ते स्वःस्त्रियो मुग्धाः शतसूर्यं नभस्तलम् ॥ २१३२ ॥

यत्प्रासादोच्चदेशेषु प्रच्छन्नस्वप्रियाधिया ।
आश्लिष्यन्ति सुराः स्नेहविशालाः शालभञ्जिकाः ॥ २१३३ ॥

भान्ति यत्र स्त्रियः श्रोणि-नवलम्बितमेखलाः ।
दृश्यन्ते जातु ? नो दोषानवलम्बितमे खलाः ॥ २१३४ ॥

दधते सुधियो लोका न यत्रासारसाहसम् ।
कुर्वते द्युसदां दीना न यत्रासारसाहसम् ॥ २१३५ ॥

यत्र व्ययो दिनस्यासीन्न वेत्यरुचिराजित: ।
यद्वने स्वर्जनो नासीन्नवेत्यरुचिराजित: ॥ २१३६ ॥

तत्र त्रस्तकुरङ्गशावकदृशां नेत्राञ्चलै: पूरित-
स्मेराम्भोरुहतोरणस्पृहगृह-स्वेच्छापरैर्नागरै: ।
शोभाशालिनि सज्जनादृतलसच्छार्दूलविक्रीडित-
क्रीडासज्जकविप्रपञ्चितगुणे श्रीद्वीपसद्बन्दिरे ॥ २१३७ ॥

भ्रमसंरम्भभृद्यानपात्रोपममुपाश्रयम् ।
समुद्रव्यवधिं केतुमिवेष्टस्य बिभर्ति यत् ॥ २१३८ ॥

संरक्ष्यन्ते स्वरेणैव यत्र लोका: कलिप्रिया: ।
ऋषिस्थानमिदं मुख्यमित्येवाहुर्विशारदा: ॥ २१३९ ॥

स्पर्द्धानुबन्धतो यत्र मल्लयुद्धविधित्सया ।
आह्वयन्ति सुरावासानुत्पताकाकरा गृहा: ॥ २१४० ॥

त्रिलोकीलोकसन्त्रासहरणायेव निर्मिता ।
यत्र चैत्यत्रयी भाति व्यक्तरत्नत्रयीमयी ॥ २१४१ ॥

तस्मात् सिद्धपुरद्रङ्गाद्रामासङ्गोल्लसज्जनात् ।
आनन्दकन्दलोद्भेद-लसद्रोमाञ्चकञ्चुक: ॥ २१४२ ॥

स्नेह-विस्मेरनयनो भक्तिसम्भ्रमभासुर: ।
विनयादिगुणव्यासोल्लसत्सम्बन्धबन्धुर: ॥ २१४३ ॥

तरणिप्रमितावर्तैरावर्तैरभिवन्द्य च ।
विज्ञप्तिं कुरुते व्यक्तां नयादिविजय: शिशु: ॥ २१४४ ॥

यथाकृत्यमिह प्राच्य-शैल-चूलावलम्बिनि ।
भानौ भगवतीसूत्र-स्वाध्यायार्थ-विवेचने ॥ २१४५ ॥

प्रस्तुताध्ययनग्रन्थाध्यापनाद्येककर्मणि ।
प्रवर्तमाने सम्प्राप्तं पर्व पर्युषणाभिधम् ॥ २१४६ ॥

तत्रापि पटहोद्घोषैः पापध्वंसपुरस्सरम् ।
दिनेषु पञ्चसु श्रीमत्कल्पसूत्रस्य वाचनम् ॥ २१४७ ॥

मासार्द्धमासमुख्यानां तपसां पारदर्शनम् ।
षड्द्विषादिकसङ्ख्यानां महाधीरनिदर्शनम् ॥ २१४८ ॥

साधर्मिक-जनानाञ्च वात्सल्यकरणं मिथः ।
दीनानाथादिवर्गस्य वाञ्छाधिकसमर्पणम् ॥ २१४९ ॥

एवमादि स्फुरद्धर्मकृत्यस्फातिमशिश्रियंत् ।
श्रूयते च जिनेन्द्राणां श्रीपूज्यानाञ्च भक्तितः ॥ २१५० ॥

यः सूत्रसिन्धुशीतांशुरुत्सूत्राम्भोधिकुम्भभूः ।
वन्दामहे वयं तस्य चरणाम्भोजयामलम् ॥ ३१५१ ॥

उत्सूत्राम्भोनिधौ यस्योपदेशो वडवानलः ।
षट्त्रिंशद्गुणषट्त्रिंशद् गुणाढ्यं तं गुरुं श्रये ॥ ३१५२ ॥

सूत्रारामसुधावृष्टिर्देशना यस्य पेशला ।
उत्सूत्राम्भोधिकल्पान्तवातोर्मि तं गुरुं श्रये ॥ ३१५३ ॥

उत्सूत्राब्धिगतां लङ्कां मिथ्यामतिमुवोष यः ।
गुरुर्दाशरथिः क्लेश-पाशच्छेदाय सोऽस्तु वः ॥ ३१५४ ॥

क्षारं मत्वा वचश्चित्रमुत्सूत्राम्भोनिधेः पयः ।
उपेक्षते स्म यः साक्षात्स एव गुरुरस्ति नः ॥ ३१५५ ॥

नोर्जितं गर्जितं मेने वल्गु वा वीचिवल्गनम् ।
उत्सूत्राम्भोनिधेर्येन स गुरुर्जगतोऽधिकः ॥ ३१५६ ॥

यत्सूत्र-कुलिशच्छिन्नपक्षाः कुमतपर्वताः ।
उत्सूत्राम्भोनिधौ पेतुर्गुरुरिन्द्रः स वः श्रिये ॥ ३१५७ ॥

उत्सूत्राब्धि-पतज्जन्तु-जाताभ्युद्धरणक्षमा
देशना नौरभूद्यस्य तं गुरुं समुपास्महे ॥ ३१५८ ॥

सिद्धान्तनीतिजाह्नव्यां यो हंस इव खेलति ।
गुरौ दोषा न लक्ष्यन्ते तत्र खे लतिका इव ॥ ३१५९ ॥

सूत्रस्थितिर्मनो यस्य जाङ्गुलीवाधितिष्ठति ।
पराभवितुमेनं न प्रभवन्ति रिपूरगाः ॥ ३१६० ॥

वान्तमोहविषस्वान्त-कान्तशान्तरसस्थितिः ।
हताघध्वान्तसिद्धान्त-नीतिभृज्जयताद् गुरुः ॥ ३१६१ ॥

न्यायारामसुधाकुल्याः कुनीतिविपिनप्लुषः ।
देशनाः क्लेशनाशाय सद्गुरोर्गुणशालिनः ॥ ३१६२ ॥

ब्रह्माण्डभाण्डे तेजोऽग्नि-तप्ते यस्य यशःपयः ।
उत्फेनायितमेतस्य बुद्बुदास्तारका बभुः ॥ ३१६३ ॥

कर्तुं कः शक्नुयाद् यस्योकेशवंशस्य वर्णनम् ।
समुद्रवदमुद्रश्रीरगाधः श्रूयते च यः ॥ ३१६४ ॥

योऽतिस्वच्छस्य गच्छस्य महापदमशिश्रियत् ।
अदृष्टशुभसन्तान-प्रथमानमहोभरः ॥ ३१६५ ॥

लक्ष्यन्ते कुशलोदर्का यस्य स्वान्तमनोरथाः ।
गिरामपीह सम्पर्कास्तर्का एवं न साक्षिणः ॥ ३१६६ ॥

यत्सुदर्शनभृत्ख्याते रसेनानुमिमीमहे ।
कलिपाथोधिमग्नाया उद्दिधीर्षा भुवो ध्रुवम् ॥ ३१६७ ॥

रत्नानीव पयोराशेर्वियतस्तारका इव ।
गणनायां समायान्ति गुणा यस्य न कर्हिचित् ॥ ३१६८ ॥

हृदयं ज्ञानगम्भीरं वपुर्लावण्य-पावनम् ।
गर्जितेनोर्जिता वाणी यस्य किं विस्मयाय न ॥ ३१६९ ॥

युक्तरूपमिदं यस्मिन् ज्ञानाद्वैतावलम्बिनि ।
ख्यातिस्फातिमनिर्वाच्यां गाहन्ते निखिला गुणाः ॥ ३।७० ॥

यस्य ध्यानानुरूप्येण ध्येयता विदुषामभूत् ।
व्यक्ता सेयं समापत्तिः पातञ्जलमताश्रिता ॥ ३।७१ ॥

यस्याप्रतिहृतेच्छस्य क्षमाकर्तृत्वहेतुतः ।
ईश्वरत्वं न कैरिष्टं योगवैशेषिकैरिव ॥ ३।७२ ॥

यन्मनोवैभवं ब्रूते मीमांसामांसलो न कः ।
स्वतन्त्रां प्रकृतिं यस्य सांख्यः को नाभिमन्यते ॥ ३।७३ ॥

इत्थं षड्दर्शनाराम-प्रसरत्कीर्तिसौरभः ।
यः प्रतापप्रथाशाली शोभते स्फारगौरवः ॥ ३।७४ ॥

अमूदृशाचार्य-समूहवर्यहर्यक्षचर्या-विहितानुवादैः ।
सदाऽवधार्या हृदि सुप्रसादैः, श्रीपूज्यपादैः प्रणतिस्त्रिसन्ध्यम् ३।७५

वाचकविनीतविजया विधृतमहागच्छभारविनियोगाः ।
वर्द्धमानरसविबुधाः, प्रत्यग्रसपर्यया वर्याः ॥ ४।७६ ॥

जसविजयाख्या विबुधा, अमरविजयसंज्ञकास्तथा विबुधाः ।
रामविजय-बुधयुगली, परेऽपि ये पूज्यपदभक्ताः ॥ ४।७७ ॥

साध्वीवर्गश्च तथा प्रमुखः शमरसपटूकृतस्वान्तः ।
क्रमशः प्रमोदनीये नत्यनुनती तेषु सर्वेषु ॥ ४।७८ ॥

जसविजयाख्या विबुधाः, सत्यविजयसंज्ञकास्तथा गणयः ।
भीमविजयाख्यगणयो, हर्षविजयसंज्ञका गणयः ॥ ४।७९ ॥

चन्द्रविजयाख्यगणयस्तत्त्वविजयसंज्ञकास्तथा गणयः ।
लक्ष्मीविजया गणयो, वृद्धिविजयसंज्ञका गणयः ॥ ४।८० ॥

चन्द्रविजयाख्यगणयः, पूज्यपदानुपनमन्ति भावेन ।
प्रणमति सङ्घोऽप्यखिलस्तदेतदखिलं हृदि निधेयम् ॥ ४।८१ ॥

स्खलितमिहाज्ञानभवं होतव्ये ज्ञानपावके दीप्ते ।
ज्ञानाद्वैतनयदृशां प्रतिभात्यखिलं जगद्ज्ञानम् ॥ ४।८२ ॥

ज्ञानक्रियासमुल्लसदनुभवदीपोत्सवाय भवतु सदा ।
श्रीपूज्यचरणभक्त्या लिखितो दीपोत्सवे लेखः ॥ ४।८३ ॥

हृद्यैस्तात्कालिकैः पद्यैः स्तवः परिणतो ह्ययम् ।
साक्ष्येव केवलं तस्मिन् ज्ञानात्माऽस्मीति मङ्गलम् ॥ ४।८४ ॥

## ॥ न्यायखण्डखाद्यऽपरनामामहावीरस्तवः ॥

ऐंकारजापवरमाप्य कवित्ववित्त्व-वाञ्छासुरद्रुमुपगङ्गमभङ्गरङ्गम् ।
सूक्तैर्विकासिकुसुमैस्तव वीरशम्भो-रम्भोजयोश्चरणयोर्वितनोमि पूजाम्

स्तुत्या गुणाः शुभवतो भवतो न के वा, देवाधिदेव ! विविधातिशयर्द्धिरूपाः
तर्कावतारसुभगैस्तु वचोभिरेभिस्त्वद्वाग्गुणस्तुतिरनुत्तरभाग्यलभ्या॥ २ ॥

नैरात्म्यदृष्टिमिह साधनमाहुरेके सिद्धः परे पुनरनाविलमात्मबोधम् ।
तैस्तैर्नयैरुभयपक्षसमापि ते वा-गाद्यं निहन्ति विशदव्यवहारदृष्ट्या॥३॥

आत्मा न सिद्ध्यति यदि क्षणभङ्गबाधान्नैरात्म्यमाश्रयतु तद्भवदुक्तिबाह्यः।
व्याप्त्यग्रहात् प्रथमतः क्षणभङ्गभङ्गे शोकं स भूमिपतितोभयपाणिरेतु

सामर्थ्यतद्विरहरूपविरुद्धधर्मसंसर्गतो न च घटादिषु भेदसिद्धेः ।
व्याप्तिग्रहस्तव परस्य यतः प्रसङ्गव्यत्यासयोर्बहुविकल्पहतेरसिद्धिः

सामर्थ्यमत्र यदि नाम फलोपधान-मापाद्यसाध्यविभिदाविरहस्तदानीम्।
इष्टप्रसिद्ध्यनुभवोपगमस्वभाव-व्याघात इच्छति परो यदि योग्यतां च

न त्वद्द्रुहो भवति चेप्सितसाध्यसिद्धि-र्मुख्यात् समर्थविषयव्यवहारतोऽपि।
भूम्ना स जन्मविषयोऽपि हि योग्यतोत्थो,व्याप्तिस्तु हेतुसहकारिविशेषलभ्या

एतावतैव हि परप्रकृतप्रसङ्ग-भङ्गेन सिद्ध्यति कथाश्रितपूर्वरूपम्।
शिष्यैर्विधेयमुचितं विशदस्वभाव-प्रश्नोत्तरं तु तव देव ! नयप्रमाणैः८

स्याद्वादनाम्नि तव दिग्विजयप्रवृत्ते, सेनापतौ जिनपते ! नयसार्वभौम !।
नश्यन्ति तर्कनिवहाः किमु नाम नेष्टा-पत्तिप्रभूतबलपत्तिपदप्रचारात् ॥९॥

जात्यन्तरेण मिलितेन विभो ! समर्थे, क्षेपो न युज्यत इति क्षणिकत्वसिद्धिः।
जात्यन्तराननुभवादपि च प्रवृत्तिः, सामान्यतो हि घटते फलहेतुभावात्

सङ्ग्राहकेतरविकल्पहतिश्च तत्र, व्यक्तौ विरोधगमने व्यवहारबाधः।
व्यावृत्तयोऽप्यनुहरन्ति निजं स्वभाव-माकस्मिकव्यसनिता द्विषतां तवाहो

आकस्मिकत्वमपि तस्य भयाय न स्यात्, स्याद्वादमन्त्रमिह यस्तव बम्भणीति
यत् साधनं यदपि बाधनमन्यदीयाः, कुर्वन्ति तत् तव पितुः पुरतः शिशुत्वम्

एकत्र नापि करणाकरणे विरुद्धे, भिन्नं निमित्तमधिकृत्य विरोधभङ्गात्।
एकान्तदान्तहृदयास्तु यथाप्रतिज्ञं, किञ्चिद्वदन्त्यसुपरीक्षितमत्वदीयाः ॥१३॥

काले च दिश्यपि यदि स्वगुणैर्विरोधो, बाह्यो न कोऽपि हि तदा व्यवतिष्ठतेऽर्थः
सौत्रान्तिको व्यवहरेत् कथमित्थमुच्चै-र्न त्वन्मतद्रुहमहो वृणुते जयश्रीः

तस्य त्वदागममृते शुचियोगयोगा-चारागमं प्रविशतोऽपि न साध्यसिद्धिः
तत्रापि हेतुफलभावमते प्रसङ्गा-भङ्गात्तदिष्टिविरहे स्थिरबाह्यसिद्धेः ॥१५॥

देशे स्वभावनियमाद्यदि नापराधः,
कालेऽपि मास्तु स निमित्तभिदानुचिन्त्या।
तैस्तैर्नयैर्व्यवहृतिर्यदनन्तधर्म-
क्रोडीकृतार्थविषया भवतो विचित्रा ॥ १६ ॥

यत् कारणं जनयतीह यदेकदा यत्, तत्सर्वदैव जनयेन्न किमेवमादि।
प्राक्पक्षयोः कलितदोषगणेन जाति-व्यक्त्योर्निरस्यमखिलं भवतो नयेन

तस्यैव तेन हि समं सहकारिणा च, सम्बन्धतद्विरहसंघटनाविरोधः।
ध्वस्तस्तवैव जिनराज ! नयप्रमाणै-र्न स्यात् प्रभुः कथमपि क्षणिकत्वसिद्ध्यै

व्याप्त्यप्रदर्शनमिदं व्यतिरेकसिद्धा–वप्युच्चकैः क्षतिकरं त्वदनाश्रवस्य ।
श्वासादिकं ज्वर इवात्र च पक्षहेतु–दृष्टान्तसिद्धिविरहादधिकोऽपि दोषः

आदाय सत्त्वमपि न क्रमयौगपद्ये नित्यान्निवृत्त्य बिभृतः क्षणिके प्रतिष्ठाम्
यन्न त्वदीयनयवाग्नगरीगरीयश्चित्रस्वभावसरणौ भयतो निवृत्तिः॥२०॥

नाशोऽत्र हेतुरहितो ध्रुवभावितायास्तेनागतं स्वरसतः क्षणिकत्वमर्थे ।
इत्येतदप्यलमनल्पविकल्पजालैरुच्छिद्यते तव नयप्रतिबन्दितश्च॥२१॥

द्रव्यार्थतो घटपटादिषु सर्वसिद्ध–मध्यक्षमेव हि तव स्थिरसिद्धिमूलम् ।
तच्च प्रमाणविधया तदिदन्त्वभेदा–भेदावगाहि नयतस्तदभेदशालि २२

त्वच्छासने स्फुरति यत् स्वरसादलीका–दाकारतश्च परतोऽनुगतं तु बाह्यम्
आलम्बनं भवति सङ्कलनात्मकस्य, तत्तस्य न त्वतिविभिन्नपदार्थयोगात्

तद्भिन्नतामनुभवस्मरणोद्भवत्वाद्, द्रव्यार्थिकाश्रयतयेन्द्रियजाद्बिभर्त्ति ।
भेदे स्फुरत्यपि हि यद् घटयेदभिन्नं भेदं निमित्तमधिकृत्य तदेव मानम्

दृष्टा सुधीभिरत एव घटेऽपि रक्ते श्यामाभिदाश्रयधियो भजना प्रमात्वे ।
सा निर्निमित्तकतयाध्यवसाय एव, न स्यात् तदाश्रयणतस्तु तथा यथार्था

स्वद्रव्यपर्ययगुणानुगता हि तत्ता, तद्व्यक्त्यभेदमपि तादृशमेव सूते ।
संसर्गभावमधिगच्छति स स्वरूपात्, सा वा स्वतः स्फुरति तत्पुनरन्यदेतत्

पर्यायतो युगपदप्युपलब्धभेदं, किं न क्रमेऽपि हि तथेति विचारशाली ।
स्याद्वादमेव भवतः श्रयते स भेदा–भेदक्रमेण किमु न स्फुटयुक्तियुक्तम्

तद्धेम कुण्डलतया विगतं यदुच्चै–रुत्पन्नमङ्गदतयाऽचलितं स्वभावात्
लोका अपीदमनुभूतिपदं स्पृशन्तो न त्वां श्रयन्ति यदि तत्तदभाग्यमुग्रम्

स्वद्रव्यतां यदधिकृत्य तदात्मभावं, गच्छत्यदः कथमहो परजात्यभिन्नम्।
तात्पर्यभेदभजना भवदागमार्थः, स्याद्वादमुद्रितनिधिः सुलभो न चान्यैः

सामान्यमेव तव देव तदूर्ध्वताख्यं, द्रव्यं वदन्त्यनुगतं क्रमिकक्षणौघे ।
एषैव तिर्यगपि दिग् बहुदेशयुक्ते, नात्यन्तभिन्नमुभयं प्रतियोगिनस्तु ॥३०॥

सम्बन्ध एव समवायहतेर्न जाति-व्यक्त्योरभेदविरहेऽपि च धर्मिक्लृप्तौ
स्याद् गौरवं ह्यनुगतव्यवहारपक्षे-ऽन्योन्याश्रयोऽनुगतजातिनिमित्तके च

जातेर्हि वृत्तिनियमो गदितः स्वभावाज्जातिं विना न च ततो व्यवहारसिद्धिः
उत्प्रेक्षितं ननु शिरोमणिकाणदृष्टेस्त्वद्वाक्यबोधरहितस्य न किञ्चिदेव ॥३२॥

भेदग्रहस्य हननाय य एव दोषः, प्रोक्तः परैस्तव मते ननु सोऽप्यभेदः।
त्वद्दृष्टवस्तुनि न मोघमनन्तभेदाभेदादिशक्तिशबले किमु दोषजालम्

एवं त्वभिन्नमथ भिन्नमसच्च सच्च, व्यक्त्यात्मजातिरचनावदनित्यनित्यम्।
बाह्यं तथाऽखिलमपि स्थितमन्तरङ्गं नैरात्म्यतस्तु न भयं भवदाश्रितानाम्

आत्मा तु तादृगपि मुख्यतयाऽस्ति नित्य-स्तद्भावतोऽव्ययतया गगनादिवत्ते
चिन्मात्रमेव तु निरन्वयनाशि तत्त्वं, कः श्रद्दधातु यदि चेतयते सचेताः

इष्टस्त्वया नु परमार्थसतोरभेदोऽ-भिन्नैकजात्यमुत वेद्यविधेर्मृषात्वम्।
इत्थं विचारपदवीं भवदुक्तिबाह्यो, नीतो न हेतुबलमाश्रयितुं समर्थः॥३६॥

आद्ये ह्यसिद्धिसहितौ व्यभिचारबाधौ स्यादप्रयोजकतया च हतिर्द्वितीये।
शून्यत्वपर्यवसितिश्च भवेत्तृतीये स्याद्वादमाश्रयति चेद् विजयेत वादी

धीग्राह्ययोर्नहि भिदास्ति सहोपलम्भात्, प्रातिस्विकेन परिणामगुणेन भेदः
इत्थं तथागतमतेऽपि हि सप्तभङ्गी, सङ्गीयते यदि तदा न भवद्विरोधः

स्याद्वाद एव तव सर्वमतोपजीव्यो, नान्योऽन्यशत्रुषु नयेषु नयान्तरस्य।
निष्ठा बलं कृतधिया क्व च नापि न स्व-व्याघातकं छलमुदीरयितुं च युक्तम्

कः कं समाश्रयतु कुत्र नयोऽन्यतर्कात्, प्रामाण्यसंशयदशामनुभूय भूयः।
ताटस्थ्यमेव हि नयस्य निजं स्वरूपं, स्वार्थेष्वयोगविरहप्रतिपत्तिमात्रात्

त्यक्तस्वपक्षविषयस्य तु का वितण्डा, पाण्डित्यडिण्डिमडमत्करणेऽन्यनिष्ठा
नग्नस्य नग्नकरतोऽपरनग्नशीर्षे, प्रक्षेपणं हि रजसोऽनुहरेत्तदेतत् ॥४१

देशेन देशदलनं भजनापथे तु त्वच्छासने निजकरेण मलापनोदः।
व्याघातकृन्न भजनाभजना जनाना-मित्थं स्थितौ शबलवस्तुविवेकसिद्धेः

नोच्चैर्बिभेति यदि नाम कृतान्तकोपा–दुत्प्रेक्ष्य कल्पयति भिन्नपदार्थजालम्।
चित्रस्थले स्पृशति नैव तवोपपत्तिं तत्किं शिरोमणिरसौ वहतेऽभिमानम्

साङ्ख्यः प्रधानमुपयंस्त्रिगुणं विचित्रां, बौद्धो धियं विशदयन्नथ गौतमीयः।
वैशेषिकश्च भुवि चित्रमनेकमेकं, वाञ्छन् मतं न तव निन्दति चेत् सलज्जः

अव्याप्यवृत्तिगुणिभेदमुदीर्य नव्या–
भावं प्रकल्प्य च कथं न शिरोमणे ! त्वम् ।
स्याद्वादमाश्रयसि सर्वविरोधिजैत्रं,
ब्रूमः प्रसार्य निजपाणिमिति त्वदीयाः ॥ ४५ ॥

विश्वं ह्यलीकमनुपाख्यमलं न बौद्ध ! सोढुं विचारमिति जल्पसि यद्विचारात्
कः कीदृगेष इति पृष्ट इह त्वदीयैर्यद्वक्ति तद्बठर ! भौतविचारकल्पम्॥४६॥

बाह्ये परस्य न च दूषणदानमात्रात् स्वामिन् जयो भवति येन नयप्रमाणैः।
प्राज्ञैः कृतैव वसुधावयविप्रसिद्धिर्दृक्सङ्क्रमादवतरन्ति न दूषणानि ॥ ४७ ॥

ज्ञानाग्रहावृतिनिरावृतिसप्रकम्पाकम्पत्वरक्तिमविपर्ययतन्निदानैः ।
तद्देशतेतरसभागविभागवृत्तिचित्रैरैतरैरवयवी न हि तत्त्वतोऽन्यः॥ ४८ ॥

दृष्टो ह्यदृष्ट इति को निरपेक्षमाह, देशावृतौ स्फुटमनावृत एव देशी ।
देशे चलत्यपि चलत्वमसौ न धत्ते, देशभ्रमादवयवी भ्रमभाजनं नो ४९

संयोगतद्विरहयोश्च गतिः प्रकारभेदेन तन्निलयतातदभावयोश्च ।
वृत्तिः स्वरूपनिरतैव च चित्रमेकमित्यादि ते नयमतं समयाब्धिफेनः

नाणोरपि प्रतिहतिश्च समानयोगक्षेमत्वतः किल धियेति न बाह्यभङ्गः ।
योग्या च नास्ति नियतानुपलब्धिरुच्चैर्नैरात्म्यमित्युपहतं नयवल्गितैस्ते

स्याद्वादतस्तव तु बाह्यमथान्तरङ्गं, सल्लक्षणं शबलतां न जहाति जातु ।
एकत्वमुल्लसति वस्तुनि येन पूर्णे, ज्ञानाग्रहादिकृतदैशिकभेद एव ५२

देशेन दृष्ट इह यः स मया न दृष्टो, देशेन चेति विशदव्यवहार एषः ।
संयोगतद्विरहवन्ननु देशभेदादेकत्र देशिनि विरुद्धनिवेशमाह ॥ ५३ ॥

यद्गृह्यते तदिह वस्तु गृहीतमेव तद्गृह्यते च न च यत्तु गृहीतमास्ते।
इत्थं भिदामपि स किं न विदांकरोतु यः पाठितो भवति लक्षणभङ्गजालम्

तत्त्वं ह्यबुद्ध्यत शिशुर्भवतः किलेदं, षड्वार्षिकोऽपि भगवन्नतिमुक्तिकर्षिः
जानन्ति ये न गतवर्षशतायुषोऽपि, धिक् तेषु मोहनृपतेः परतन्त्रभावम्

आवृत्यनावृतिपदेऽपि समा दिगेषा,
जात्यावृतौ भवति वैनयिक्की कथं धीः।
चित्रा च जातिरवयव्यपि तद्वदेव,
चित्रो भवन्न तनुते भुवि कस्य चित्रम् ॥ ५६ ॥

एकत्र देशभिदयानुभवेन कम्पाकम्पावपि प्रकृतवस्तुनि भेदकौ स्तः।
धीविप्लवोपगमतश्च न चेद्विभागसंयोगभेदपरिकल्पनया च दोषः॥५७॥

न व्याप्यते यदि भिदाऽनुभवाश्रयत्वादेकत्र रक्तिमविपर्यययोर्विरोधः।
सर्वत्र तच्छबलताप्रतिबन्धसिद्धिर्दुर्वादिकुम्भिमदमर्दनसिंहनादः॥५८॥

तद्देशतेतरपदेऽपि समा दिगेषा, चित्रेतरत्वविषयेऽप्ययमेव पन्थाः।
द्रव्यैकतावदविगीततया प्रतीतेः, क्षेत्रैकतापि न च विभ्रमभाजनं स्यात्

स्थूलाणुभेदवदभिन्नपरानपेक्षसद्व्यापकेतरनिषेधकशून्यवादाः।
एतेन तेऽभ्युपगमेन हताः कथञ्चित्, त्वच्छासनं न खलु बाधितुमुत्सहन्ते

एतेन ते गुणगुणित्वहतेर्निरस्तं, नैरात्म्यमीश समयेऽनुपलब्धितश्च।
आत्मा यदेष भगवाननुभूतिसिद्ध, एकत्वसंवलितमूर्तिरनन्तधर्मा॥६१॥

भिन्नक्षणेष्वपि यदि क्षणता प्रकल्प्या,
क्लृप्तेषु सास्त्विति जगत्क्षणिकत्वसिद्धिः।
तद्द्रव्यता तु विजहाति कदापि नो त-
त्सन्तानतामिति तवायमपक्षपातः ॥ ६२ ॥

न द्रव्यमेव तदसौ समवायिभावात् पर्यायतापि किमु नात्मनि कार्यभावात्
उत्पत्तिनाशनियतस्थिरतानुवर्त्ति, द्रव्यं वदन्ति भवदुक्तिविदो न जात्या

नाशोद्भवस्थितिभिरेव समाहृताभि-र्द्रव्यत्वबुद्धिरिति सम्यगदीदृशस्त्वम्
एकान्तबुद्ध्यधिगते खलु तद्विधानमात्मादिवस्तुनि विवेचकलक्षणार्थः

नाशोद्भवस्थितिमति क्रमशो न शक्तो, द्रव्यध्वनिस्तदिह नो पृथगर्थताभृत्।
शब्दस्वभावनियमाद्वचने न भेदः स्वव्याप्यधर्मिगबहुत्वनिराकृतेश्च ६५

एकत्वसंवलितविध्यनुवादभावात्, बौद्धं बहुत्वमपि नो वचनात्यायाय ।
प्रत्येकमन्वयितयापि न तत्प्रसङ्गस्तात्पर्यसंघटितसन्निहिताश्रयत्वात्

यद्वन्महेश्वरपदत्र विभिन्नवाच्यं, सर्वज्ञतादिषडवच्छिदया परेषाम् ।
द्रव्यध्वनिस्तव तथैव परं पदार्थवाक्यार्थभावभजना न परैः प्रदृष्टा ६७

एवं च शक्तितदवच्छिदयोर्भिदातो, द्रव्यध्वनेर्नयभिदैव विचित्रबोधः ।
काचित् प्रधानगुणभावकथा क्वचित्तु, लोकानुरूपनियतव्यवहारकर्त्री ६८

द्रव्याश्रया विधिनिषेधकृताश्च भङ्गाः, कृत्स्नैकदेशविधया प्रभवन्ति सप्त
आत्मापि सप्तविध इत्यनुमानमुद्रा, त्वच्छासनेऽस्ति विशदव्यवहारहेतोः

शक्त्या विभुः स इह लोकमितप्रदेशो, व्यक्त्या तु कर्मकृतसौवशरीरमानः।
यत्रैव यो भवति दृष्टगुणः स तत्र, कुम्भादिवद्विशदमित्यनुमानमत्र ७०

स्वाहाभुजो ज्वलनमूर्ध्वमपि स्वभावात्, सम्बन्धभेदकलितादथवास्त्वदृष्टात्
दिग्देशवर्त्तिपरमाणुसमागमोऽपि, तच्छक्तितो न खलु बाधकमत्र विद्मः

मूर्त्तत्वसावयवतानिजकार्यभावच्छेदप्ररोहपृथगात्मकताप्रसङ्गाः ।
सर्पा इवातिविकरालदृशोऽपि हि त्व-त्स्याद्वादगारुडसुमन्त्रभृतां न भीत्यै

स्युर्वैभवे जननमृत्युशतानि जन्मन्येकत्र पाटितशतावयवप्रसङ्गात् ।
चित्तान्तरोपगमतो बहुकार्यहेतुभावोपलोपजनितं च भयं परेषाम्॥ ७३ ॥

प्रत्यंशमेव बहुभोगसमर्थने तु, स्यात्संकरः पृथगदृष्टगवृत्तिलाभे ।
मानं तु मृग्यमियतैव हतश्च कायव्यूहोपि योगिषु तवागमिकैः परेषाम्

नात्मा क्रियामुपगतो यदि काययोगः,
प्रागेव को न खलु हेतुरदृष्टमेव ।

आद्ये क्षणेऽभ्यवहृतिः किल कार्मणेन,
मिश्रात् ततो न तनुसर्गमिति त्वमोघम् ॥ ७५ ॥

वीर्यं त्वया सकरणं गदितं किलात्म-न्यालम्बनग्रहणसत्परिणामशालि।
तेनास्य सक्रियतया निखिलोपपत्तिस्त्वद्द्वेषिणामवितर्थो न तु बन्धमोक्षौ

एकान्तनित्यसमये च तथेतरत्र, स्वेच्छावशेन बहवो निपतन्ति दोषाः।
तस्माद् यथेश भजनोर्ज्जितचित्पवित्रमात्मानमात्थ न तथा वितथावकाशः

एतादृगात्ममननं विनिहन्ति मिथ्याज्ञानं सवासनमतो न तदुत्थबन्धः।
कर्मान्तरक्षयकरं तु परं चरित्रं निर्बन्धमात्थ जिन! साधु निरुद्धयोगम्॥७८॥

ज्ञानं न केवलमशेषमुदीर्य भोगं, कर्मक्षयक्षममबोद्धृदशाप्रसङ्गात्।
वैजात्यमेव किल नाशकनाश्यतादौ, तन्त्रं नयान्तरवशादनुपक्षयश्च ७९

ज्ञानं क्रियेव विरुणद्धि ससंवरांशं, कर्म क्षिणोति च तपोंऽशमनुप्रविश्य
भोगः प्रदेशविषयो नियतो विपाके, भाज्यत्वमित्यनघ! ते वचनं प्रमाणम्

ज्ञानं प्रधानमिह न क्रियया फलाप्तिः, शुक्तावुदीक्ष्यत इयं रजतभ्रमाद्यत्
आकर्षणादि कुरुते किल मन्त्रबोधो, ह्रीणेव दर्शयति तत्र न च क्रियास्यम्

पश्यन्ति किं न कृतिनो भरतप्रसन्नचन्द्रादिषूभयविधं व्यभिचारदोषम्।
द्वारीभवन्त्यपि च सा न कथञ्चिदुच्चैर्ज्ञानं प्रधानमिति सङ्गरभङ्गहेतुः

सम्यक्त्वमप्यनवगाढमृते किलैत-
दभ्यासतस्तु समयस्य सुधावगाढम्।
ज्ञानं हि शोधकममुष्य यथाञ्जनं स्या-
दक्ष्णो यथा च पयसः कतकस्य चूर्णम् ॥ ८३ ॥

आसक्तिमांश्च चरणे करणेऽपि नित्यं,
न स्वान्यशासनविभक्तिविशारदो यः।
तत्सारशून्यहृदयः स बुधैरभाणि,
ज्ञानं तदेकमभिनन्द्यमतः किमन्यैः ॥ ८४ ॥

न श्रेणिकः किल बभूव बहुश्रुतर्द्धिः,
प्रज्ञप्तिभाग् न न च वाचकनामधेयः।
सम्यक्त्वतः स तु भविष्यति तीर्थनाथः,
सम्यक्त्वमेव तदिहावगमात् प्रधानम् ॥ ८५ ॥

भ्रष्टेन संयमपदादवलम्बनीयं, सम्यक्त्वमेव दृढमत्र कृतप्रसङ्गैः ।
चारित्रलिङ्गवियुजोऽपि शिवं व्रजन्ति,तद्वर्जितास्तु न कदाचिदिति प्रसिद्धिः

ज्ञानी सुदृष्टिरपि कोऽपि तपो व्यपोह्य, दुष्कर्ममर्मदलने न कदापि शक्तः
एतन्निकाचितमपि प्रणिहन्ति कर्मेत्यभ्यर्हितं भवति निर्वृतिसाधनेषु ॥८७॥

सम्यक्क्रिया व्यभिचरेन्न फलं विशेषो, हेत्वागतो न परतोऽविनिगम्यभावात्
न द्रव्यभावविधया बहिरन्तरङ्गभावाच्च कोऽपि भजनामनुपोह्य भेदः

आकर्षणादिनियतास्ति जपक्रियैव, पत्युः प्रदर्शयति सा न मुखं परस्य ।
वैकल्पिकी भवतु कारणता च बाधे, द्वारित्वमप्युभयतो मुखमेव विघ्नः

सम्यक्त्वशोधकतयाधिकतामुपैतु, ज्ञानं ततो न चरणं तु विना फलाय ।
ज्ञानार्थवादसदृशाश्चरणार्थवादाः, श्रूयन्त एव बहुधा समये ततः किम्॥९०॥

शास्त्राण्यधीत्य बहवोऽत्र भवन्ति मूर्खा,
यस्तु क्रियैकनिरतः पुरुषः स विद्वान् ।
सञ्चिन्त्यतां निभृतमौषधमातुरं किं,
विज्ञातमेव वितनोत्यपरोगजालम् ॥ ९१ ॥

ज्ञानं स्वगोचरनिबद्धमतः फलाप्तिर्नैकान्तिकी चरणसंवलितात् तथा सा ।
ज्ञातानि चात्र तरणोत्कनटीपथज्ञाश्चेष्टान्वितास्तदितरे च निदर्शितानि९२

मुक्त्वा नृपो रजतकाञ्चनरत्नखानी-र्लोहाकरं प्रियसुताय यथा ददाति ।
तद्वद्गुरुः सुमुनये चरणानुयोगं, शेषत्रयं गुणतयेत्यधिका क्रियैव॥९३

प्रज्ञापनीयशमिनो गुरुपारतन्त्र्यं, ज्ञानस्वभावकलनस्य तथोपपत्तेः ।
ध्यान्ध्यं परं चरणचारिमशालिनो हि, शुद्धिः समग्रनयसङ्कलनावदाता९४

न श्रेणिकस्य न च सत्यकिनो न विष्णोः,
सम्यक्त्वमेकममलं शरणं बभूव ।
चारित्रवर्जिततया कलुषाविलास्ते,
प्राप्ता गतिं घनतमैर्निचितां तमोभिः ॥ ९५ ॥

न ज्ञानदर्शनधरैर्गतयो हि सर्वाः, शून्या भवन्ति नृगतौ तु चरित्रमेकम् ।
न ज्ञानदर्शनगुणाढ्यतया प्रमादः कार्यस्तदार्यमतिभिश्चरणे कदापि॥९६

श्राद्धश्चरित्रपतितोऽपि च मन्दधर्मा पक्षं त्रयोऽपि कलयन्त्विह दर्शनस्य।
चारित्रदर्शनगुणद्वयतुल्यपक्षा दक्षा भवन्ति सुचरित्रपवित्रचित्ताः॥ ९७ ॥

संज्ञानयोगघटितं शमिनां तपोऽपि श्रेण्याश्रयादिह निकाचितकर्महन्तृ ।
बाह्यं तपः परमदुश्चरमाचरध्वमाध्यात्मिकस्य तपसः परिबृंहणार्थम्॥९८

इत्थं विशिष्यत इदं चरणं तवोक्तौ, तैस्तैर्नयैः शिवपथे स्फुटभेदवादे ।
चिच्चारुतां परमभावनयस्त्वभिन्नरत्नत्रयीं गलितबाह्यकथां विधत्ते ९९

अशुद्धिःशुद्धिं न स्पृशति वियतीवात्मनि कदा-
प्यथारोपात्कोपारुणिमकणिकाकातरदृशाम् ।
त्वदुक्ताः पर्याया घनतरतरङ्गा इव जवा-
द्विवर्त्तव्यावृत्तिव्यतिकरभृतश्चिज्जलनिधौ ॥ १०० ॥

न बद्धो नो मुक्तो न भवति मुमुक्षुर्न विरतो,
न सिद्धः साध्यो वा व्युपरतविवर्त्तव्यतिकरः
असावात्मा नित्यः परिणमदनन्ताविरतचि
च्चमत्कारस्कारः स्फुरति भवतो निश्चयनये ॥ १०१॥

दृशां चित्रद्वैतं प्रशमवपुषामद्वयनिधिः,
प्रसूतिः पुण्यानां गलितपृथुपुण्येतरकथः ।
फलं नो हेतुर्नो तदुभयमथासावनुभय-
स्वभावस्त्वज्ज्ञाने जयति जगदादर्शचरितः ॥ १०२ ।

गुणैः पर्यायैर्वा तव जिन समापत्तिघटना-
दसौ त्वद्रूपः स्यादिति विशदसिद्धान्तसरणिः ।
अतस्त्वद्ध्यानायाध्ययनविधिनाम्नायमनिशं,
समाराध्य श्रद्धां प्रगुणयति बद्धाञ्जलिरयम् ॥ १०३ ॥

विवेकस्तत्त्वस्याप्ययमनघ सेवा तव भव-
स्फुरत्तृष्णावल्लीगहनदहनोद्दाममहिमा ।
हिमानीसम्पातः कुमतनलिने सज्जनदृशां,
सुधापूरः क्रूरग्रहदृगपराधव्यसनिषु ॥ १०४ ॥

कुतर्कैर्ध्वस्तानामतिविषमनैरात्म्यविषयै-
स्तवैव स्याद्वादस्त्रिजगदगदङ्कारकरुणा ।
इतो ये नैरुज्यं सपदि न गताः कर्कशरुज-
स्तदुद्धारं कर्तुं प्रभवति न धन्वन्तरिरपि ॥ १०५ ॥

इदमनवमं स्तोत्रं चक्रे महाबल! यन्मया,
तव नवनवैस्तर्कोद्ग्राहैर्भृशं कृतविस्मयम् ।
तत इह बृहत्तर्कग्रन्थश्रमैरपि दुर्लभां,
कलयतु कृती धन्यंमन्यो यशोविजयश्रियम् ॥ १०६ ॥

स्थाने जाने नात्र युक्तिं ब्रुवेऽहं, वाणी पाणी योजयन्ती यदाह ।
धृत्वा बोधं निर्विरोधं बुधेन्द्रास्त्यक्त्वा क्रोधं ग्रन्थशोधं कुरुध्वम्॥१०७॥

प्रबन्धाः प्राचीनाः परिचयमिताः खेलतितरां,
नवीना तर्काली हृदि विदितमेतत् कविकुले ।
असौ जैनः काशीविबुधविजयप्राप्तबिरुदो,
मुदो यच्छत्यच्छः समयनयमीमांसितजुषाम् ॥ १०८ ॥

# ।। परमज्योति:पञ्चविंशतिका ।।

ऐन्द्रं तत्परमं ज्योतिरुपाधिरहितं स्तुमः ।
उदिते स्युर्यदंशेऽपि, सन्निधौ निधयो नव ।। १ ।।

प्रभा चन्द्राऽर्कभादीनां, मितक्षेत्रप्रकाशिका ।
आत्मनस्तु परं ज्योति,-र्लोकालोकप्रकाशकम् ।। २ ।।

निरालम्बं निराकारं निर्विकल्पं निरामयम् ।
आत्मनः परमं ज्योति,-निरुपाधि निरञ्जनम् ।। ३ ।।

दीपादिपुद्गलापेक्षं, समलं ज्योतिरक्षजम् ।
निर्मलं केवलं ज्योति,-निरपेक्षमतीन्द्रियम् ।। ४ ।।

कर्मनोकर्मभावेषु जागरूकेष्वपि प्रभुः ।
तमसानावृतः साक्षी, स्फुरति ज्योतिषा स्वयम् ।। ५ ।।

परमज्योतिषः स्पर्शादपरं ज्योतिरेधते ।
यथा सूर्यकरस्पर्शात्, सूर्यकान्तस्थितोऽनलः ।। ६ ।।

पश्यन्नपरमं ज्योतिर्विवेकाद्रेः पतत्यधः ।
परमं ज्योतिरन्विच्छन्नाऽविवेके निमज्जति ।। ७ ।।

तस्मै विश्वप्रकाशाय, परमज्योतिषे नमः ।
केवलं नैव तमसः, प्रकाशादपि यत्परम् ।। ८ ।।

ज्ञानदर्शनसम्यक्त्व,-चारित्रसुखवीर्यभूः ।
परमात्मप्रकाशो मे, सर्वोत्तमकलामयः ।। ९ ।।

यां विना निष्फलाः सर्वाः कला गुणबलाधिकाः ।
आत्मधामकलामेकां तां वयं समुपास्महे ।। १० ।।

निधिभिर्नवभी रत्नै,-श्चतुर्दशभिरप्यहो ।
न तेजश्चक्रिणां यत्स्यात्, तदात्माधीनमेव हि ।। ११ ।।

दम्भपर्वतदम्भोलि,-ज्ञानध्यानधनाः सदा ।
मुनयो वासवेभ्योऽपि, विशिष्टं धाम बिभ्रति ॥ १२ ॥

श्रामण्ये वर्षपर्यायात्, प्राप्ते परमशुक्लताम् ।
सर्वार्थसिद्धदेवेभ्योऽप्यधिकं ज्योतिरुल्लसेत् ॥ १३ ॥

विस्तारिपरमज्योति,-र्द्योतिताभ्यन्तराशयाः ।
जीवन्मुक्ता महात्मानो, जायन्ते विगतस्पृहाः ॥ १४ ॥

जाग्रत्यात्मनि ते नित्यं, बहिर्भावेषु शेरते ।
उदासते परद्रव्ये, लीयन्ते स्वगुणामृते ॥ १५ ॥

यथैवाभ्युदितः सूर्यः पिदधाति महान्तरम् ।
चारित्रपरमज्योति,-र्द्योतितात्मा तथा मुनिः ॥ १६ ॥

प्रच्छन्नं परमं ज्योति, रात्मनोऽज्ञानभस्मना ।
क्षणादाविर्भवत्युग्र, ध्यानवातप्रचारतः ॥ १७ ॥

परकीयप्रवृत्तौ ये, मूकान्धबधिरोपमाः ।
स्वगुणार्जनसज्जास्तैः, परमं ज्योतिराप्यते ॥ १८ ॥

परेषां गुणदोषेषु, दृष्टिस्ते विषदायिनी ।
स्वगुणानुभवालोकाद्, दृष्टिः पीयूषवर्षिणी ॥ १९ ॥

स्वरूपादर्शनं श्लाध्यं, पररूपेक्षणं वृथा ।
एतावदेव विज्ञानं परंज्योतिःप्रकाशकम् ॥ २० ॥

स्तोकमप्यात्मनो ज्योतिः पश्यतो दीपवद्धितम् ।
अन्धस्य दीपशतवत् परंज्योतिर्न बह्वपि ॥ २१ ॥

समताऽमृतमग्नानां, समाधिधूतपाप्मनाम् ।
रत्नत्रयमयं शुद्धं, परं ज्योतिः प्रकाशते ॥ २२ ॥

तीर्थंकरा गणधरा, लब्धिसिद्धाश्च साधवः ।
संजातास्त्रिजगद्वन्द्याः, परं ज्योतिष्प्रकाशतः ॥ २३ ॥

न रागं नापि च द्वेषं, विषयेषु यदा व्रजेत् ।
औदासीन्यनिमग्नात्मा, तदाप्नोति परं महः ॥ २४ ॥

विज्ञाय परमज्योति,-र्माहात्म्यमिदमुत्तमम् ।
यःस्थैर्यं याति लभते, स यशोविजयश्रियम् ॥ २५ ॥

# ॥ परमात्मपञ्चविंशतिका ॥

परमात्मा परं ज्योतिः, परमेष्ठी निरञ्जनः ।
अजः सनातनः शम्भुः, स्वयंभूर्जयताज्जिनः ॥ १ ॥

नित्यं विज्ञानमानन्दं, ब्रह्म यत्र प्रतिष्ठितम् ।
शुद्धबुद्धस्वभावाय, नमस्तस्मै परात्मने ॥ २ ॥

अविद्याजनितैः सर्वै,-र्विकारैरनुपद्रुतः ।
व्यक्त्या शिवपदस्थोऽसौ, शक्त्या जयति सर्वगः ॥ ३ ॥

यतो वाचो निवर्तन्ते, न यत्र मनसो गतिः ।
शुद्धानुभवसंवेद्यं, तद्रूपं परमात्मनः ॥ ४ ॥

न स्पर्शो यस्य नो वर्णो, न गन्धो न रसश्छ्रुतिः ।
शुद्धचिन्मात्रगुणवान्, परमात्मा स गीयते ॥ ५ ॥

माधुर्यातिशयो यद्वा, गुणौघः परमात्मनः ।
तथाऽऽख्यातुं न शक्योऽपि, प्रत्याख्यातुं न शक्यते ॥ ६ ॥

बुद्धो जिनो हृषीकेशः शम्भुर्ब्रह्मादिपूरुषः ।
इत्यादिनामभेदेऽपि, नाऽर्थतः स विभिद्यते ॥ ७ ॥

धावन्तोऽपि नया नैके, तत्स्वरूपं स्पृशन्ति न ।
समुद्रा इव कल्लोलैः, कृतप्रतिनिवृत्तयः ॥ ८ ॥

शब्दोपरक्ततद्रूप,-बोधकृन्नयपद्धतिः ।
निर्विकल्पं तु तद्रूपं, गम्यं नाऽनुभवं विना ॥ ९ ॥

केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी ।
स्तोकास्तत्त्वरसास्वाद,-विदोऽनुभवजिह्वया ॥ १० ॥

जितेन्द्रिया जितक्रोधा, दान्तात्मानः शुभाशयाः ।
परमात्मगतिं यान्ति, विभिन्नैरपि वर्त्मभिः ॥ ११ ॥

नूनं मुमुक्षवः सर्वे, परमेश्वरसेवकाः ।
दूरासन्नादिभेदस्तु, तद्भृत्यत्वं निहन्ति न ॥ १२ ॥

नाममात्रेण ये दृप्ता, ज्ञानमार्गविवर्जिताः ।
न पश्यन्ति परात्मानं, ते घूका इव भास्करम् ॥ १३ ॥

श्रमः शास्त्राश्रयः सर्वो, यज्ज्ञानेन फलेग्रहिः ।
ध्यातव्योऽयमुपास्योऽयं, परमात्मा निरञ्जनः ॥ १४ ॥

नान्तराया न मिथ्यात्वं, हासो रत्यरती च न ।
न भीर्यस्य जुगुप्सा नो, परमात्मा स मे गतिः ॥ १५ ॥

न शोको यस्य नो कामो, नाऽज्ञानाविरती तथा ।
नावकाशश्च निद्रायाः, परमात्मा स मे गतिः ॥ १६ ॥

रागद्वेषौ हतौ येन, जगत्त्रयभयंकरौ ।
स त्राणं परमात्मा मे, स्वप्ने वा जागरेऽपि वा ॥ १७ ॥

उपाधिजनिता भावा, ये ये जन्मजरादिकाः ।
तेषां तेषां निषेधेन, सिद्धं रूपं परात्मनः ॥ १८ ॥

अतद्व्यावृत्तितो भिन्नं, सिद्धान्ताः कथयन्ति तम् ।
वस्तुतस्तु न निर्वाच्यं, तत्स्वरूपं कथञ्चन ॥ १९ ॥

जानन्नपि यथा म्लेच्छो, न शक्नोति पुरीगुणान् ।
प्रवक्तुमुपमाऽभावात्, तथा सिद्धसुखं जिनः ॥ २० ॥

सुरासुराणां सर्वेषां, यत्सुखं पिण्डितं भवेत् ।
एकत्राऽपि हि सिद्धस्य, तदनन्ततमांशगम् ॥ २१ ॥

अदेहा दर्शनज्ञानो,-पयोगमयमूर्त्तयः ।
आकालं परमात्मानः, सिद्धाः सन्ति निरामयाः ॥ २२ ॥

लोकाग्रशिखरारूढाः स्वभावसमवस्थिताः ।
भवप्रपञ्चनिर्मुक्ता, युक्तानन्ताऽवगाहनाः ॥ २३ ॥

इलिका भ्रमरीध्यानाद्, भ्रमरीत्वं यथाऽश्नुते ।
तथा ध्यायन् परात्मानं, परमात्मत्वमाप्नुयात् ॥ २४ ॥

परमात्मगुणानेवं, ये ध्यायन्ति समाहिताः ।
लभन्ते निभृतानन्दा,-स्ते यशोविजयश्रियम् ॥ २५ ॥

# शास्त्रसन्देशमालाविंशतिभागमध्ये ग्रथितानां ग्रन्थानामकारादिक्रमः

(संख्यया भागा विज्ञेयाः)


### अ

अट्ठारसहस्सशीलंगरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ति ( ५ )
अन्नायउंछकुलकम् ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अन्तिमाऽऽराधना ( १४ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अष्टकानि ( ३ )

### आ

आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आचारोपदेशः ( ११ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आभाणशतकम् ( ६ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आलोयणाकुलयं ( ७ )
आर्षभीयचरितमहाकाव्यम् ( ५ )

### ई

इंद्रियपराजयशतकम् ( ६ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )

### उ

उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उपदेशकल्पवल्लिः ( ११ )

उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशचिन्तामणिः ( १० )
उपदेशपद ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिका ( ८ )
उपदेशसप्ततिः ( ११ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )

## ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )

## ए

एकविंशतिर्द्वात्रिंशिकाः ( १६ )
ऐन्द्रस्तुतयः ( ५ )

## औ

औष्ट्रिकमतोत्सूत्रोद्घाटन कुलकम् ( ७ )

## अं

अंगुलसत्तरी ( १३ )

## क

कथाकोषः ( १२ )
कथानककोशः ( १२ )
कर्पूरप्रकरः ( १२ )
कर्मप्रकृतिः ( १३ )
कर्मविपाककुलकम् ( ७ )
कर्मविपाकाख्यः प्रथमः प्राचीनकर्मग्रन्थः ( १३ )
कर्मस्तवाख्यः द्वितीयः प्राचीनकर्मग्रन्थः ( १३ )
कम्मबत्तीसी ( १३ )
कविकल्पद्रुमः ( १८ )
कस्तूरीप्रकरः ( १२ )
कायस्थितिस्तोत्रम् ( १३ )
कालसप्ततिका ( १३ )
कालस्वरूपकुलकम् ( ७ )
कुमारविहारशतकम् ( ६ )
कूपदृष्टान्तविशदीकरणम् ( ५ )
कृष्णराजीविमानविचारः ( १३ )
केवलिभुक्तिप्रकरणम् ( १६ )

## क्ष

क्षमाकुलकम् ( ७ )
क्षान्तिकुलकम् ( ७ )
क्षुल्लकभवावलि ( १३ )

## ख

खामणाकुलयं ( १ ) ( ७ )
खामणाकुलयं ( २ ) ( ७ )

ग

गणधरसार्धशतकम् ( ६ )
गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )
गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )
गुणस्थानक्रमारोहः ( १३ )
गुणानुरागकुलकम् ( ७ )
गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ( ७ )
गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरुदर्शनहर्षकुलकम् ( ७ )
गुरुविरहविलापः ( १४ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

घ

घनगणितसंग्रहगाथाः ( १८ )

च

चउसरणपइन्नयं ( १५ )
चतुर्गतिजीवक्षपणाकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चरणकरणमूलोत्तरगुण ( १८ )
चारित्रमनोरथमाला ( ८ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चंदावेज्झयं पइण्णयं ( १५ )

ज

जघन्योत्कृष्टपद एककालं गुणस्थानकेषु ( १३ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवसमासः ( १३ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जैनतत्त्वसारः ( १६ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )

ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपकुलकम् ( ७ )
तित्थोगालीपइन्नयं ( १५ )
त्रिशतत्रिषष्टिपाखण्डस्वरूपस्तोत्रम् ( १५ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )

द

दशश्रावककुलकम् ( ७ )

दर्शन नियमा कुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दीवसागरपन्नत्ति ( १५ )
दृष्टान्तशतकम्-१ ( ६ )
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
दंसणसुद्धिपयरणं ( १० )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )

ध

धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मविधिः ( ८ )
धर्मशिक्षा ( ९ )
धर्मसंग्रहणिः ( १ )
धर्मसंग्रहः ( ११ )
धर्माचार्यबहुमानकुलकम् ( ७ )
धर्मोद्यमकुलकम् ( ७ )
धर्मोपदेशः ( ९ )
धर्मोपदेशमाला ( ८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धर्म्मोपदेशकुलकम् ( ७ )
धम्मोवएसकुलयं ( ७ )
धूर्ताख्यानम् ( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम् ( ६ )

न

नन्दीश्वरस्तवः ( १३ )
नमस्कारस्तवः ( १८ )
नयकर्णिका ( १६ )
नयोपदेशः ( ५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम् ( ७ )
नवतत्त्वभाष्यम् ( १३ )
नवतत्त्वम् ( १३ )
नवतत्त्वसंवेदनम् ( १३ )
नवपदप्रकरणम् ( १० )
नानाचित्तप्रकरणम् ( ३ )
नारीशीलरक्षाकुलकम् ( ७ )
निगोदषट्त्रिंशिका ( १५ )
नूतनाचार्याय हितशिक्षा ( ९ )
नंदणरायरिसिस्स अन्तिमाऽऽराधना ( १४ )
न्यायखण्डखाद्याऽपरनामा महावीरस्तवः ( ५ )
न्यायावतारः ( १६ )

न्यायावतारसूत्रवार्तिकम् ( १६ )

प

पज्जंताराहणा ( १४ )
पंचवत्थुगं ( २ )
पञ्चनिर्ग्रन्थी ( १५ )
पञ्चलिङ्गीपगरणं ( १५ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पट्टावलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रह ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिःपञ्चविंशतिका ( ५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतिर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजाविधिः ( ११ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रज्ञापनोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिमाशतकम् ( ४ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )
प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धति ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

ब

बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतुप्रकरणम् ( १३ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वेप्रकरणे ( ५
बन्धोदयसत्ता ( १३ )
बृहद्वन्दनकभाष्यम् ( १० )

भ

भवभावना ( ८ )

भावकुलकम् ( ७ )

भावनाशतकम् ( ६ )

भावप्रकरणम् ( १३ )

भाषारहस्यम् ( ५ )

भोजनपूर्वचिन्तागाथाः ( ८ )

म

मंगलकुलयं ( ७ )

मण्डलप्रकरणम् ( १८ )

मदादिविपाककुलकम् ( ७ )

मनुष्यभवदुर्लभता ( ९ )

मनोनिग्रहभावनाकुलकम् ( ७ )

महासतीकुलकम् ( ७ )

मार्गपरिशुद्धिः ( ५ )

मार्ग्गणासु बंधहेतूदयत्रिभंगी ( १३ )

मिच्छादुक्कडवोसिरणविहिकुलयं ( ७ )

मिथ्यात्वकुलकम् ( ७ )

मिथ्यात्वमथनकुलकम् ( ७ )

मिथ्यात्वविचारकुलकम् ( ७ )

मिथ्यात्वस्थानविवरणकुलकम् ( ७ )

मुखवस्त्रिकास्थापनकुलकम् ( ७ )

मूलशुद्धिः ( १० )

मृत्युमहोत्सवः ( १४ )

मोक्षोपदेशपञ्चाशकम् ( ९ )

य

यतिदिनकृत्यम् ( ११ )

यतिदिनचर्या ( १० )

यतिलक्षणसमुच्चयः ( ४ )

यतिशिक्षापञ्चाशिका ( ८ )

यात्रास्तवः ( ११ )

युक्त्यनुशासनम् ( १६ )

युक्तिप्रकाशः ( १६ )

युक्तिप्रबोधः ( १६ )

युगपद्बन्धहेतुप्रकरणम् ( १३ )

योगदृष्टिसमुच्चयः ( ३ )

योगप्रदीपः ( १२ )

योगबिन्दुः ( ३ )

योगशतकम् ( ३ )

योगशास्त्रम् ( १८ )

योगानुष्ठानकुलकम् ( ७ )

योनिस्तवः ( १३ )

र

रत्नत्रयकुलकम् ( ७ )

रत्नसञ्चयः ( १७ )

ल

लघुप्रवचनसारोद्धारः ( १७ )

लध्वल्पबहुत्व प्रकरणम् ( १३ )

लोकतत्त्वनिर्णय ( ३ )

लोकनालिकाद्वात्रिंशिका ( १३ )

व

वाक्यप्रकाशः ( १८ )

वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )

विचारपञ्चाशिका ( १३ )

विचारसप्ततिका ( १७ )

विचारसारः ( १७ )

विजयप्रभसूरिक्षामणकविज्ञप्तिः ( ५ )
विजयप्रभसूरिस्वाध्यायः ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचारः ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवतिः ( १५ )
विंशतिर्विंशिकाः ( ३ )
विषयविरक्तिकुलकम् ( ७ )
वीरस्तवः ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

## श

शङ्खेश्वरपार्श्वजिनस्तोत्रम् ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम् ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम् ( ५ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शास्त्रवार्तासमुच्चयः ( ३ )
शीलकुलकम् ( ७ )
शीलोपदेशमाला ( ८ )
शोकनिवारणकुलकम् ( ७ )

## श्र

श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधिः ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधिः ( ३ )
श्रावकप्रज्ञप्तिः ( १० )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकान्तत्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतास्वादः ( ८ )
श्रृङ्गारवैराग्यतरङ्गिणी ( १२ )

## ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थः प्राचीनकर्मग्रन्थः ( १३ )
षड्दर्शनपरिक्रमः ( १६ )
षड्दर्शनसमुच्चयः-१ ( २ )
षड्दर्शनसमुच्चयः-२ ( १६ )
षड्द्रव्यसङ्ग्रहः ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )

## स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकारः ( १८ )
संबोधप्रकरणम् ( २ )
संविज्ञसाधुयोग्यनियमकुलकम् ( ७ )

संवेगकुलयं ( ७ )
संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृत ( १८ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिकाभाष्यम् ( १३ )
समताशतकम् ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविहीकुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )
सम्यक्त्वसप्ततिः ( १० )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धिः ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
सार्धमिकवा[illegible]कुलकम् ( ७ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारावलीपइण्णयं ( १५ )
सिद्धदण्डिकास्तवः ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धसहस्रनामकोशः ( ५ )
सिद्धान्तसारोद्धारः ( १८ )
सुक्ष्मार्थविचारसारोद्धारः ( १५ )
सुभाषिताष्टकानि ( १२ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली ( १२ )
सूक्तरत्नावली ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसत्तरी प्रकरण ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽनुक्रमगाथाः (१५)
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्याद्वादकलिका ( १६ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )

## ह

हिंसाफलाष्टक ( ३ )
हिओवएसमाला ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

# ॥ शास्त्रसंदेशमाला ॥

१ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - १
२ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - २
३ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - ३
४ पू.उपा. श्रीयशोविजयगणिवराणां कृतयः - १
५ पू.उपा. श्रीयशोविजयगणिवराणां कृतयः - २
६ शतकसंदोहः
७ कुलयसंग्गहो
८ भावणासत्थणिअरो
९ भावनाशास्त्रनिकरः
१० आयारसत्थणिअरो
११ आचारशास्त्रनिकरः
१२ काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ
१३ प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि
१४ अन्तिमाराधनाग्रन्थाः
१५ आगमिकानि प्रकरणानि तथा प्रकीर्णकानि
१६ दार्शनिक-चर्चा ग्रन्थनिकरौः
१७ विविधविषयसंकलनाग्रन्थाः
१८ ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः
१९ वैराग्य कल्पलता - १
२० वैराग्य कल्पलता - २